२४८ अर्थ- (वां उरु रथः) तुम दोनोंका विशाल रथ (यत्) जब (समुद्रात् वां आ अभिवर्तते) समुद्रमेंसे-अन्तरिक्षमेंसे तुम्हारी ओर आता है, तब (द्यां परि नक्षति) द्युलोकमें चारों ओर चला जाता है, हे (माध्वी) मीठे अश्विदेवो ! (वां मधु) तुम्हारे मीठे रस हमको (मध्वा प्रुषायन्) मीठाससे भर देते हैं (यत्) जब (वां पृक्षः) तुम्हारे अन्नोंको (सीं) सभी जगहसे (पक्वाः भुरजन्त) पके धान्य प्राप्त होते हैं ।

[२४९]

२४९ सिन्धुर्ह वां रसया सिञ्चदश्वान् घृणा वयोऽरुषासः परि ग्मन् । तदू षु वामजिरं चेति यानं येन पती भवथः सूर्यायाः ॥६॥

२४९ सिन्धुः । ह । वाम् । रसया । सिञ्चत् । अश्वान् ।
घृणा । वयः । अरुषासः । परि । ग्मन् ॥
तत् । ऊँ इति । सु । वाम् । अजिरम् । चेति । यानम् ।
येन । पती इति । भवथः । सूर्यायाः ॥६॥

२४९ अन्वयः- वां अश्वान् सिन्धुः ह रसया सिञ्चत्; अरुषा सः घृणा वयः परि ग्मन्; वां तत् अजिरं यानं सु चेति; येन सूर्यायाः पती भवथः ॥६॥

२४९ अर्थ— (वां अश्वान्) तुम्हारे घोडोंको (सिन्धुः ह) बडे भारी नदीने (रसया सिञ्चत्) रसीले जलसे सिञ्चित किया है, (अरुषासः) लाल रँगवाले (घृणा वयः) दीप्तिमान् और पंछीके तुल्य वेगवान् घोडे (परि ग्मन्) चारों ओर चले गये हैं, (वां तत्) तुम्हारा वह (अजिरं यानं) शीघ्र-गामी रथ (सु चेति) भलीभाँति ज्ञात हो गया है, (येन) जिसकी सहायतासे (सूर्यायाः पती भवथः) तुम दोनों सूर्याके पति—पालन कर्ता बनते हो ।

[२५०]

२५० इहेह यद् वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक्
॥७॥

२५० इहऽइह । यत् । वाम् । समना । पपृक्षे ।
सा । इयम् । अस्मे इति । सुऽमतिः । वाजऽरत्ना ॥
उरुष्यतम् । जरितारम् । युवम् । ह ।
श्रितः । कामः । नासत्या । युवद्रिक् ॥७॥

२५० अन्वयः- वाजरत्ना ! नासत्या ! यत् समना वां पपृक्षे, इयं सा सुमतिः अस्मे; जरितारं युवं उरुष्यतं, कामः युवद्रिक् ह श्रितः ॥७॥

२५० अर्थ- हे (वाजरत्ना नासत्या) बलरूप अन्न अपने पास रखनेवाले अश्विदेवो ! (यत् समना वां) जो समान मनवाले तुम्हें (पपृक्षे) मैं अन्न अर्पण करता हूँ, (इयं सा सुमतिः) यही वह अच्छी बुद्धि है, इससे (अस्मे) हमें (सुख हो); (जरितारं युवं उरुष्यतं) प्रशंसकको तुम दोनों सुरक्षित रखो, (कामः) हमारी इच्छा (युवद्रिक् ह श्रितः) तुम्हारी ओरही जा रही है ।

२५० मानवधर्म- बलरूप रत्नसे सौन्दर्य बढाना चाहिये । एक विचार-वालोंका संगठन करना चाहिये । सबको पर्याप्त अन्न मिलना चाहिये ।

[२५१] (ऋ. ४।४४।१—७)

२५१ तं वां रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं गोः ।
यः सूर्यां वहति वन्धुरायुर्गिर्वाहसं पुरुतमं वसूयुम् ॥१॥

२५१ तम् । वाम् । रथम् । वयम् । अद्य । हुवेम ।
पृथुऽज्रयम् । अश्विना । सम्ऽगतिम् । गोः ॥
यः । सूर्याम् । वहति । वन्धुरऽयुः ।
गिर्वाहसम् । पुरुऽतमम् । वसुऽयुम् ॥१॥

२५१ अन्वयः- अश्विना ! वां तं वसुयुं, पुरुतमं गिर्वाहसं गोः संगतिं पृथुज्रयं रथं अद्य हुवेम; यः वन्धुरयुः सूर्यां वहति ॥१॥

२५१ अर्थ— हे अश्विदेवो ! (वां तं) तुम्हारे उस (वसुयुं) धनसे पूर्ण (पुरुतमं) विशाल (गिर्वाहसं) भाषणोंको दूरतक पहुँचानेवाले (गोः संगतिं) गायोंसे युक्त करनेवाले (पृथुज्रयं रथं) विख्यात वेगवाले रथको (अद्य हुवेम) आज बुलाते हैं, (यः वन्धुरयुः) जो लट्ठवाला होकर (सूर्यां वहति) सूर्याको इष्ट स्थानपर पहुँचाता है ।

२५१ मानवधर्म- गायोंको प्राप्त करना चाहिये । वेगवान् रथ वीरोंके पास रहे ।

[२५२]

२५२ युवं श्रियमश्विना देवता तां दिवो नपाता वनथः
शचीभिः । युवोर्वपुरभि पृक्षः सचन्ते वहन्ति यत्
ककुहासो रथे वाम् ॥२॥

२५२ युवम् । श्रियम् । अश्विना । देवता । ताम् ।
दिवः । नपाता । वनथः । शचीभिः ॥
युवोः । वपुः । अभि । पृक्षः । सचन्ते ।
वहन्ति । यत् । ककुहासः । रथे । वाम् ॥२॥

२५२ अन्वयः- दिवः नपाता अश्विना ! देवता युवं तां श्रियं शचीभिः वनथः; यत् ककुहासः वां रथे वहन्ति पृक्षः युवोः वपुः अभि सचन्ते ॥२॥

२५२ अर्थ— हे (दिवः नपाता) द्युलोकको न गिरानेवाले अश्विदेवो ! (देवता युवं) देवतारूपी तुम दोनों (तां श्रियं) उस शोभाको (शचीभिः वनथः) शक्तियोंसे प्राप्त करते हो; (यत्) जब (ककुहासः) बडे भारी घोडे (वां) तुम्हें (रथे वहन्ति) रथपर बैठनेपर इष्ट स्थानपर पहुँचाते हैं, तब (पृक्षः) अन्न (युवोः वपुः अभि सचन्ते) तुम दोनोंके शरीरको प्राप्त होते हैं, पुष्ट करते हैं ।

२५२ मानवधर्म— शक्तिसे प्राप्त होनेवाली शोभा प्राप्त करनी चाहिये । ऐसे अन्नका सेवन करना चाहिये कि जिससे शरीरका बल बढता जाय ।

[२५३]

२५३ को वा॑म॒द्या क॑रते रा॒तह॑व्य ऊ॒तये॑ वा सु॒तपे॑याय वा॒ऽर्कैः।
ऋ॒तस्य॑ वा व॒नुषे॑ पू॒र्व्या॑य॒ नमो॑ येमा॒नो अ॒श्विना व॑वर्तत्॥३

२५३ कः । वा॒म् । अ॒द्य । क॒र॒ते । रा॒तऽह॑व्यः ।
ऊ॒तये॑ । वा॒ । सु॒तऽपे॑याय । वा॒ । अ॒र्कैः ॥
ऋ॒तस्य॑ । वा॒ । व॒नुषे॑ । पू॒र्व्याय॑ ।
नम॑ः । येमा॒नः । अ॒श्विना॒ । आ । व॒व॒र्त॒त् ॥३॥

२५३ अन्वयः- अश्विना ! रातहव्यः कः अर्कैः वां अद्य ऊतये वा सुतपेयाय वा करते ? पूर्व्याय ऋतस्य वनुषे वा नमः येमानः आ ववर्तत् ॥३॥

२५३ अर्थ— हे अश्विदेवो ! (रातहव्यः कः) हविर्भाग दे चुकनेपर भला कौन (अर्कैः) पूजनीय साधनोंसे (वां अद्य) तुम्हारी आज (ऊतये वा सुतपेयाय वा) संरक्षणके लिए या निचोडे हुए सोमको पीनेके लिए (करते) प्रशंसा करता है ? (पूर्व्याय ऋतस्य वनुषे वा) पूर्वकालीन सत्य-धर्मकी प्राप्तिके लिए (नमः येमानः) नमन करता हुआ (आ ववर्तत्) अपनी ओर तुम्हें कौन प्रवृत्त करता है ?

[२५४]

२५४ हि॒र॒ण्यये॑न पुरुभू॒ रथे॑ने॒मं य॒ज्ञं ना॑स॒त्योप॑ यातम् ।
पिबा॑थ॒ इन्मधु॑नः सो॒म्यस्य॒ दध॑थो॒ रत्नं॑ विध॒ते जना॑य॥४

२५४ हि॒र॒ण्यये॑न । पु॒रु॒भू॒ इति॑ पुरुऽभू । रथे॑न ।
इ॒मम् । य॒ज्ञम् । ना॒स॒त्या॒ । उप॑ । या॒त॒म् ॥
पिबा॑थः । इत् । मधु॑नः । सो॒म्यस्य॑ ।
दध॑थः । रत्न॑म् । वि॒ध॒ते । जना॑य ॥४॥

२५४ अन्वयः- पुरुभू नासत्या ! हिरण्येन रथेन इमं यज्ञं उप यातं, मधुनः सोमस्य पिबाथः इत्, विधते जनाय रत्नं दधथः ॥४॥

२५४ अर्थ- हे (पुरुभू नासत्या) बहुत प्रकारसे अपना आस्तित्व जतलानेहारे तथा सत्यपालक अश्विदेवो ! (हिरण्ययेन रथेन) सुवर्णमय रथपरसे (इमं यज्ञं) इस यज्ञके (उप यातं) समीप आओ, (मधुनः सोमस्य)

*

मीठे सोमरसको (पिबाथः इत्) पान करो और (विधते जनाय) पुरुषार्थ करनेहारे लोगोंको (रत्नं दधथः) रत्न दे डालो ।

[२५५]

२५५ आ नो यातं दिवो अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन । मा वामन्ये नि यमन् देवयन्तः सं यद् ददे नाभिः पूर्व्या वाम् ॥५॥

२५५ आ । नः । यातम् । दिवः । अच्छ । पृथिव्याः । हिरण्ययेन । सुऽवृता । रथेन ॥
मा । वाम् । अन्ये । नि । यमन् । देवऽयन्तः ।
सम् । यत् । ददे । नाभिः । पूर्व्या । वाम् ॥५॥

२५५ अन्वयः- दिवः पृथिव्याः नः अच्छा हिरण्ययेन सुवृता रथेन आ यातं, देवयन्तः अन्ये वां मा नियमन् यत् वां पूर्व्या नाभिः सं ददे ॥५॥

२५५ अर्थ- (दिवः पृथिव्याः) द्युलोकसे या भूलोकसे (नः अच्छ) हमारी ओर (हिरण्ययेन सुवृता रथेन) सुवर्णमय सुन्दर रथपरसे (आयातं) आओ, (देवयन्तः अन्ये) देवोंकी कामना करनेहारे दूसरे लोग (वां मा नियमन्) तुम्हें बीचमेंही न रोक रखें, (यत्) क्योंकि (पूर्व्या नाभिः) पूर्वकालसे हमारा यह घर (वां) तुम्हें (सं ददे) भलीभाँति तुम्हें बद्ध-कर चुका है । तुम्हारा संबंध हमसे पूर्वकालसे चला आया है ।

[२५६]

२५६ नू नो रयिं पुरुवीरं बृहन्तं दस्रा मिमाथामुभयेष्वस्मे । नरो यद् वामश्विना स्तोममावन्त्सधस्तुतिमाजमीळ्हासो अग्मन् ॥६॥

२५६ नु । नः । रयिम् । पुरुऽवीरम् । बृहन्तम् ।
दस्रा । मिमाथाम् । उभयेषु । अस्मे इति ॥
नरः । यत् । वाम् । अश्विना । स्तोमम् । आवन् ।
सधऽस्तुतिम् । आजऽमीळ्हासः । अग्मन् ॥६॥

२५६ अन्वयः- दस्रा अश्विना! नः नु पुरुवीरं बृहन्तं रयिं अस्मे उभयेषु मिमाथां; यत् वां स्तोमं नरः आवन्, आजमीळ्हासः सधस्तुतिं अग्मन् ॥६॥

२५६ अर्थ- हे (दस्रा) शत्रुविनाशक अश्विदेवो! (नः नु) हमें जल्दही (पुरुवीरं बृहन्तं रयिं) अनेक वीरोंसे युक्त प्रचण्ड धनको (अस्मे उभयेषु मिमाथां) हमारे दोनों दलोंमें दे डालो; (यत् वां स्तोमं) जब कि तुम्हारी स्तुतिको (नरः आवन्) नेताओंने सुरक्षित कर रखा है तथा (आजमीळ्हासः) अजमीळ्ह परिवारके लोग (सधस्तुतिं अग्मन्) मिलकर की जानेवाली प्रशंसामें सम्मीलित होनेके लिये आगये है।

[२५७]

२५७ इहेह यद् वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक्
॥७॥

२५७ इहऽइह । यत् । वाम् । समना । पपृक्षे ।
सा । इयम् । अस्मे इति । सुऽमतिः । वाजऽरत्ना ॥
उरुष्यतम् । जरितारम् । युवम् । ह ।
श्रितः । कामः । नासत्या । युवद्रिक् ॥७॥

२५७ [इस मंत्रको २५० पर देखो]

[२५८] (ऋ० ५।७३।१-१०)
(२५८—२७७) पौर आत्रेयः । अनुष्टुप् ।

२५८ यदद्य स्थः परावति यदर्वावत्यश्विना ।
यद् वा पुरू पुरुभुजा यदन्तरिक्ष आ गतम् ॥१॥

२५८ यत् । अद्य । स्थः । पराऽवति ।
यत् । अर्वाऽवति । अश्विना ॥
यत् । वा । पुरु । पुरुऽभुजा ।
यत् । अन्तरिक्षे । आ । गतम् ॥१॥

२५८ अन्वयः- पुरुभुजा अश्विना! यत् अद्य परावति स्थः यत् अर्वावति, यत् अन्तरिक्षे यत् वा पुरू आ गतम् ॥१॥

२५८ अर्थ- हे (पुरुभुजा) बडे भुजोवाले अश्विदेवो ! (यत् अद्य) जो आज (परावति स्थः) बहुत दूर स्थानमें तुम दोनों हो, (यत् अर्वावति) या समीप स्थानपर हो, (यत् अन्तरिक्षे) अथवा अन्तरिक्षमें (यत् वा पुरु) या किन्हीं अन्य अनेक स्थानोंमें तुम रहो, पर (आगतं) इधर हमारे पास आओ ।

[२५९]

२५९ इह त्या पुरुभूतमा पुरू दंसांसि बिभ्रता ।
वरस्या याम्यध्रिगू हुवे तुविष्टमा भुजे ॥२॥

२५९ इह । त्या । पुरुऽभूतमा ।
पुरु । दंसांसि । बिभ्रता ॥
वरस्या । यामि । अध्रिगू इत्यध्रिऽगू ।
हुवे । तुविःऽतमा । भुजे ॥२॥

२५९ अन्वयः- त्या पुरू दंसांसि बिभ्रता पुरुभूतमा वरस्या अध्रिगू इह यामि, तुविष्टमा भुजे हुवे ॥२॥

२५९ अर्थ— (त्या) उन दोनों (पुरू दंसांसि बिभ्रता) बहुतसे कर्म करनेवाले, (पुरुभूतमा) बहुतोंको आदरपूर्वक रखनेवाले, (वरस्या) श्रेष्ठ (अध्रिगू) विना रोक आगे बढनेवाले अश्विदेवोके समीप (इह यामि) इधर मैं जा रहा हूँ, (तुविष्टमा) बहुत सारी सामग्रीको साथ रखनेवाले उन्हें (भुजे हुवे) भोजनके लिए मैं बुलाता हूँ।

२५९ मानवधर्म- विविध शुभ कर्मोंको करो । श्रेष्ठ बनो, ऐसी प्रगति करो कि जो किसीसे रोकी न जाय । पर्याप्त सामग्री अपने पास रखो ।

[२६०]

२६० ईर्मान्यद् वपुषे वपुश्चक्रं रथस्य येमथुः ।
पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः ॥३॥

२६० ईर्मा । अन्यत् । वपुषे । वपुः ।
चक्रम् । रथस्य । येमथुः ॥
परि । अन्या । नाहुषा । युगा ।
मह्ना । रजांसि । दीयथः ॥३॥

२६० अन्वयः- रथस्य अन्यत् वपुः चक्रं ईर्मा वपुषे येमथुः; अन्या मह्ना रजांसि नाहुषा युगा परि दीयथः ॥३॥

२६० अर्थ- (रथस्य अन्यत्) रथका एक (वपुः चक्रं) सुंदर पहिया (ईर्मा वपुषे) गतिद्वारा शोभा बढानेके लिए (येमथुः) तुम दोनों स्थिर कर चुके, (अन्या) दूसरे (रजांसि) लोकोंमें तथा अनेक (नाहुषा युगा) मानवी पुश्तोंमें (मह्ना) अपनी महिमासे (परि दीयथः) तुम चले जाते हो ।

२६० टिप्पणी- वपुः = शरीर, शोभा, सुन्दरता । ईर्मा = गति । नाहुषा युगा = नहुषकी संतान, मानवी युग ।

[२६१]

२६१ तदू षु वामेना कृतं विश्वा यद् वामनु ष्टवे ।
नाना जातावरेपसा समस्मे बन्धुमेयथुः ॥४॥

२६१ तत् । ऊँ इति । सु । वाम् । एना । कृतम् ।
विश्वा । यत् । वाम् । अनु । स्तवे ॥
नाना । जातौ । अरेपसा ।
सम् । अस्मे इति । बन्धुम् । आ । ईयथुः ॥४॥

२६१ अन्वयः— विश्वा ! यत् वां अनु स्तवे तत् वां उ एना सुकृतं, अरेपसा, नाना जातौ अस्मे बन्धुं सं आ ईयथुः ॥४॥

२६१ अर्थ- हे (विश्वा) सब देवो ! (यत् वां अनु) जो तुम दोनोंके अनुकूल (स्तवे) मैं स्तुति करता हूँ, (तत्) वह केवल (वां उ) तुम दोनोंके लियेही (एना सु कृतं) भलीभाँतिकी है; (अ-रेपसा) निर्दोष और (नाना जातौ) अनेक कर्मोंके लिये प्रसिद्ध हुए तुम दोनों (अस्मे) हमारे साथ (बन्धुं सं आ ईयथुः) बन्धुभावको ठीक प्रकार दर्शाते हो ।

२६१ मानवधर्म— जो स्वयं निर्दोष रहकर अनेक कर्म कुशलताके साथ करते हैं, वेही प्रशंसायोग्य हैं ।

[२६२]

२६२ आ यद् वां सूर्या रथं तिष्ठद् रघुष्यदं सदा ।
परि वामरुषा वयो घृणा वरन्त आतपः ॥५॥

२६२ आ । यत् । वाम् । सूर्या । रथम् ।
तिष्ठत् । रघुऽस्यदम् । सदा ॥
परि । वाम् । अरुषाः । वयः ।
घृणा । वरन्ते । आऽतपः ॥५॥

२६२ अन्वयः— यत् सूर्या वां सदा रघु-स्यदं रथं आ तिष्ठत् घृणा आतपः अरुषा वयः वां परि वरन्ते ॥५॥

२६२ अर्थ— (यत्) जब (सूर्या) सूर्यकी कन्या (वां) तुम्हारे (सदा) हमेशा (रघु-स्यदं रथं) शीघ्रगामी रथपर (आ तिष्ठत्) चढ गयी, तब (घृणा प्रदीप्त (आतपः) शत्रुओंको परिताप देनेहारे (अरुषाः वयः) लाल रंगवाले पक्षीसदृश गतिशील घोडे (वां परि वरन्ते) तुम्हें घेर लेते हैं।

[२६३]

२६३ युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा ।
घर्मं यद् वामरेपसं नासत्यास्ना भुरण्यति ॥६॥

२६३ युवोः । अत्रिः । चिकेतति ।
नरा । सुम्नेन । चेतसा ॥
घर्मम् । यत् । वाम् । अरेपसम् ।
नासत्या । आस्ना । भुरण्यति ॥६॥

२६३ अन्वयः— नासत्या नरा ! अत्रिः सुम्नेन चेतसा युवोः चिकेतति, यत् आस्ना वां अरेपसं घर्मं भुरण्यति ॥६॥

२६३ अर्थ— हे (नरा) नेता अश्विदेवो ! (अत्रिः सुम्नेन चेतसा) ऋषि अत्रि आनन्दित मनसे (युवोः चिकेतति) तुम्हारी प्रशंसा करता है, (यत्) जबकि (आस्ना वां) मुँहसे तुम दोनोंकी स्तुति करके (अरेपसं घर्मं) निर्दोष अग्निको (भुरण्यति) प्राप्त करता है ।

[२६४]

२६४ उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः ।
यद् वां दंसोभिरश्विनाऽत्रिर्नराववर्तति ॥७॥

२६४ उग्रः । वाम् । ककुहः । ययिः ।
शृण्वे । यामेषु । सम्ऽतनिः ॥
यत् । वाम् । दंसःऽभिः । अश्विना ।
अत्रिः । नरा । आऽववर्तति ॥७॥

२६४ अन्वयः– अश्विना ! यामेषु वां उग्रः ककुहः संतनिः ययिः शृण्वे; यत् अत्रिः वां दंसोभिः आ ववर्तति ॥७॥

२६४ अर्थ— हे अश्विदेवो ! (यामेषु) चढाइयोंमें (वां) तुम्हारे (उग्रः ककुहः) भीषण, ऊँचे (सन्तनिः) हमेशा आगे बढनेवाले (ययिः) गतिशील रथका (शृण्वे) शब्द सुनाई देता है, (यत्) जब अत्रि (वां दंसोभिः) तुम दोनोंको अपने कर्मोंसे (आ ववर्तति) अपनी ओर आकर्षित करता हैं ।

[२६५]

२६५ मध्व ऊ षु मधूयुवा रुद्रा सिषक्ति पिप्युषी ।
यत् समुद्राति पर्षथः पक्वाः पृक्षो भरन्त वाम् ॥८॥

२६५ मध्वः । ऊँ इति । सु । मधुऽयुवा ।
रुद्रा । सिसक्ति । पिप्युषी ॥
यत् । समुद्रा । अति । पर्षथः ।
पक्वाः । पृक्षः । भरन्त । वाम् ॥८॥

२६५ अन्वयः— मधुयुवा ! रुद्रा ! मध्वः सु पिप्युषी सिषक्ति, समुद्रा यत् अति पर्षथः वां पक्वाः पृक्षः भरन्त ॥८॥

२६५ अर्थ- हे (मधुयुवा) मधुको मिश्रित करनेवाले (रुद्रा) शत्रुको रुलानेवाले अश्विदेवो ! (मध्वः सु पिप्युषी) मधुर रससे भलीभाँति पुष्ट करनेवाली प्रशंसा तुम्हारी (सिषक्ति) सेवा करती है, (समुद्रा यत्) समुद्रोंको चूँकि (अति पर्षथः) तुम दोनों पारकर चले जाते हो, (वां) तुम्हें (पक्वाः पृक्षः भरन्त) पके हुए अन्न दिये जाते हैं ।

[२६६]

२६६ सत्यमिद् वा उ अश्विना युवामाहुर्मयोभुवा ।
ता यामन् यामहूतमा यामन्ना मृळयत्तमा ॥९॥

२६६ सत्यम् । इत् । वै । ऊँ इति । अश्विना ।
युवाम् । आहुः । मयःऽभुवा ॥
ता । यामन् । यामऽहूतमा ।
यामन् । आ । मृळयत्ऽतमा ॥९॥

२६६ अन्वयः– अश्विना ! युवां सत्यं इत् मयोभुवा आहुः वै; यामन् ता यामहूतमा, यामन् आ मृळयत्तमा ॥९॥

२६६ अर्थ— हे अश्विदेवो ! (युवां सत्यं इत्) तुम्हें सचमुच (मयोभुवा आहुः वै) सुखदायक बतलाते हैं, (यामन्) यात्राके समय (ता) वे दोनों (यामहूतमा) युद्धोंमें बुलवाने योग्य हैं इसलिए (यामन् मृळयत्तमा) आक्रमणके समय वे बहुत सुख देनेवाले बनो।

[२६७]

२६७ इमा ब्रह्माणि वर्धनाऽश्विभ्यां सन्तु शंतमा ।
या तक्षाम रथाँ इवावोचाम बृहन्नमः ॥१०॥

२६७ इमा । ब्रह्माणि । वर्धना ।
अश्विऽभ्याम् । सन्तु । शम्ऽतमा ॥
या । तक्षाम । रथान्ऽइव ।
अवोचाम । बृहत् । नमः ॥१०॥

२६७ अन्वयः— अश्विभ्यां इमा ब्रह्माणि शंतमा वर्धना सन्तु या रथान् इव तक्षाम, बृहत् नमः अवोचाम ॥१०॥

२६७ अर्थ— (अश्विभ्यां) अश्विदेवोंके लिए (इमा ब्रह्माणि) ये स्तोत्र (शन्तमा वर्धना सन्तु) शान्तिदायक तथा उनका यश बढानेहारे हों, (या) जिन्हें (रथान् इव) रथोंके समान (तक्षाम) हम बना चुके हैं और (बृहत् नमः अवोचाम) बडा भारी अन्न भी देनेके लिये कह चुके।

२६७ मानवधर्म— काव्य ऐसा हो कि जो शान्ति बढानेवाला; यश बढानेवाला और नम्रता बढानेवाला हो अथवा अन्न देनेवाला हो।

[२६८] (ऋ० ५।७४।१-१०) अनुष्टुप्, ८ निचृत् ।

२६८ कूष्ठो देवावश्विनाऽद्या दिवो मनावसू ।
तच्छ्रवथो वृषण्वसू अत्रिर्वामा विवासति ॥१॥

२६८ कूऽस्थः । देवौ । अश्विना ।
अद्य । दिवः । मनावसू इति ॥
तत् । श्रवथः । वृषण्वसू इति वृषण्ऽवसू ।
अत्रिः । वाम् । आ । विवासति ॥१॥

२६८ अन्वयः— मनावसू देवौ अश्विना ! कूस्थः अद्य दिवः; वृषण्वसू । अत्रिः वां आविवासति, तत् श्रवथः ॥१॥

२६८ अर्थ- हे (मना-वसू) उत्कृष्ट मनवाले अश्विदेवो ! (कू-स्थः) तुम दोनों भूमिपर रहनेकी इच्छा करके (अद्य दिवः) आज द्युलोकसे इधर आओ। हे (वृषण्वसू) धनकी वर्षा करनेवाले ! अत्रि (वां आ विवासति) तुम्हारी सेवा करता है, (तत् श्रवथः) उसे सुन लो।

[२६९]

२६९ कुह त्या कुह नु श्रुता दिवि देवा नासत्या ।
कस्मिन्ना यतथो जने को वां नदीनां सचा ॥२॥

२६९ कुह । त्या । कुह । नु । श्रुता ।
दिवि । देवा । नासत्या ॥
कस्मिन् । आ । यतथः । जने ।
कः । वाम् । नदीनाम् । सचा ॥२॥

२६९ अन्वयः- नासत्या देवा दिवि, कुह नु श्रुता, त्या कुह; कस्मिन् जने आ यतथः, वां नदीनां कः सचा ? ॥२॥

२६९ अर्थ- (नासत्या देवा दिवि) सत्यपालक अश्विदेव द्युलोकमें य (कुह) किधर (नु श्रुता) विख्यात हैं ? (त्या कुह) वे दोनों कहाँ हैं ! (कस्मिन् जने) किस मनुष्यके घर (आ यतथः) तुम प्रयत्न करते हो ! (वां नदीनां) तुम्हारी नदियोंका (कः सचा) भला कौन सहगामी है ?

[२७०]

२७० कं याथः कं ह गच्छथः कमच्छा युञ्जाथे रथम् ।
कस्य ब्रह्माणि रण्यथो वयं वामुश्मसीष्टये ॥३॥

❀

२७० कम् । याथः । कम् । ह । गच्छथः ।
कम् । अच्छ । युञ्जाथे इति । रथम् ॥
कस्य । ब्रह्माणि । रण्यथः ।
वयम् । वाम् । उश्मसि । इष्टये ॥३॥

२७० अन्वयः- वयं इष्टये वां उश्मसि, कं ह गच्छथः, कं याथः, रथं कं अच्छा युञ्जाथे, कस्य ब्रह्माणि रण्यथः? ॥३॥

२७० अर्थ— (वयं) हम (इष्टये) इच्छित वस्तुकी प्राप्तिके लिए (वां उश्मसि) तुम्हारी कामना करते हैं, (कं ह गच्छथः) भला तुम किसके समीप जाते हो ? (कं याथः) किसके पास चले जाते हो ? (कं अच्छ) किसके प्रति पहुँचनेके लिए (रथं युञ्जाथे) रथको जोडते हो और (कस्य ब्रह्माणि) किसके स्तोत्रोंसे (रण्यथः) तुम रममाण होते हो ?

[२७१]

२७१ पौरं चिद्ध्युदप्रुतं पौर पौराय जिन्वथः ।
यदीं गृभीततातये सिंहमिव द्रुहस्पदे ॥४॥

२७१ पौरम् । चित् । हि । उदऽप्रुतम् ।
पौर । पौराय । जिन्वथः ॥
यत् । ईम् । गृभीतऽतातये ।
सिंहम्ऽइव । द्रुहः । पदे ॥४॥

२७१ अन्वयः- पौर ! पौराय उदप्रुतं पौरं चित् हि जिन्वथः, यत् गृभीत-तातये ईं द्रुहः पदे सिंहं इव ॥४॥

२७१ अर्थ- हे (पौर) नागरिक ! ऐसी हांक (पौराय) नगरनिवासी जनके लिए (उदप्रुतं) जलमें डूबनेवाले (पौरं चित् हि) नागरिककी सहायतार्थ (जिन्वथः) तुमने मारी थी, (यत् गृभीत-तातये) जब शत्रुद्वारा घेरे हुएको छुडवानेके लिये (ईं) इसे (द्रुहः पदे सिंहं इव) वनमें सिंहके समान तुमने सहायता की ।

२७१ मानवधर्म- जनताकी सहायता करो, कष्टोंसे नागरिकोंकी सुरक्षा करो। शत्रुसे घेरे गये मनुष्योंको सहायता करके छुडाओ ॥

[२७२]

२७२ प्र च्यवानाज्जुजुरुषो वव्रिमत्कं न मुञ्चथः ।
युवा यदी कृथः पुनरा काममृण्वे वध्वः ॥५॥

२७२ प्र । च्यवानात् । जुजुरुषः ।
वव्रिम् । अत्कम् । न । मुञ्चथः ॥
युवा । यदि । कृथः । पुनः ।
आ । कामम् । ऋण्वे । वध्वः ॥५॥

२७२ अन्वयः— जुजुरुषः च्यवानात् वव्रिं अत्कं न प्र मुञ्चथः, यदि पुनः युवा कृथः वध्वः कामं आ ऋण्वे ॥५॥

२७२ अर्थ- (जुजुरुषः च्यवानात्) बूढे च्यवनसे (वव्रिं) ढकनेवाली चमडीको (अत्कं न) कवचके समान (प्र मुञ्चथः) तुमने उतार डाला (यदि) और (पुनः) फिर (युवा कृथः) उसे युवक बना दिया तब वह (वध्वः कामं) वधूकी कामनाको करनेयोग्य रूपको (आ ऋण्वे) प्राप्त हुआ।

२७२ भावार्थ— अश्विदेवोंने वृद्ध च्यवन ऋषिके शरीरपरसे चमडी, कवच उतारनेके समान, उतार दी, तब वह युवा बना और वधूकी इच्छा करने लगा।

२७२ मानवधर्म— औषधि योजनासे वृद्धके शरीरपरसे चमडी उतार दी जाय, तो वह फिरसे तरुण बनेगा और वह तरुण स्त्रीकी कामना करनेयोग्य वीर्यवान् हो जायगा। (आयुर्वेदके ज्ञानियोंको इस औषधि-प्रयोगका विज्ञान निश्चित करना चाहिये ।)

[२७३]

२७३ अस्ति हि वामिह स्तोता स्मसि वां संदृशि श्रिये ।
नू श्रुतं म आ गतमवोभिर्वाजिनीवसू ॥६॥

२७३ अस्ति । हि । वाम् । इह । स्तोता ।
स्मसि । वाम् । सम्ऽदृशि । श्रिये ॥
नु । श्रुतम् । मे । आ । गतम् ।
अवःऽभिः । वाजिनीवसू इति वाजिनीऽवसू ॥६॥

२७३ अन्वयः— वां इह स्तोता अस्ति हि, श्रिये वां संदृशि स्मसि, वाजिनीवसू ! मे नु श्रुतं, अवोभिः आ गतम् ॥६॥

२७३ अर्थ— (वां) तुम्हारी (स्तोता इह अस्ति हि) प्रशंसा करनेवाला यहीं है, (श्रिये वां संदृशि स्मसि) शोभाके लिए तुम्हारी दृष्टिकी कक्षामें हम रहते हैं, हे (वाजिनी-वसू) सेनारूपी धनसे युक्त अश्विदेवो ! (मे नु श्रुतं) मेरी पुकार अब सुन लो और (अवोभिः आगतं) संरक्षणकी आयोजनाओंसे युक्त होकर आओ ।

२७३ भावार्थ— संरक्षकोंकी सेनासे युक्त वीर अपने संरक्षक साधनोंके साथ आ जांय और जनताकी सुरक्षा करें ।

२७३ मानवधर्म— संरक्षक दल सिद्ध रखो और संरक्षक साधनोंसे नागरिकोंकी सुरक्षा करो । दुष्टोंद्वारा नागरिक न मारे जांय ।

[२७४]

२७४ को वा॑म॒द्य पु॑रू॒णामा व॑व्ने॒ मर्त्या॑नाम् ।
को विप्रो॑ विप्रवाहसा॒ को य॒ज्ञैर्वा॑जिनीवसू ॥७॥

२७४ कः । वा॒म् । अ॒द्य । पु॒रू॒णाम् ।
आ । व॒व्ने॒ । मर्त्या॑नाम् ॥
कः । विप्रः॑ । वि॒प्र॒ऽवा॒ह॒सा॒ ।
कः । य॒ज्ञैः । वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू ॥७॥

२७४ अन्वयः- विप्र-वाहसा ! वाजिनी-वसू ! अद्य पुरूणां वां कः, कः विप्रः, कः यज्ञैः आ वव्ने ? ॥७॥

२७४ अर्थ— हे (विप्र-वाहसा) ज्ञानियोंद्वारा सेवनीय और (वाजिनी-वसू) सेनाको पास रखनेवाले अश्विदेवो ! (अद्य पुरूणां) आज नागरिकोंमेंसे (कः कः विप्रः) कौन ज्ञानी, तथा (कः यज्ञैः) भला कौन पुरुष यज्ञोंसे (आ वव्ने) पूर्णतया (वां) तुम्हें स्वीकार करता है ।

[२७५]

२७५ आ वां॒ रथो॒ रथा॑नां॒ येष्ठो॑ यात्वश्विना ।
पु॒रू चि॑दस्म॒युस्ति॒र आ॑ङ्गू॒षो मर्त्ये॒ष्वा ॥८॥

२७५ आ । वाम् । रथः । रथानाम् ।
येष्ठः । यातु । अश्विना ॥
पुरु । चित् । अस्मऽयुः । तिरः ।
आङ्गूषः । मर्त्येषु । आ ॥८॥

२७५ अन्वयः—अश्विना! रथानां येष्ठः वां रथः आ यातु; मर्त्येषु अस्मयुः, पुरु चित् तिरः आंगूषः आ ॥८॥

२७५ अर्थ— हे अश्विदेवो! (रथानां) रथोंमें (येष्ठः वां रथः) विशेष वेगवाला तुम्हारा रथ (आ यातु) इधर आजाए; (मर्त्येषु) मानवोंमें (अस्मयुः) हमारीही कामना करनेवाला तथा (पुरु चित् तिरः) अनेक शत्रुओंको भी हटा देनेवाला (आंगूषः आ) वह प्रशंसनीय रथ इधर आये ।

[२७६]

२७६ शमू षु वां मधूयुवाऽस्माकमस्तु चर्कृतिः ।
अर्वाचीना विचेतसा विभिः श्येनेव दीयतम् ॥९॥

२७६ शम् । ऊँ इति । सु । वाम् । मधुऽयुवा ।
अस्माकम् । अस्तु । चर्कृतिः ॥
अर्वाचीना । विऽचेतसा ।
विऽभिः । श्येनाऽइव । दीयतम् ॥९॥

२७६ अन्वयः— मधु-युवा ! अस्माकं वां चर्कृतिः सु शं अस्तु; विचेतसा अर्वाचीना श्येना इव विभिः दीयतम् ॥९॥

२७६ अर्थ— हे (मधु-युवा) मधुसे युक्त अश्विदेवो! (अस्माकं) हमारा (वां चर्कृतिः) तुम्हारे लिए किया हुआ कर्म (सु शं अस्तु) भलीभाँति सुखदायक हो। (विचेतसा) तुम विशिष्ट चेतनशक्तिसे युक्त हो, इसलिए (अर्वाचीना) हमारे सामने (श्येना इव) बाज पंछीके तुल्य (विभिः दीयतम्) वेगवान् घोडोंसे आ जाओ ।

[२७७]

२७७ अश्विना यद्ध कर्हि चिच्छुश्रूयातमिमं हवम् ।
वस्वीरू षु वां भुजः पृञ्चन्ति सु वां पृचः ॥१०॥

२७७ अश्विना । यत् । ह । कर्हि । चित् ।
शुश्रुयातम् । इमम् । हवम् ॥
वस्वीः । ऊँ इति । सु । वाम् । भुजः ।
पृञ्चन्ति । सु । वाम् । पृचः ॥१०॥

२७७ अन्वयः— अश्विना ! इमं हवं यत् कर्हि चित् ह शुश्रुयातं, वस्वीः भुजः वां सु, पृचः वां सु पृञ्चन्ति ॥१०॥

२७७ अर्थ— हे अश्विदेवो ! (इमं हवं) इस पुकारको (यत्) जहाँ (कर्हि चित् ह) कहीं भी तुम रहो लेकिन (शुश्रुयातं) सुन लो (वस्वीः भुजः) प्रशंसनीय भोजन (वां सु) तुम्हें ठीक प्रकार मिले इसलिए रखे हैं, (पृचः वां) अन्नोंको तुम्हारे लिए (सु पृञ्चन्ति) भलीभाँति मिश्रित करते हैं।

[२७८] (ऋ० ५।७५।१-९)

(२७८-२८६) अवस्युरात्रेयः । पङ्क्तिः ।

२७८ प्रति प्रियतमं रथं वृषणं वसुवाहनम् ।
स्तोता वामश्विनावृषिः स्तोमेन प्रति भूषति
माध्वी मम श्रुतं हवम् ॥१॥

२७८ प्रति । प्रियऽतमम् । रथम् ।
वृषणम् । वसुऽवाहनम् ॥
स्तोता । वाम् । अश्विनौ । ऋषिः ।
स्तोमेन । प्रति । भूषति ।
माध्वी इति । मम । श्रुतम् । हवम् ॥१॥

२७८ अन्वयः— माध्वी अश्विनौ ! स्तोता ऋषिः वां प्रियतमं वसुवाहनं वृषणं रथं प्रति स्तोमेन प्रति भूषति, मम हवं श्रुतम् ॥१॥

२७८ अर्थ— हे (माध्वी) मधुरतासे युक्त अश्विदेवो ! (स्तोता ऋषिः) प्रशंसा करनेवाला ऋषि (वां) तुम्हारे (प्रियतमं) अत्यन्त प्रिय, (वसुवाहनं) धन ढोनेवाले और (वृषणं रथं प्रति) बलवान् रथका (स्तोमेन प्रति भूषति) स्तोत्रसे वर्णन करता है, तुम (मम हवं श्रुतं) मेरी पुकारको सुन लो।

[२७९]

२७९ अत्यायातमश्विना तिरो विश्वा अहं सना ।
दस्रा हिरण्यवर्तनी सुषुम्ना सिन्धुवाहसा
माध्वी मम श्रुतं हवम् ॥२॥

२७९ अतिऽआयातम् । अश्विना ।
तिरः । विश्वाः । अहम् । सना ॥
दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी ।
सुऽसुम्ना । सिन्धुऽवाहसा ।
माध्वी इति । मम । श्रुतम् । हवम् ॥२॥

२७९ अन्वयः- माध्वी अश्विना ! सिन्धुवाहसा ! हिरण्यवर्तनी ! सु-सुम्ना! दस्रा ! मम हवं श्रुतं, अति-आयातं, अहं सना विश्वाः तिरः ॥२॥

२७९ अर्थ— हे (माध्वी) मिठाससे युक्त (सिन्धु-वाहसा) नदियोंमें जानेवाले ! (हिरण्यवर्तनी) सुवर्णके रथवाले ! (सु-सुम्ना ! दस्रा) अच्छे मनसे युक्त शत्रुविनाशक अश्विदेवो ! (मम हवं श्रुतं) मेरी पुकार सुन लो और (अति आयातं) विघ्नोंको लाँघकर इधर आजाओ, तथा ऐसा प्रबंध करो कि (अहं) मैं (सना) हमेशा (विश्वाः तिरः) सभी बाधाओंको हटा सकूँ।

[२८०]

२८० आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम् ।
रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू
माध्वी मम श्रुतं हवम् ॥३॥

२८० आ । नः । रत्नानि । बिभ्रतौ ।
अश्विना । गच्छतम् । युवम् ॥
रुद्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी ।
जुषाणा । वाजिनीवसू इति वाजिनीऽवसू ।
माध्वी इति । मम । श्रुतम् । हवम् ॥३॥

१८० अन्वयः— रुद्रा ! हिरण्यवर्तनी ! वाजिनी-वसू अश्विना ! नः रत्नानि बिभ्रतौ जुषाणा युवं आ गच्छतं माध्वी ! मम हवं श्रुतम् ॥३॥

१८० अर्थ- हे (रुद्रा) शत्रुको रुलानेवाले (हिरण्यवर्तनी) स्वर्णमय रथवाले (वाजिनी-वसू) सेनारूप धनवाले अश्विदेवो ! (नः रत्नानि बिभ्रतौ) हमारे लिए रत्नोंको ले आते हुए (जुषाणा) हमारे कथनको ध्यानपूर्वक सुनते हुए (युवं) तुम दोनों (आ गच्छतं) आओ । हे (माध्वी) मधुरतासे युक्त ! (मम हवं श्रुतं) मेरी पुकार सुनो ।

[१८१]

२८१ सुष्टुभो वां वृषण्वसू रथे वाणीच्याहिता ।
उत वां ककुहो मृगः पृक्षः कृणोति वापुषो
माध्वी मम श्रुतं हवम् ॥४॥

२८१ सुऽस्तुभः । वाम् । वृषण्वसू इति वृषण्ऽवसू ।
रथे । वाणीची । आऽहिता ॥
उत । वाम् । ककुहः । मृगः ।
पृक्षः । कृणोति । वापुषः ।
माध्वी इति । मम । श्रुतम् । हवम् ॥४॥

१८१ अन्वयः- वृषण्वसू ! वां सु-स्तुभः, वाणीची रथे आहिता; उत ककुहः मृगः वापुषः वां पृक्षः कृणोति, माध्वी ! मम हवं श्रुतम् ॥४॥

१८१ अर्थ— हे (वृषण्वसू) धनोंकी वर्षा करनेवाले देवो ! मैं (वां सुस्तुभः) तुम दोनोंका अच्छा प्रशंसक हूँ; (वाणीची रथे आहिता) मेरी स्तुति तुम्हारे रथके विषयमें हो रही है (उत) और (ककुहः मृगः) महान्, तुम्हारा अन्वेषण कर्ता (वापुषः) बडे शरीरवाला (वां) तुम्हारे लिए (पृक्षः कृणोति) हविर्भाग तैयार करता है, इसलिए हे (माध्वी) मिठाससे पूर्ण देवो ! (मम हवं श्रुतं) मेरी पुकार सुन लो ।

[१८२]

२८२ बोधिन्मनसा रथ्येषिरा हवनश्रुता ।
विभिश्च्यवानमश्विना नि याथो अद्वयाविनं
माध्वी मम श्रुतं हवम् ॥५॥

२८२ बोधित्ऽमनसा । रथ्या ।
इषिरा । हवनऽश्रुता ॥
विऽभिः । च्यवानम् । अश्विना ।
नि । याथः । अद्वयाविनम् ।
माध्वी इति । मम । श्रुतम् । हवम् ॥५॥

२८२ अन्वयः— माध्वी अश्विना ! रथ्या, इषिरा, हवन-श्रुता, बोधित-मनसा अद्वयाविनं च्यवानं विभिः नि याथः, मम हवं श्रुतम् ॥५॥

२८२ अर्थ— हे (माध्वी) मिठाससे युक्त अश्विदेवो ! (रथ्या) रथपर चढे (इषिरा) गतिशील, (हवन-श्रुता) पुकार सुननेवाले और (बोधित्-मनसा) ज्ञानयुक्त मनवाले तुम दोनों (अद्वयाविनं च्यवानं) मनमें कुछ और बाहर कुछ ऐसे बर्ताव न करनेवाले च्यवानके समीप (विभिः नि याथः) वेगपूर्वक जानेवाले घोडोंसे पहुँचते हो, इसलिए मेरी पुकार सुनो ।

[२८३]

२८३ आ वां नरा मनोयुजोऽश्वासः प्रुषितप्सवः ।
वयो वहन्तु पीतये सह सुम्नेभिरश्विना
माध्वी मम श्रुतं हवम् ॥६॥

२८३ आ । वाम् । नरा । मनःऽयुजः ।
अश्वासः । प्रुषितऽप्सवः ॥
वयः । वहन्तु । पीतये ।
सह । सुम्नेभिः । अश्विना ।
माध्वी इति । मम । श्रुतम् । हवम् ॥६॥

२८३ अन्वयः- नरा अश्विना ! मनोयुजः प्रुषितप्सुवः वयः अश्वासः वां सुम्नेभिः सह पीतये आ वहन्तु; माध्वी ! मम हवं श्रुतम् ॥६॥

२८३ अर्थ- हे (नरा) नेता अश्विदेवो ! (मनोयुजः) मनके इशारेसे कार्यमें जुट जानेवाले, (प्रुषितप्सुवः) धब्बेवाले रूपोंवाले (वयः अश्वासः)

*

गतिशील घोडे (वां) तुम दोनोंको (सुम्नेभिः सह पीतये) सुखोंके साथ सोमपानके लिए (आ वहन्तु) इधर ले आयँ । हे (माध्वी) मधुरतासे पूर्ण ! (मम हवं) मेरा बुलावा (श्रुतं) सुनो ।

[१८४]

२८४ अश्विनावेह गच्छतं नासत्या मा वि वेनतम् ।
तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या
माध्वी मम श्रुतं हवम् ॥७॥

२८४ अश्विनौ । आ । इह । गच्छतम् ।
नासत्या । मा । वि । वेनतम् ॥
तिरः । चित् । अर्यऽया । परि ।
वर्तिः । यातम् । अदाभ्या ।
माध्वी इति । मम । श्रुतम् । हवम् ॥७॥

२८४ अन्वयः- अदाभ्या नासत्या माध्वी अश्विना ! इह आ गच्छतं, मा वि वेनतं अर्यया तिरः चित् वर्तिः परि यातं, मम हवं श्रुतम् ॥७॥

२८४ अर्थ— हे (अदाभ्या) न दबनेवाले ! सत्यपालक ! मधुरिमा-वाले अश्विदेवो ! (इह आ गच्छतं) इधर आओ, (मा वि वेनतं) न उदासीन बनो, (अर्यया) तुम दोनों अधिपति हो इसलिए (तिरः चित्) दूर देशसे भी (वर्तिः परि यातं) घर चले आओ और (मम) मेरी (हवं श्रुतं) पुकार सुनो ।

१८४ मानवधर्म— किसीके दबावसे न दब जाओ, सत्यका पालन करो, मीठे स्वभाववाले बनो, आर्यत्वके योग्य व्यवहार करो, कभी उदास न बनो, सुदूर स्थानसे भी अपने घर आओ ।

[१८५]

२८५ अस्मिन् यज्ञे अदाभ्या जरितारं शुभस्पती ।
अवस्युमश्विना युवं गृणन्तमुप भूषथो
माध्वी मम श्रुतं हवम् ॥८॥

२८५ अस्मिन् । यज्ञे । अदाभ्या ।
जरितारम् । शुभः । पती इति ॥
अवस्युम् । अश्विना । युवम् ।
गृणन्तम् । उप । भूषथः ।
माध्वी इति । मम । श्रुतम् । हवम् ॥८॥

२८५ अन्वयः- शुभस्पती! अदाभ्या माध्वी अश्विना! अस्मिन् यज्ञे जरितारं अवस्युं युवं गृणन्तं उप भूषथः, मम हवं श्रुतम् ॥ ८ ॥

२८५ अर्थ- हे (शुभस्पती) शुभोंके पालनकर्ता (अदाभ्या माध्वी) न दबनेवाले, मधुरिमामय अश्विदेवो ! (अस्मिन् यज्ञे) इस यज्ञमें (जरितारं) प्रशंसक (अवस्युं) रक्षणकी इच्छा करनेहारे (युवं गृणन्तं) तुम दोनोंकी प्रशंसा करनेवालेके (उप भूषथः) समीप जाकर उसे अलंकृत करते हो, इसलिए (मम हवं) मेरे बुलावेको (श्रुतं) सुनो ।

[२८६]

२८६ अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः ।
अयोजि वां वृषण्वसू रथो दस्रावमर्त्यो
माध्वी मम श्रुतं हवम् ॥९॥

२८६ अभूत् । उषाः । रुशत्ऽपशुः ।
आ । अग्निः । अधायि । ऋत्वियः ॥
अयोजि । वाम् । वृषण्वसू इति वृषण्ऽवसू ।
रथः । दस्रौ । अमर्त्यः ।
माध्वी इति । मम । श्रुतम् । हवम् ॥९॥

२८६ अन्वयः- माध्वी दस्रौ ! वृषण्वसू ! उषा अभूत्, ऋत्वियः रुशत्पशुः अग्निः आ अधायि; वां अमर्त्यः रथः अयोजि, मम हवं श्रुतम् ॥ ९ ॥

२८६ अर्थ-हे (माध्वी दस्रौ) मधुरिमामय शत्रुविनाशक (वृषण्वसू) बलको स्थिर करनेहारे अश्विदेवो ! (उषा अभूत्) प्रातःकाल हो चुका, (ऋत्वियः) ऋतुके अनुसार (रुशत्-पशुः अग्निः) प्रदीप्त तेजवाला अग्नि (आ अधायि) पूर्णतया रखा गया है, (वां) तुम्हारा (अमर्त्यः रथः) न नष्ट होनेवाला रथ (अयोजि) युक्त किया गया है, इसलिए (मम हवं श्रुतं) मेरी पुकार सुन लो।

[१८७] (ऋ० ५।७६।१-५)

(१८७-१९६) भौमोऽत्रिः। त्रिष्टुप्।

२८७ आ भात्यग्निरुषसामनीकमुद् विप्राणां देवया वाचो अस्थुः। अर्वाञ्चा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ ॥१॥

२८७ आ। भाति। अग्निः। उषसाम्। अनीकम्। उत्। विप्राणाम्। देवऽयाः। वाचः। अस्थुः॥ अर्वाञ्चा। नूनम्। रथ्या। इह। यातम्। पीपिऽवांसम्। अश्विना। घर्मम्। अच्छ ॥१॥

२८७ अन्वयः- उषसां अनीकं अग्निः आ भाति, विप्राणां देवया वाचः उत् अस्थुः; रथ्या अश्विना! पीपिवांसं घर्मं अच्छ नूनं इह अर्वाञ्चा यातम् ॥ १ ॥

२८७ अर्थ- (उषसां अनीकं) प्रातःवेलाके समीप (अग्निः आ भाति) अग्नि पूर्णतया प्रदीप्त हो उठता है (विप्राणां देवया वाचः) ज्ञानियोंके देवोंको चाहनेवाले भाषण (उत् अस्थुः) होने लगे; हे (रथ्या अश्विना) रथपर चढे हुए अश्विदेवो (पीपिवांसं घर्मं अच्छ) पुष्ट होनेवाले अग्निके प्रति (नूनं इह) अवश्यही इधर (अर्वाञ्चा यातं) हमारे पास आओ।

[१८८]

२८८ न संस्कृतं प्र मिमीतो गमिष्ठाऽन्ति नूनमश्विनोपस्तुतेह। दिवाऽभिपित्वेऽवसागमिष्ठा प्रत्यवर्तिं दाशुषे शंभविष्ठा ॥२

२८८ न । सुंस्कृतम् । प्र । मिमीतः । गमिष्ठा ।
अन्ति । नूनम् । अश्विना । उप॑ऽस्तुता । इह ॥
दिवा । अभिऽपित्वे । अव॑सा । आऽगमिष्ठा ।
प्रति । अव॑र्तिम् । दाशुषे । शम्ऽभविष्ठा ॥२॥

२८८ अन्वयः– संस्कृतं न प्र मिमीतः, नूनं उपस्तुता अश्विना इह अन्ति गमिष्ठा: अवर्तिं प्रति दिवा अभिपित्वे अवसा आगमिष्ठा, दाशुषे शंभविष्ठा ॥२॥

२८८ अर्थ– (संस्कृतं न प्र मिमीतः) जो संस्कार करके सिद्ध किया है उसे वे दोनों नष्ट नहीं करते हैं, (नूनं उपस्तुता) अवश्यही प्रशंसित होनेपर अश्विदेव (इह अन्ति गमिष्ठा) इधर समीप आनेमें तैयार रहते हैं, (अवर्तिं प्रति) दरिद्रताके समीप उसे हटानेके लिए (दिवा अभिपित्वे) दिनके प्रारंभमें (अवसा आगमिष्ठा) संरक्षणके साथ आनेवाले और (दाशुषे शंभविष्ठा) दानी पुरुषको अत्यन्त सुख देनेवाले हैं ।

२८८ मानवधर्म– जो सुसंस्कृत है उसका नाश न करो, दरिद्रताको दूर करो, सबकी सुरक्षा करो, दाताको सुख दो ।

[२८९]

२८९ उता यातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य ।
दिवा नक्तमवसा शंतमेन नेदानीं पीतिरश्विना ततान ॥३

२८९ उत । आ । यातम् । सम्ऽगवे । प्रातः । अह्नः ।
मध्यंदिने । उत्ऽइता । सूर्यस्य ॥
दिवा । नक्तम् । अवसा । शम्ऽतमेन ।
न । इदानीम् । पीतिः । अश्विना । आ । ततान ॥३॥

२८९ अन्वयः— उत संगवे अह्नः प्रातः मध्यंदिने, सूर्यस्य उदिता, दिवा नक्तं शंतमेन अवसा आ यातं, इदानीं पीतिः न अश्विना आ ततान ॥ ३ ॥

२८९ अर्थ— (उत) और (संगवे अह्नः) दिनके उस समय जब कि गौएँ इकट्ठी होती हैं, (प्रातः) सुबह, (मध्यंदिने) दुपहरके समय, (सूर्यस्य उदिता) सूर्यके उदय होनेपर (दिवा नक्तं) दिन और रात (शंतमेन अवसा) सुखदायक संरक्षणके साथ (आ यातं) इधर पधारो, (इदानीं) अबही (पीतिः) यह रसपान (अश्विना) अश्विदेवोंके साथ (आ ततान न) हो रहा है ऐसा नहीं है ।

[२९०]

२९० इदं हि वां प्रदिवि स्थानमोक इमे गृहा अश्विनेदं दुरोणम् । आ नो दिवो बृहतः पर्वतादाऽद्भ्यो यातमिषमूर्जं वहन्ता ॥४॥

२९० इदम् । हि । वाम् । प्रऽदिवि । स्थानम् । ओकः । इमे । गृहाः । अश्विना । इदम् । दुरोणम् ॥ आ । नः । दिवः । बृहतः । पर्वतात् । आ । अत्ऽभ्यः । यातम् । इषम् । ऊर्जम् । वहन्ता ॥४॥

२९० अन्वयः- अश्विना ! इदं ओकः वां हि प्रदिवि स्थानं, इमे गृहाः, इदं दुरोणं; दिवः बृहतः पर्वतात् अद्भ्यः इषं ऊर्जं वहन्ता नः आ यातम् ॥४॥

२९० अर्थ— हे (अश्विना) अश्विदेवो ! (इदं ओकः) यह वसतिगृह (वां हि) तुम दोनोंके लिएही (प्रदिवि स्थानं) उत्कृष्ट जगह है, उसी प्रकार (इमे गृहाः) ये घर (इदं दुरोणं) यह मकान भी तुम्हारे लिएही हैं; (दिवः) द्युलोकसे, (बृहतः पर्वतात्) बडे भारी पहाडसे (अद्भ्यः) जलोंसे (इषं ऊर्जं वहन्ता) अन्न और बल ले आते हुए (नः आयातं) हमारे समीप आओ ।

[२९१]

२९१ समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम । आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥५॥

२९१ सम् । अश्विनोः । अवसा । नूतनेन । मयःऽभुवा । सुऽप्रनीती । गमेम ॥ आ । नः । रयिम् । वहतम् । आ । उत । वीरान् । आ । विश्वानि । अमृता । सौभगानि ॥५॥

२९१ अन्वयः- अश्विनोः नूतनेन मयोभुवा अवसा सुप्रनीती सं गमेम; नः रयिं आ वहतं उत वीरान् विश्वानि सौभगानि अमृता ॥ ५ ॥

२९१ अर्थ- (अश्विनोः नूतनेन) अश्विदेवोंके नये (मयोभुवा अवसा) सुखकारक संरक्षणसे, (सुप्रणीती) सुन्दर नेतृत्वसे (सं गमेम) हम भली प्रकार जीवन बितायें; (नः रयिं आ वहतं) हमें धन ले आओ, (उत) और वैसेही (वीरान्) वीरोंको तथा (विश्वानि सौभगानि अमृता) सभी सौभाग्य हमें देदो ।

[२९२] (ऋ० ५।७७।१-५)

२९२ प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः पिबातः ।
प्रातर्हि यज्ञमश्विना दधाते प्र शंसन्ति कवयः पूर्वभाजः ॥१॥

२९२ प्रातःऽयावाना । प्रथमा । यजध्वम् ।
पुरा । गृध्रात् । अररुषः । पिबातः ॥
प्रातः । हि । यज्ञम् । अश्विना । दधाते इति ।
प्र । शंसन्ति । कवयः । पूर्वऽभाजः ॥१॥

२९२ अन्वयः— प्रातः-यावाना प्रथमा यजध्वं, अररुषः गृध्रात् पुरा पिबातः, अश्विना प्रातः हि यज्ञं दधाते पूर्वभाजः कवयः प्र शंसन्ति ॥ १ ॥

२९२ अर्थ— (प्रातः-यावाना प्रथमा) सुबह सबसे प्रथम आनेवाले अश्विदेवोंकी (यजध्वं) पूजा करो, (अररुषः गृध्रात्) अदानी तथा अतिलोभीसे (पुरा पिबातः) पहलेही ये सोमको पीते हैं, क्योंकि अश्विदेव (प्रातः हि) सुबहही (यज्ञं दधाते) यज्ञके पास आते हैं और (पूर्वभाजः कवयः) पूर्वकालीन विद्वान् इनकी (प्र शंसन्ति) प्रशंसा करते हैं ।

[२९३]

२९३ प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम् ।
उतान्यो अस्मद् यजते वि चावः पूर्वःपूर्वो यजमानो वनीयान् ॥२॥

२९३ प्रातः । यजध्वम् । अश्विना । हिनोत ।
न । सायम् । अस्ति । देवऽयाः । अजुष्टम् ॥
उत । अन्यः । अस्मत् । यजते । वि । च । आवः ।
पूर्वःऽपूर्वः । यजमानः । वनीयान् ॥२॥

२९३ अन्वयः— अश्विना प्रातः यजध्वं, हिनोत, सायं अजुष्टं, देवया। न अस्ति; उत अस्मत् अन्यः यजते वि आवः च, पूर्वः-पूर्वः यजमानः वनीयान् ॥ २ ॥

२९३ अर्थ— अश्विदेवोंके लिए (प्रातः यजध्वं) सुबह यजन करो, (हिनोत) प्रेरणा करो, (सायं अजुष्टं) शामको वह असेवनीय बनता है और (देव याः न अस्ति) देवोंके समीप जानेवाला नहीं रहता, (उत) और (अस्मत् अन्यः) हमसे पूर्व दूसरा कोई (यजते) यजन करता है तो (वि आवः च) उनकी विशेष तृप्ति करता है, क्योंकि (पूर्वः-पूर्वः यजमानः) पहले पहले जो यजन करनेवाला होता है, वही (वनीयान्) देवोंके लिए आदरणीय बनता है।

२९३ मानवधर्म— प्रातःकाल उठो और देवोंकी पूजा करो। अपने पूर्व दूसरा कोई न उठे और वह हमसे पूर्व पूजा न करे। जो प्रथम पूजा करता है, उसपर देव प्रसन्न होते हैं।

प्रभातमें उठनेका यह आदेश मननीय है।

[२९४]

२९४ हिरण्यत्वङ्मधुवर्णो घृतस्नुः पृक्षो वहन्ना रथो वर्तते
वाम्। मनोजवा अश्विना वातरंहा येनातियाथो
दुरितानि विश्वा ॥३॥

२९४ हिरण्यऽत्वक् । मधुऽवर्णः । घृतऽस्नुः ।
पृक्षः । वहन् । आ । रथः । वर्तते । वाम् ॥
मनःऽजवाः । अश्विना । वातऽरंहाः ।
येन । अतिऽयाथः । दुःऽइतानि । विश्वा ॥३॥

१९४ अन्वयः-वां हिरण्य-त्वक् मधुवर्णः घृतस्नुः रथः पृक्षः वहन् आ वर्तते; मनो-जवाः वात-रंहाः हे अश्विना येन विश्वा दुरिता अति याथः ॥ ३ ॥

१९४ अर्थ— (वां हिरण्य-त्वक्) तुम दोनोंका सुवर्णसे ढका हुआ (मधुवर्णः) मनोहर रंगवाला (घृत-स्नुः रथः) घृत टपकाता हुआ रथ (पृक्षः वहन्) अन्न ढोता हुआ, (आ वर्तते) हमारे सामने आता है, (मनो-जवाः) वह मनके तुल्य वेगवान् (वात-रंहाः) वायुके समान तेज दौडनेवाला है, हे अश्विदेवो! (येन) जिस रथसे (विश्वा दुरिता) सभी बुराइयोंको (अति याथः) पार करके चले जाते हो।

१९४ मानवधर्म— रथ सुवर्ण जैसा तेजस्वी और अत्यंत वेगवान् हो। उसमें रखकर घी तथा अन्न लाया जाय और उससे सब दुःखदायक पाप दूर किये जांय ॥

[१९५]

२९५ यो भूयिष्ठं नासत्याभ्यां विवेष चनिष्ठं पित्वो ररते विभागे। स तोकमस्य पीपरच्छमीभिरनूर्ध्वभासः सदमित् तुतुर्यात् ॥४॥

२९५ यः। भूयिष्ठम्। नासत्याभ्याम्। विवेष। चनिष्ठम्। पित्वः। ररते। विऽभागे॥ सः। तोकम्। अस्य। पीपरत्। शमीभिः। अनूर्ध्वऽभासः। सदम्। इत्। तुतुर्यात् ॥४॥

२९५ अन्वयः— यः विभागे नासत्याभ्यां भूयिष्ठं चनिष्ठं विवेष पित्वः ररते सः अस्य तोकं शमीभिः पीपरत् सदमित् अनूर्ध्वभासः तुतुर्यात् ॥४॥

२९५ अर्थ— (यः) जो (विभागे) विभाग करनेके मौकेपर (नासत्याभ्यां) अश्विदेवोंको (भूयिष्ठं चनिष्ठं विवेष) अत्यन्त अधिक मात्रामें अन्न परोसता है और (पित्वः ररते) अन्नका दान करता है, (सः अस्य तोकं) वह अपने पुत्रका (शमीभिः पीपरत्) शुभ कर्मोंसे पालन करता रहेगा, और (सदमित्) हमेशा (अनूर्ध्व-भासः) बहुत कम तेजवालोंको (तुतुर्यात्) हिंसित करेगा।

❋

[१९६]

२९६ सम॒श्विनो॒रव॑सा॒ नूत॑नेन मयो॒भुवा॑ सु॒प्रणी॑ती गमेम ।
आ नो॑ र॒यिं व॑हत॒मोत वी॒राना विश्वा॑न्यमृ॒ता सौभ॑गानि ॥५॥

२९६ सम् । अ॒श्विनोः॑ । अव॑सा । नूत॑नेन ।
म॒यः॒ऽभुवा॑ । सु॒ऽप्रनी॑ती । ग॒मे॒म ॥
आ । न॒ः । र॒यिम् । व॒ह॒तम् । आ । उ॒त । वी॒रान् ।
आ । विश्वा॑नि । अ॒मृ॒ता । सौभ॑गानि ॥५॥

१९६ [इस मंत्रको २९१ पर देखो]

[१९७] (ऋ. ५।७८।१—९)

(१९७-३०५) सप्तवध्रिरात्रेयः । (५-९ गर्भस्राविण्युपनिषद्)। अनुष्टुप्, १-३ उष्णिक्, ४ त्रिष्टुप् ।

२९७ अश्वि॒ना॒वेह ग॑च्छ॒तं नास॑त्या॒ मा वि वे॑नतम् ।
हं॒सावि॑व पतत॒मा सु॒ताँ उप॑ ॥१॥

२९७ अश्वि॑ना । आ । इ॒ह । ग॒च्छ॒तम् ।
नास॑त्या । मा । वि । वे॒न॒तम् ॥
हं॒सौऽइ॑व । प॒त॒तम् । आ । सु॒तान् । उप॑ ॥१॥

१९७ अन्वयः— नासत्या अश्विना ! इह आ गच्छतं, मा वि वेनतं, सुतान् उप हंसौ इव आ पततम् ॥१॥

१९७ अर्थ— हे अश्विदेवो ! (इह आ गच्छतं) इधर आओ, (मा वि वेनतं) उदास न बनो (सुतान् उप) निचोडे हुए सोमरसोंके समीप (हंसौ इव आ पततं) हंसके तुल्य वेगपूर्वक आ जाओ ।

[१९८]

२९८ अश्वि॑ना हरि॒णावि॑व गौ॒रावि॒वानु॒ यव॑सम् ।
हं॒सावि॑व पतत॒मा सु॒ताँ उप॑ ॥२॥

२९८ अश्विना । हरिणौऽइव ।
गौरौऽइव । अनु । यवसम् ॥
हंसौऽइव । पततम् । आ । सुतान् । उप ॥२॥

२९८ अन्वयः- अश्विना! यवसं अनु हरिणौ इव गौरौ इव; सुतान् उप हंसौ इव आ पततम् ॥२॥

२९८ अर्थ- हे अश्विदेवो! (यवसं अनु) तृणके पीछे (हरिणौ इव) हिरनोंकी नाईं (गौरौ इव) गौरमृगके समान (सुतान् उप) निचोडे हुए सोमोंके पास (हंसौ इव आ पततं) हंसोंके समान जल्द आ गिरो।

[२९९]

२९९ अश्विना वाजिनीवसू जुषेथां यज्ञमिष्टये ।
हंसाविव पततमा सुताँ उप ॥३॥

२९९ अश्विना । वाजिनीवसू इति वाजिनीऽवसू ।
जुषेथाम् । यज्ञम् । इष्टये ॥
हंसौऽइव । पततम् । आ । सुतान् । उप ॥३॥

२९९ अन्वयः- वाजिनी-वसू अश्विना! इष्टये यज्ञं जुषेथां, हंसौ इव सुतान् उप आ पततम् ॥३॥

२९९ अर्थ- हे (वाजिनी-वसू) सेनाको बसानेवाले अश्विदेवो! (इष्टये) इष्टिके लिए (यज्ञं जुषेथां) यजन करो, और हंसोंके समान निचोडे हुए सोमोंके पास आ जाओ।

[३००]

३०० अत्रिर्यद् वामवरोहन्नृबीसमजोहवीन्नाधमानेव योषा ।
श्येनस्य चिज्जवसा नूतनेनाऽऽगच्छतमश्विना शंतमेन ॥४

३०० अत्रिः । यत् । वाम् । अवऽरोहन् । ऋबीसम् ।
अजोहवीत् । नाधमानाऽइव । योषा ॥
श्येनस्य । चित् । जवसा । नूतनेन । आ ।
अगच्छतम् । अश्विना । शम्ऽतमेन ॥४॥

३०० अन्वयः- अश्विना ! यत् ऋबीसं अवरोहन् अत्रिः नाधमाना योषा इव वां अजोहवीत्, शंतमेन श्येनस्य नूतनेन चित् जवसा आगच्छतम् ॥ ४ ॥

३०० अर्थ— हे अश्विदेवो ! (यत्) जब (ऋबीसं अवरोहन्) अँधेरेसे पूर्ण जलमें उतरते समय (अत्रिः नाधमाना योषा इव) अत्रिने याचना करती हुई नारीके समान (वां अजोहवीत्) तुम दोनोंको बुलाया, तब (शंतमेन) शांतिदायक (श्येनस्य नूतनेन जवसा चित्) बाज पंछीके नये वेगसेही (आगच्छतं) तुम दोनों आगये।

३०० भावार्थ— अत्रि ऋषिको जब कारागृहमें डाला गया, तब उसनें स्त्रीके समान मनोभावसे अश्विदेवोंकी प्रार्थना की। अश्विदेव शीघ्र आये और उन्होंने अत्रि ऋषिकी सहायता की।

[३०१]

३०१ वि जिहीष्व वनस्पते योनिः सूष्यन्त्या इव ।
श्रुतं मे अश्विना हवं सप्तवध्रिं च मुञ्चतम् ॥५॥

३०१ वि । जिहीष्व । वनस्पते ।
योनिः । सूष्यन्त्याःऽइव ॥
श्रुतम् । मे । अश्विना । हवम् ।
सप्तऽवध्रिम् । च । मुञ्चतम् ॥५॥

३०१ अन्वयः- वनस्पते ! सूष्यन्त्याः योनिः इव वि जिहीष्व, अश्विना ! मे हवं श्रुतं सप्तवध्रिं मुञ्चतं च ॥ ५ ॥

३०१ अर्थ- हे वनके अधिपति पेड ! (सूष्यन्त्याः योनिः इव) प्रसवोन्मुख नारीकी योनिके समान (वि जिहीष्व) खुला रह । हे अश्विदेवो! (मे हवं श्रुतं) मेरी पुकार सुन लो, (सप्तवध्रिं मुञ्चतं च) और सप्तवध्रिको मुक्त करो।

[३०२]

३०२ भीताय नाधमानाय ऋषये सप्तवध्रये ।
मायाभिरश्विना युवं वृक्षं सं च वि चाचथः ॥६॥

३०२ भीताय । नाधमानाय ।
ऋषये । सप्तऽवध्रये ॥
मायाभिः । अश्विना । युवम् ।
वृक्षम् । सम् । च । वि । च । अचथः ॥६॥

३०२ अन्वयः– अश्विना ! ऋषये सप्तवध्रये भीताय नाधमानाय मायाभिः युवं वृक्षं सं च वि च अचथः ॥ ६ ॥

३०२ अर्थ— हे अश्विदेवो ! ऋषि सप्तवध्रिको जोकि (भीताय नाधमानाय) भयभीत हो (सहायतार्थ) प्रार्थना कर रहा था, (मायाभिः) अपनी शक्तियोंसे (युवं) तुम दोनोंने (वृक्षं) पेड़को (सं च वि च) (अचथः) विदीर्ण कर दिया।

[३०३]

३०३ यथा वातः पुष्करिणीं समिङ्गयति सर्वतः ।
एवा ते गर्भ एजतु निरैतु दशमास्यः ॥७॥

३०३ यथा । वातः । पुष्करिणीम् ।
सम्ऽइङ्गयति । सर्वतः ॥
एव । ते । गर्भः । एजतु ।
निःऽऐतु । दशऽमास्यः ॥७॥

३०३ अन्वयः– पुष्करिणीं यथा वातः सर्वतः सं इङ्गयति, एव ते गर्भः दशमास्यः यजतु निः एतु ॥ ७ ॥

३०३ अर्थ– (पुष्करिणीं) तालाबको (यथा वातः) जैसे वायु (सर्वतः सं इङ्गयति) सभी ओरसे ठीक तरह हिलाता है, (एव) वैसेही (ते गर्भः) तेरा गर्भ (दशमास्यः) दस महिनेका होकर (एजतु) हलचल करना शुरु करदे और (निः एतु) बाहर निकल आये।

[३०४]

३०४ यथा वातो यथा वनं यथा समुद्र एजति ।
एवा त्वं दशमास्य सहावेहि जरायुणा ॥८॥

३०४ यथा । वातः । यथा । वनम् ।
यथा । समुद्रः । एजति ॥
एव । त्वम् । दशऽमास्य ।
सह । अव । इहि । जरायुणा ॥८॥

३०४ अन्वयः— यथा वातः यथा वनं, समुद्रः यथा एजति दशमास्य ! एव त्वं जरायुणा सह अव इहि ॥ ८ ॥

३०४ अर्थ— (यथा वातः) जैसे पवन हिलती है, (यथा वनं) जैसे जंगल हिलता डुलता है, (समुद्रः यथा एजति) समुन्दर जैसे चलायमान होता है, हे (दशमास्य) दस महिनोंके बने हुए गर्भ । (एव त्वं) उसी प्रकार तू (जरायुणा सह) वेष्टनके साथ (अव इहि) नीचे गिर जा ।

[३०५]

३०५ दश मासाञ्छशयानः कुमारो अधि मातरि ।
निरैतु जीवो अक्षतो जीवो जीवन्त्या अधि ॥९॥

३०५ दश । मासान् । शशयानः ।
कुमारः । अधि । मातरि ॥
निःऽऐतु । जीवः । अक्षतः ।
जीवः । जीवन्त्याः । अधि ॥९॥

३०५ अन्वयः— कुमारः दश मासान् मातरि अधि शयानः, अक्षतः जीवः निः एतु, जीवन्त्याः अधि जीवः ॥ ९ ॥

३०५ अर्थ- (कुमारः) बालक (दश मासान्) दस महिनौंतक (मातरि अधि शयानः) मातामें सोता हुआ (अक्षतः जीवः) बिना किसी क्षति या व्यथाके जीवित दशामें (निः एतु) बहार निकल आये (जीवन्त्याः अधि जीवः) माताके जीवित रहते यह जीव निकल आये ।

३०५ भावार्थ— ये तीन मंत्र सुख प्रसूतिके हैं । गर्भ दश महिनौंतक माताके गर्भाशयमें रहे और दसवें महिनेमें सुखसे प्रसूति हो । अश्विदेव वैद्य हैं वे इस सुखप्रसूतिके कर्ममें प्रवीण हैं ।

[३०६] (ऋ० ६।६२।१-११)

(३०६-३२७) बार्हस्पत्यो भरद्वाजः। त्रिष्टुप्।

३०६ स्तुषे नरा दिवो अस्य प्रसन्ताऽश्विना हुवे जरमाणो अर्कैः।
या सद्य उस्रा व्युषि ज्मो अन्तान्युयूषतः पर्युरू वरांसि १

३०६ स्तुषे। नरा। दिवः। अस्य। प्रऽसन्ता।
अश्विना। हुवे। जरमाणः। अर्कैः॥
या। सद्यः। उस्रा। विऽउषि। ज्मः। अन्तान्।
युयूषतः। परि। उरु। वरांसि ॥१॥

३०६ अन्वयः— दिवः नराः अस्य प्रसन्ता अश्विना अर्कैः जरमाणः हुवे स्तुषे; सद्यः उस्रा या व्युषि ज्मः अन्तान् उरु वरांसि परि युयूषतः ॥१॥

३०६ अर्थ— (दिवः नरा) द्युलोकके नेतावीरो! (अस्य प्रसन्ता अश्विना) इस दृश्यमान जगत्के प्रभु होते हुए अश्विदेवोंको (अर्कैः जरमाणः) अर्चनीय मंत्रोंसे प्रशंसित करता हुआ मैं (स्तुषे) स्तुति करता हूँ, (सद्यः उस्रा या) तुरन्त शत्रुओंको हटानेवाले ये दोनों देव (व्युषि) उषःकालमें (ज्मः अन्तान्) पृथ्वीके अन्ततक (उरु वरांसि) विशाल अँधेरेको (परि युयूषतः) हटा देते हैं॥

[३०७]

३०७ ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः।
पुरू वरांस्यमिता मिमानाऽपो धन्वान्यति याथो अज्रान् २

३०७ ता। यज्ञम्। आ। शुचिऽभिः। चक्रमाणा।
रथस्य। भानुम्। रुरुचुः। रजःऽभिः॥
पुरु। वरांसि। अमिता। मिमाना।
अपः। धन्वानि। अति। याथः। अज्रान् ॥२॥

३०७ अन्वयः- यज्ञं शुचिभिः ता आ चक्रमाणा, रजोभिः रथस्य भानुं रुरुचुः, अमिता पुरु वरांसि मिमाना धन्वानि अति अज्रान् अपः याथः ॥२॥

३०७ अर्थ— (यज्ञं शुचिभिः) यज्ञके प्रति निर्मल तेजोंके साथ आते हुए (ता) अश्विदेव (आ चक्रमाणा) आते समय (रजोभिः) तेजोंसे (रथस्य भानुं) रथकी दीप्तिको (रुरुचुः) उद्दीप्त करते हैं, (अमिता पुरु) असंख्य बहुतसे (वरांसि मिमाना) तेजोंको उत्पन्न करते हुए (धन्वानि अति) मरु-प्रदेशोंको पारकर (अज्रान् अपः याथः) घोडोंको जलोंके समीप ले चलते हैं॥

३०७ मानवधर्म- रथका प्रवास होनेपर घोडोंको समयपर जल देना चाहिये ।

[३०८]

३०८ ता ह॒ त्यद् व॒र्तिर्यदर॑ध्रमुग्रेत्था धियं॑ ऊहथुः शश्व॒दश्वैः॑ ।
मनो॒जवे॑भिरिषि॒रैः श॒यध्यै॒ परि॒ व्यथि॑र्दा॒शुषो॒ मर्त्य॑स्य॥३

३०८ ता । ह॒ । त्यत् । व॒र्तिः । यत् । अर॑ध्रम् । उ॒ग्रा ।
इ॒त्था । धियः॑ । ऊ॒ह॒थुः॒ । शश्व॑त् । अश्वैः॑ ॥
मनः॑ऽजवेभिः । इ॒षि॒रैः । श॒यध्यै॑ ।
परि॑ । व्यथिः॑ । दा॒शुषः॑ । मर्त्य॑स्य ॥३॥

३०८ अन्वयः— उग्रा ता ह यत् अरध्रं त्यत् वर्तिः इत्था मनोजवेभिः इषिरैः अश्वैः शश्वत् धियः ऊहथुः; दाशुषः मर्त्यस्य व्यथिः परि शयध्यै ॥३॥

३०८ अर्थ- (उग्रा ता ह) उग्र रूपवाले वे दोनोंही वीर (यत् अरध्रं) दरिद्रतासे युक्त भक्तके (त्यत् वर्तिः) घरके प्रति (इत्था) इस ढंगसे (मनोजवेभिः) मनके तुल्य वेगवान् (इषिरैः अश्वैः) इशारेसेही चलनेवाले घोडोंसे (शश्वत्) हमेशा (धियः ऊहथुः) कर्मोंको चलानेके लिये जाते हैं, और (दाशुषः मर्त्यस्य व्यथिः) दानी मानवको कष्ट पहुँचानेवालेको (परि शयध्यै) लंबी निद्रामें सुलाते हैं ॥

३०८ मानवधर्म— सत्कर्म करनेवाला गरीब भी हुआ तो भी उसको सहायता पहुंचाकर उसके यज्ञकर्मको सफल बनाना चाहिये और जो सज्जनोंको पीडा देते हैं उनको रोकना चाहिये ।

[३०९]

३०९ ता नव्य॑सो जर॑माणस्य मन्मोप॑ भूषतो युयुजानस॑प्ती ।
शुभं॑ पृक्षमिषमूर्जं॑ वह॑न्ता होता॑ यक्षत्प्रत्नो अध्रुग्युवा॑ना ॥४

३०९ ता । नव्य॑सः । जर॑माणस्य । मन्म॑ ।
उप॑ । भूषतः । युयुजानस॑प्ती इति॑ युयुजानऽस॑प्ती ॥
शुभ॑म् । पृक्ष॑म् । इष॑म् । ऊर्ज॑म् । वह॑न्ता ।
होता॑ । यक्षत् । प्रत्नः । अध्रुक् । युवा॑ना ॥४॥

३०९ अन्वयः- शुभं पृक्षं इषं ऊर्जं वहन्ता युयुजान-सप्ती ता नव्यसः जरमाणस्य मन्म उप भूषतः; अध्रुक् प्रत्नः होता युवाना यक्षत् ॥४॥

३०९ अर्थ— (शुभं पृक्षं) सुन्दर अन्न, (इषं ऊर्जं वहन्ता) पुष्टि तथा बल दूसरोंको पहुँचानेके लिए ढोते हुए (युयुजानसप्ती ता) घोडोंको जोतनेवाले वे दोनों (नव्यसः) नये (जरमाणस्य मन्म) स्तोताके मननीय स्तोत्रके (उप भूषतः) समीप जाकर उसकी शोभा बढाते हैं; (अध्रुक् प्रत्नः होता) द्रोह न करनेवाला पुराना हवनकर्ता (युवाना) युवक अश्विदेवोंकी (यक्षत्) पूजा करता है ॥

३०९ मानवधर्म— पुष्टि, बल और आरोग्य बढानेवाला अन्न प्राप्त करो। द्रोह न करो।

[३१०]

३१० ता वल्गू दस्रा पु॑रुशाक॑तमा प्रत्ना नव्य॑सा वच॑सा विवा॑से ।
या शंस॑ते स्तुवते शम्भ॑विष्ठा बभूवतु॑र्गृणते चित्ररा॑ती ॥५

३१० ता । वल्गू इति॑ । दस्रा । पुरुशाक॑ऽतमा ।
प्रत्ना । नव्य॑सा । वच॑सा । आ । विवासे ॥
या । शंस॑ते । स्तुवते । शम्ऽभ॑विष्ठा ।
बभूवतुः । गृणते । चित्ररा॑ती इति॑ चित्रऽरा॑ती ॥५॥

*

३१० अन्वयः- शंसते स्तुवते या शम्भविष्ठा गृणते चित्रराती बभूवतुः; ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा आ विवासे ॥५॥

३१० अर्थ— (शंसते) दूसरोंके सामने विस्तारसे वर्णन करनेवालेको (स्तुवते) स्तुति करनेवालेको (या) जो दो अश्विदेव (शम्भविष्ठा) अत्यन्त सुख देनेवाले और (गृणते चित्रराती बभूवतुः) स्तुति करनेवालेको अद्भुत दान देनेवाले हो चुके, (ता) उन दोनों (वल्गू) सुन्दर (दस्रा) शत्रु-विनाशकर्ता (पुरुशाकतमा) बहुत कार्य करनेकी शक्ति रखनेवाले (प्रत्ना) पुरातन अश्विदेवोंको (नव्यसा वचसा) नये स्तोत्रसे (आ विवासे) पूर्णतया सन्तुष्ट करता हूँ ॥

[३११]

३११ ता भुज्युं विभिरद्भ्यः समुद्रात्तुग्रस्य सूनुमूहथू रजोभिः।
अरेणुभिर्योजनेभिर्भुजन्ता पतत्रिभिरर्णसो निरुपस्थात्॥६

३११ ता। भुज्युम्। विऽभिः। अत्ऽभ्यः। समुद्रात्।
तुग्रस्य। सूनुम्। ऊहथुः। रजःऽभिः॥
अरेणुऽभिः। योजनेभिः। भुजन्ता।
पतत्रिऽभिः। अर्णसः। निः। उपऽस्थात्॥६॥

३११ अन्वयः- तुग्रस्य सूनुं भुज्युं भुजन्ता ता समुद्रस्य अर्णसः अद्भ्यः उपस्थात् अरेणुभिः रजोभिः योजनेभिः पतत्रिभिः विभिः निः ऊहथुः ॥६॥

३११ अर्थ- (तुग्रस्य पुत्रं भुज्युं) तुग्र नरेशके पुत्र भुज्युको (भुजन्ता ता) सुरक्षित रखनेवाले वे दोनों (समुद्रस्य अर्णसः) समुन्दरके विशाल चमकीले (अद्भ्यः उपस्थात्) जलसमूहोंके समीपसे (अरेणुभिः रजोभिः) धूलिरहित लोकोंसे (योजनेभिः) योजनाओंसे (पतत्रिभिः विभिः) उडनेवाले अतः पंछीतुल्य यानोंसे (निः ऊहथुः) पूर्णतया ले चले ॥

३११ भावार्थ— तुग्रपुत्र भुज्युको अश्विदेवोंने ऊपर उठाया और अपने विमानमें रखकर उसको सुरक्षित स्थानपर पहुँचाया।

[३१२]

१३२ वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः।
दशस्यन्ता शयवे पिप्यथुर्गामिति च्यवाना सुमतिं भुरण्यू ॥७॥

३१२ वि । जयुषा । रथ्या । यातम् । अद्रिम् ।
श्रुतम् । हवम् । वृषणा । वध्रिऽमत्याः ॥
दशस्यन्ता । शयवे । पिप्यथुः । गाम् ।
इति । च्यवाना । सुऽमतिम् । भुरण्यू इति ॥७॥

३१२ अन्वयः- वृषणा रथ्या ! जयुषा अद्रिं वि यातं, वध्रिमत्याः हवं श्रुतं; दशस्यन्ता शयवे गां पिप्यथुः इति सुमतिं च्यवाना भुरण्यू ॥७॥

३१२ अर्थ— हे (वृषणा ! रथ्या) बलवान् और रथपर चढनेहारे अश्वि-देवों ! (जयुषा) विजयी रथपरसे (अद्रिं वि यातं) पहाडको लाँघकर जाओ, (वध्रिमत्याः हवं) वध्रिमतीकी पुकारको (श्रुतं) सुन लो, (दशस्यन्ता) दान देते हुए तुम दोनोंने (शयवे गां पिप्यथुः) शयुके लिए गायको दुधारू बनाया, (इति) इस ढंगकी (सुमतिं च्यवाना) उत्तम बुद्धि रखनेवाले तुम दोनों सबके (भुरण्यू) भरणकर्ता हो ॥

३१२ भावार्थ— अश्विदेव बलिष्ठ और रथपर चढनेवाले हैं। विजयी रथपरसे वे पर्वतको भी लांघते हैं, वध्रिमतिकी प्रार्थना सुनते हैं, दान देते हैं, शयुके लिये गौको दुधारू बनाते हैं और उत्तम मंत्रणा देते हैं।

[३१३]

३१३ यद्रोदसी प्रदिवो अस्ति भूमा हेळो देवानामुत मर्त्यत्रा ।
तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात ॥८

३१३ यत् । रोदसी इति । प्रऽदिवः । अस्ति । भूम ।
हेळः । देवानाम् । उत । मर्त्यऽत्रा ॥
तत् । आदित्याः । वसवः । रुद्रियासः ।
रक्षःऽयुजे । तपुः । अघम् । दधात ॥८॥

३१३ अन्वयः- यत् देवानां उत मर्त्यत्रा प्रदिवः भूम हेळः अस्ति तत् तपुः अघं, आदित्याः ! वसवः ! रुद्रियासः ! रोदसी ! रक्षो युजे दधात ॥८॥

३१३ अर्थ- (यत्) जो (देवानां उत मर्त्यत्रा) देवोंका या मानवोंमें विद्यमान (प्रदिवः भूम) अत्यन्त तेजस्वी तथा बडा भारी (हेळः अस्ति)

क्रोध है (तत् तपुः अघं) वह तापक दुःख, हे अदितिके पुत्रो! वसुओ! रुद्रके पुत्रो! तथा द्यावापृथिवी! (रक्षो युजे) राक्षसोंके साथ रहनेवालेके लिए (दधात) रख दो, अर्थात् हमें उससे कोई कष्ट न मिले ॥

३१३ भावार्थ— दुष्टोंका नाश करनेके लियेही क्रोध करना योग्य है ।

[३१४]

३१४ य ईं राजा॑नावृतु॒था वि॒दध॒द्रज॑सो मि॒त्रो वरु॑ण॒श्चिके॑तत् ।
ग॒म्भी॒रा॒य॒ रक्ष॑से हे॒तिम॑स्य॒ द्रोघा॑य चि॒द्व॒ वच॑स॒ आन॑वाय ॥९॥

३१४ यः । ई॒म् । राजा॑नौ । ऋ॒तु॒ऽथा । वि॒ऽद॒धत् ।
रज॑सः । मि॒त्रः । वरु॑णः । चि॒के॑तत् ॥
ग॒म्भी॒राय॑ । रक्ष॑से । हे॒तिम् । अ॒स्य॒ ।
द्रोघा॑य । चि॒त् । वच॑से । आन॑वाय ॥९॥

३१४ अन्वयः— यः ईं रजसः राजानौ ऋतुथा विदधत्, मित्रः वरुणः चिकेतत्, अस्य हेतिं द्रोघाय आनवाय वचसे चित् गंभीराय रक्षसे ॥९॥

३१४ अर्थ— (यः ईं) जो इन (रजसः राजानौ) लोकोंके अधिपति अश्विदेवोंकी (ऋतुथा विदधत्) समयानुसार सेवा करता है, उसके उस कार्यको मित्र और वरुण (चिकेतत्) पहचानते हैं और वह (अस्य हेतिं) इसके आयुधको (द्रोघाय आनवाय वचसे चित्) द्रोह करनेवाले मानवके नाशके लिए और (गंभीराय रक्षसे) प्रबल राक्षसके लिए भी उपयोगमें लाता है ॥

३१४ भावार्थ— ईश्वरके भक्तका हथियार विद्रोही दुष्ट मानवके अथवा राक्षसके नाशके लिये बर्ता जाय ।

३१४ टिप्पणी-ऋतुथा = ऋतुके अनुकूल। हेतिः = हथियार। अनवः (अनुः = प्राणी तस्य) = प्राणी, मानव, असंस्कृत मानव ।

[३१५]

३१५ अन्त॑रैश्च॒क्रैस्तन॑याय व॒र्तिर्द्यु॒मता या॑तं नृ॒वता॒ रथे॑न ।
सनु॑त्येन॒ त्यज॑सा॒ मर्त्य॑स्य वनुष्य॒ताम॑पि शी॒र्षा व॑वृक्तम् ॥१०॥

३१५ अन्तरैः । चक्रैः । तनयाय । वर्तिः ।
द्युऽमता । आ । यातम् । नृऽवता । रथेन ॥
सनुत्येन । त्यजसा । मर्त्यस्य ।
वनुष्यताम् । अपि । शीर्षा । ववृक्तम् ॥१०॥

३१५ अन्वयः- अन्तरैः चक्रैः द्युमता नृवता रथेन तनयाय वर्तिः आ यातं; मर्त्यस्य वनुष्यतां शीर्षा सनुत्येन त्यजसा अपि ववृक्तम् ॥ १० ॥

३१५ अर्थ— (अन्तरैः चक्रैः) दूरतक जानेवाले पहियोंसे युक्त (द्युमता) प्रकाशमान (नृवता रथेन) मानवी वीरोंको ले जानेवाले रथपरसे (तनयाय) संतानको सुख देनेके लिए (वर्तिः आ यातं) घर आजाओ (मर्त्यस्य वनुष्यतां) मानवोंको कष्ट देनेवालेको (शीर्षा) सर (सनुत्येन त्यजसा) तिरस्करणीय क्रोधपूर्वक (अपि ववृक्तं) अलग कर डालो ॥

३१५ भावार्थ— मानवोंको दुःख देनेवालेको दूर करो । घरका पालन करो ।

[३१६]

३१६ आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् ।
दृळ्हस्य चिद् गोमतो वि व्रजस्य दुरो वर्तं गृणते चित्रराती ॥११॥

३१६ आ । परमाभिः । उत । मध्यमाभिः ।
नियुत्ऽभिः । यातम् । अवमाभिः । अर्वाक् ॥
दृळ्हस्य । चित् । गोऽमतः । वि । व्रजस्य ।
दुरः । वर्तम् । गृणते । चित्रराती इति चित्रऽराती ॥११

३१६ अन्वयः- परमाभिः मध्यमाभिः उत अवमाभिः नियुद्भिः अर्वाक् आ यातं; गृणते चित्रराती गोमतः व्रजस्य दृळ्हस्य चित् दुरः वि वर्तम् ॥११॥

३१६ अर्थ— (परमाभिः) अत्यन्त श्रेष्ठ, (मध्यमाभिः) मँझले दर्जेके (उत अवमाभिः) और निम्न श्रेणीके (नियुद्भिः) वाहनोंके साथ (अर्वाक् आ यातं) हमारे समीप आओ । (गृणते चित्रराती) स्तोताके लिए विचित्र दान देनेवाले तुम दोनों (दृळ्हस्य चित् गोमतः व्रजस्य) गौओंसे युक्त सुदृढ बाडेके (दुरः वि वर्तं) द्वार खोल दो ॥

३१६ भावार्थ— घरके पास गौओंके सुदृढ बाडे हों, उनमें बहुत गौवें रहें। ऐसे घरोंके पास वीर आजांय और उनके दूध पीनेके लिये उन बाडोंके द्वार खोले जाय।

[३१७] (ऋ. ६।६३।१—११)

त्रिष्टुप्, १ विराट्, ११ एकपदा त्रिष्टुप्।

३१७ क्व त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदन्नमस्वान्।
आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मन्मन् ॥१॥

३१७ क्व। त्या। वल्गू इति। पुरुऽहूता। अद्य।
दूतः। न। स्तोमः। अविदत्। नमस्वान् ॥
आ। यः। अर्वाक्। नासत्या। ववर्त।
प्रेष्ठा। हि। असथः। अस्य। मन्मन् ॥१॥

३१७ अन्वयः- त्या पुरुहूता वल्गू क्व? अद्य नमस्वान् स्तोमः दूतः न अविदत्; यः नासत्या अर्वाक् आ ववर्त, अस्य मन्मन् प्रेष्ठा हि असथः ॥ १ ॥

३१७ अर्थ- (त्या पुरुहूता) वे दोनों बहुतों द्वारा बुलाये हुए (वल्गू क्व) सुन्दर अश्विदेव कहाँ हैं? (अद्य) आजके दिन (नमस्वान् स्तोमः) नमनसे युक्त स्तोत्र (दूतः न) दूतके समान (अविदत्) उन्हें प्राप्त होगया, (यः) जो (नासत्या) अश्विदेवोंको (अर्वाक् आ ववर्त) हमारे सम्मुख आकर्षित कर चुका है; (अस्य मन्मन्) इसके मननीय काव्यमें तुम दोनों (प्रेष्ठा हि असथः) अत्यन्त रममाण हो जाओ ॥

[३१८]

३१८ अरं मे गन्तं हवनायास्मै गृणाना यथा पिबाथो अन्धः। परि ह त्यद् वर्तिर्याथो रिषो न यत् परो नान्तरस्तुतुर्यात् ॥२॥

३१८ अरम् । मे । गन्तम् । हवनाय । अस्मै ।
गृणाना । यथा । पिबाथः । अन्धः ॥
परि । ह । त्यत् । वर्तिः । याथः । रिषः ।
न । यत् । परः । न । अन्तरः । तुतुर्यात् ॥२॥

३१८ अन्वयः— अस्मै मे हवनाय अरं गन्तं, यथा गृणाना अन्धः पिबाथः, त्यत् वर्तिः ह रिषः परि याथः यत् न परः न अन्तरः तुतुर्यात् ॥२॥

३१८ अर्थ- (अस्मै मे) इस मेरे (हवनाय अरं गन्तं) बुलानेपर तुम दोनों ठीक तरह आओ, (यथा गृणाना) जैसे जैसे हम तुम्हारी प्रशंसा करते हैं, वैसे (अन्धः पिबाथः) सोमरसको पीते रहो; (त्यत् वर्तिः ह) उस घरको अवश्यही (रिषः परि याथः) हिंसक शत्रुसे बचाते रहो (यत्) जिस घरको (न परः) न दूसरा (न अन्तरः) न समीपका शत्रु (तुतुर्यात्) हिंसित करे ॥

३१८ भावार्थ— वीर हमारे घरपर आजांय, शत्रुसे उस घरकी सुरक्षा करें, और प्रशंसित होकर सोमरस पीयें और आनन्द प्रसन्न रहें।

[३१९]

३१९ अकारि वामन्धसो वरीमन्नस्तारि बर्हिः सुप्रायणतमम् ।
उत्तानहस्तो युवयुर्ववन्दा वां नक्षन्तो अद्रय आञ्जन् ॥३

३१९ अकारि । वाम् । अन्धसः । वरीमन् ।
अस्तारि । बर्हिः । सुप्रऽअयनतमम् ॥
उत्तानऽहस्तः । युवऽयुः । ववन्द ।
आ । वाम् । नक्षन्तः । अद्रयः । आञ्जन् ॥३॥

३१९ अन्वयः- वां अन्धसः वरीमन् अकारि, सुप्रायणतमं बर्हिः अस्तारि; युवयुः उत्तानहस्तः आ ववन्द, अद्रयः वां नक्षन्तः आञ्जन् ॥ ३ ॥

३१९ अर्थ- (वां) तुम दोनोंके लिए (अन्धसः वरीमन् अकारि) सोमको निचोड रखना अत्युत्कृष्ट स्थानमें किया गया है, (सुप्रायणतमं बर्हिः) अत्यन्त कोमल कुशासन तुम्हारे लिये (अस्तारि) फैलाकर रखा है; (युवयुः उत्तानहस्तः) तुम दोनोंको चाहनेवाला हाथ ऊपर उठाकर (आ ववन्द) नमन कर रहा है, (अद्रयः) पत्थर (वां नक्षन्तः) तुम दोनोंको रसपान करानेकी इच्छा करते हुए (आञ्जन्) सोमरसको निकाल चुके हैं। अर्थात् सोमवल्लीसे रस निकाल दिया है ॥

[३२०]

३२० ऊर्ध्वो वामग्निरध्वरेष्वस्थात्प्र रातिरेति जूर्णिनी घृताची ।
प्र होता गूर्तमना उराणोऽयुक्त यो नासत्या हवीमन् ॥४

३२० ऊर्ध्वः । वाम् । अग्निः । अध्वरेषु । अस्थात् ।
प्र । रातिः । एति । जूर्णिनी । घृताची ॥
प्र । होता । गूर्तऽमनाः । उराणः ।
अयुक्त । यः । नासत्या । हवीमन् ॥४॥

३२० अन्वयः— अध्वरेषु अग्निः वां ऊर्ध्वः अस्थात्; जूर्णिनी घृताची रातिः प्र एति । यः हवीमन् नासत्या अयुक्त प्र होता गूर्तमना उराणः ॥ ४ ॥

३२० अर्थ— (अध्वरेषु) हिंसारहित कार्योंमें अग्नि (वां) तुम दोनोंके लिए (ऊर्ध्वः अस्थात) ऊँचा हो खडा है, जल रहा है, (जूर्णिनी घृताची) गमनशील और घृतसे सिक्त (रातिः प्र एति) देन प्रकर्षसे आगे बढ रही है; (यः हवीमन्) जो हवी लेकर (नासत्या अयुक्त) अश्विदेवोंके लिये अन्नदान करता है, वह (प्र होता) अच्छा दानी (गूर्तमनाः) खूब मन लगाकर काम करनेवाला तथा (उराणः) विशाल मात्रामें कार्य करनेवाला बनता है ॥

[३२१]

३२१ अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिम् ।
प्र मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन्
यज्ञियानाम् ॥५॥

३२१ अधि । श्रिये । दुहिता । सूर्यस्य ।
रथम् । तस्थौ । पुरुऽभुजा । शतऽऊतिम् ॥
प्र । मायाभिः । मायिना । भूतम् । अत्र ।
नरा । नृतू इति । जनिमन् । यज्ञियानाम् ॥५॥

३२१ अनवः— पुरुभुजा ! शतोतिं रथं सूर्यस्य दुहिता श्रिये अधि तस्थौ । अत्र यज्ञियानां जनिमन् नृतू नरा मायिना मायाभिः प्र भूतम् ॥ ५ ॥

३२१ अर्थ— हे (पुरु-भुजा) बडे भुजावाले अश्विदेवों ! (शतोतिं रथं) सौ संरक्षणोंसे पूर्ण रथपर (सूर्यस्य दुहिता) सूर्यकी कन्या (श्रिये अधि तस्थौ) शोभाके लिए चढ गयी (अत्र यज्ञियानां जनिमन्) इधर पूजनीयोंके जन्मके अवसरपर आनन्दसे (नृतू) नृत्य करनेवाले (नरा) नेता (मायिना) कुशल अश्विदेव (मायाभिः प्रभूतं) अपनी अद्भुत शक्तियोंसे अत्यधिक प्रभवशाली बने ॥

[३२२]

३२२ युवं श्रीभिर्दर्शताभिराभिः शुभे पुष्टिमूहथुः सूर्यायाः ।
प्र वां वयो वपुषेऽनु पप्तन्नक्षद्वाणी सुष्टुता धिष्ण्या वाम् ॥ ६

३२२ युवम् । श्रीभिः । दर्शताभिः । आभिः ।
शुभे । पुष्टिम् । ऊहथुः । सूर्यायाः ॥
प्र । वाम् । वयः । वपुषे । अनु । पप्तन् ।
नक्षत् । वाणी । सुऽस्तुता । धिष्ण्या । वाम् ॥ ६ ॥

३२२ अन्वयः— धिष्णा ! युवं आभिः दर्शताभिः श्रीभिः सूर्यायाः शुभे पुष्टिं ऊहथुः; वां वपुषे अनु वयः प्र पप्तन्, सुष्टुता वाणी वां नक्षत् ॥ ६ ॥

३२२ अर्थ— हे (धिष्ण्या) प्रशंसनीय अश्विदेवो ! (युवं) तुम दोनों (आभिः) इन (दर्शताभिः श्रीभिः) सुन्दर शोभाओंके साथ (सूर्यायाः शुभे) सूर्याके कल्याणके लिए (पुष्टिं ऊहथुः) पुष्टिको साथ रखते हो, तथा (वां वपुषे) तुम्हारे शरीरकी पुष्टिके लिये (अनु वयः प्र पप्तन्) अनुकूल अन्न तुम्हें प्राप्त होता है । और (सुष्टुता वाणी) अच्छी स्तुतिकी वाणी भी (वां नक्षत्) तुम दोनोंको प्राप्त होती है ॥

[३२३]

३२३ आ वां वयोऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहन्तु ।
प्र वां रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः ॥ ७

❀

३२३ आ । वाम् । वयः । अश्वासः । वहिष्ठाः ।
अभि । प्रयः । नासत्या । वहन्तु ॥
प्र । वाम् । रथः । मनःऽजवाः । असर्जि ।
इषः । पृक्षः । इषिधः ।अनु । पूर्वीः ॥७॥

३२३ अन्वयः— नासत्या ! वहिष्ठाः वयः अश्वासः प्रयः अभि वां आ वहन्तु; वां मनोजवा रथः पूर्वीः पृक्षः इषिधः इषः अनु प्र असर्जि ॥ ७ ॥

३२३ अर्थ— (नासत्या) हे सत्यपालक अश्विदेवो ! (वहिष्ठाः वयः) अत्यन्त ढोनेवाले, गतिशील (अश्वासः) घोडे (प्रयः अभि) अन्न (वां आ वहन्तु) तुम दोनोंके समीप ले आयँ। (वां मनोजवा रथः) तुम दोनोंका मनके तुल्य वेगवान् रथ (पूर्वीः पृक्षः) बहुतसी पुष्टिकारक (इषिधः इषः) चाहनेयोग्य अन्न सामग्रियोंको (अनु प्र असर्जि) विशेष रीतिसे लाकर रखता है ॥

[३२४]

३२४ पुरु हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसंक्राम् ।
स्तुतश्च वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु रातिमग्मन्

३२४ पुरु । हि । वाम् । पुरुऽभुजा । देष्णम् ।
धेनुम् । नः । इषम् । पिन्वतम् । असंक्राम् ॥
स्तुतः । च । वाम् । माध्वी इति । सुऽस्तुतिः । च ।
रसाः । च । ये । वाम् । अनु । रातिम् । अग्मन् ॥८॥

३२४ अन्वयः— पुरुभुजा ! वां देष्णं हि पुरु, नः धेनुं पिन्वतं, असक्रां इषं; माध्वी वां स्तुतः च सुष्टुतिः च रसाः च ये वां रातिं अनु अग्मन् ॥८॥

३२४ अर्थ— हे (पुरुभुजा) बडे भुजावाले अश्विदेवो ! (वां देष्णं हि) तुम दोनोंका दान तो (पुरु) बहुत होता है, तुमने (नः धेनुं) हमारे लिए गाय दी है, (असक्रां इषं पिन्वतं) दूसरेके पास न जानेवाली अन्न सामग्रीको यथेष्ट दी है। (वां) तुम दोनोंकी (स्तुतः च माध्वी सुष्टुतिः च रसाः च), अच्छी स्तुति तथा सोमरस भी तैयार रखे हैं, (ये) जो (वां रातिं) तुम दोनोंकी देनको (अनु अग्मन्) अनुकूल रहते हैं ॥

३२४ टिप्पणी-अ-सक्रा = दूसरी जगह संक्रमण न होनेवाली, एक जगह सुस्थिर रहनेवाली ।

[३२५]

३२५ उत मे ऋज्रे पुरयस्य रघ्वी सुमीळ्हे शतं पेरुके च पक्का। शाण्डो दाद्धिरणिनः स्मदिष्टीन् दश वशासो अभिषाचं ऋष्वान् ॥९॥

३२५ उत । मे । ऋज्रे इति । पुरयस्य । रघ्वी इति । सुऽमीळ्हे । शतम् । पेरुके । च । पक्का ॥ शाण्डः । दात् । हिरणिनः । स्मत्ऽदिष्टीन् । दश । वशासः । अभिऽसाचः । ऋष्वान् ॥९॥

३२५ अन्वयः— उत पुरयस्य रघ्वी ऋज्रे सुमीळहे शतं पेरुके च पक्वा हिरणिनः स्मद्दिष्टीन् ऋष्वान् अभिसाचः दश वशासः शाण्डः मे दात् ॥ ९ ॥

३२५ अर्थ- (उत पुरयस्य) पुरयकी (रघ्वी ऋज्रे) शीघ्र जानेवाली, घोडियाँ (सुमीळहे शतं) सुमीळह नरेशमें विद्यमान सौ गायें और (पेरुके च पक्वा) पेरुकके घर पाये जानेवाले पके फल (हिरणिनः) सुवर्णभूषण धारण करनेवाले (स्मद्दिष्टीन्) सुन्दररूपवाले, (ऋष्वान्) दर्शनीय (अभिसाचः) शत्रुके पराभवकर्ता (दश वशासः) दस आज्ञानुवर्ती सेवकोंको (शाण्डः मे दात्) शांडने मुझे देदी ॥

३२५ भावार्थ- [यहां दानका वर्णन है।]

[३२६]

३२६ सं वां शता नासत्या सहस्राऽश्वानां पुरुपन्था गिरे दात्। भरद्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः ॥१०॥

३२६ सम् । वाम् । शता । नासत्या । सहस्रा ।
अश्वानाम् । पुरुऽपन्थाः । गिरे । दात् ॥
भरत्ऽवाजाय । वीर । नु । गिरे । दात् ।
हता । रक्षांसि । पुरुऽदंससा । स्युरिति स्युः ॥१०॥

३२६ अन्वयः- नासत्या ! वां गिरे पुरुपन्था अश्वानां शता सहस्रा सं दात; पुरुदंससा ! वीर ! भरद्वाजाय गिरे नु दात्, रक्षांसि हताः स्युः ॥ १० ॥

३२६ अर्थ- हे सत्यपालक अश्विदेवो ! (वां गिरे) तुम्हारे स्तोता मुझको पुरुपन्था नरेशने (अश्वानां शता सहस्रा) सैकडों हजारों घोडे (सं दात्) दिये; हे (पुरुदंससा) बहुत कार्य करनेवाले वीर अश्विदेवो (भरद्वाजाय गिरे) मुझ भरद्वाजको (नु) अभी यह दान (दात्) दिया है, अब (रक्षांसि हताः स्युः) राक्षस मारेही गये होंगे ।।

[३२७]

३२७ आ वां सुम्ने वरिमन्त्सूरिभिः ष्याम् ॥११॥

३२७ आ । वाम् । सुम्ने । वरिमन् । सूरिऽभिः । स्याम्॥११

३२७ अन्वयः- वां वरिमन् सुम्ने सूरिभिः आ स्याम् ।
३२७ अर्थ- तुम दोनोंके दिये श्रेष्ठ सुखमें विद्वानोंके साथ मैं रहूँ ॥

[३२८] (ऋ० ७।६७।१-१०)
(३२८-३८३) मैत्रावरुणिर्वसिष्ठः । त्रिष्टुप् ।

३२८ प्रति वां रथं नृपती जरध्यै हविष्मता मनसा यज्ञियेन ।
यो वां दूतो न धिष्ण्यावजीगरच्छा सूनुर्न पितरा
विवक्मि ॥१॥

३२८ प्रति । वाम् । रथम् । नृपती इति नृऽपती । जरध्यै ।
हविष्मता । मनसा । यज्ञियेन ॥
यः । वाम् । दूतः । न । धिष्ण्यौ । अजीगः ।
अच्छ । सूनुः । न । पितरा । विवक्मि ॥१॥

३१८ अन्वयः— नृपती धिष्ण्यौ ! यज्ञियेन हविष्मता मनसा वां रथं प्रति जरध्यै; यः वां दूतः न अजीगः, सूनुः पितरा न अच्छ विवक्मि ॥ १ ॥

३१८ अर्थ- हे (नृपती धिष्ण्यौ) जनताके पालक एवं बुद्धिमान् अश्विदेवो ! (यज्ञियेन) पवित्र तथा (हविष्मता मनसा) अन्नके साथ मननपूर्वक आनेवाले (वां रथं प्रति) तुम्हारे रथकी (जरध्यै) स्तुति करनेके लिए, (यः) जो (वां) तुम्हें (दूतः न) दूतके समान (अजीगः) जगा चुका है ऐसा मैं, (सूनुः पितरा न) पुत्र मातापिताके सामने जैसे खड़ा रहता है, उसी प्रकार, (अच्छ विवक्मि) तुम्हारे सम्मुख विशेष रीतिसे भाषण करता हूँ ॥

[३१९]

३१९ अशो॑च्य॒ग्निः स॑मिधा॒नो अ॒स्मे उपो॑ अदृश्र॒न्तम॑सश्चि॒दन्ताः॑ ।
अचे॑ति के॒तुरु॒षसः॑ पु॒रस्ता॑च्छ्रि॒ये दि॒वो दु॑हि॒तुर्जाय॑मानः ॥ २

३१९ अशो॑चि । अ॒ग्निः । स॒म्ऽइ॒धा॒नः । अ॒स्मे इति॑ ।
उपो॒ इति॑ । अ॒दृ॒श्र॒न् । तम॑सः । चि॒त् । अन्ताः॑ ॥
अचे॑ति । के॒तुः । उ॒षसः॑ । पु॒रस्ता॑त् ।
श्रि॒ये । दि॒वः । दु॒हि॒तुः । जाय॑मानः ॥ २ ॥

३१९ अन्वयः— अस्मे समिधानः अग्निः अशोचि, तमसः अन्ताः चित् उप अदृश्रन्; दिवः दुहितुः उषसः पुरस्तात् जायमानः केतुः श्रिये अचेति ॥ २ ॥

३१९ अर्थ- (अस्मे समिधानः) हमारे लिए भलीभाँति प्रज्वलित होता हुआ (अग्निः अशोचि) अग्नि जगमगा रहा है, (तमसः अन्ताः चित्) अंधकारके अंतिम विभाग भी (उप अदृश्रन्) दिखाई देने लगे हैं; अर्थात् अन्धकार नष्ट हो रहा है, (दिवः दुहितुः उषसः) द्युलोककी कन्या उषाके (पुरस्तात्) सामने (जायमानः) प्रकट होता हुआ (केतुः) ध्वजरूप सूर्य (श्रिये अचेति) शोभाके लिए प्रकटरूपसे ज्ञात हुआ है ।

३१९ भावार्थ— अग्नि प्रदीप्त हो गया है, उसके प्रकाशसे अन्धकार नष्ट होता है, उषा प्रकट हो गयी है, उसका सूर्यरूपी ध्वज फहरने लगा है ।

[३३०]

३३० अभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति नासत्या विवक्वान् । पूर्वीभिर्यातं पथ्याभिरर्वाक्स्वर्विदा वसुमता रथेन ॥३॥

३३० अभि । वाम् । नूनम् । अश्विना । सुऽहोता । स्तोमैः । सिसक्ति । नासत्या । विवक्वान् ॥ पूर्वीभिः । यातम् । पथ्याभिः । अर्वाक् । स्वःऽविदा । वसुऽमता । रथेन ॥३॥

३३० अन्वयः- नासत्या अश्विना ! विवक्वान् सुहोता वां अभि नूनं स्तोमैः सिसक्ति; वसुमता स्वःविदा रथेन पूर्वीभिः पथ्याभिः यातम् ॥३॥

३३० अर्थ— हे सत्यपालक अश्विदेवो ! (विवक्वान् सुहोता) विशेष ढंगसे बुलानेवाला (वां अभि) तुम्हारे सामने (नूनं स्तोमैः सिसक्ति) अब यज्ञोंसे सेवा करता है; (वसुमता स्वःविदा रथेन) धनसे युक्त और प्रकाशको देनेवाले रथपरसे (पूर्वीभिः पथ्याभिः) पहलेसे विख्यात मार्गोंसेही (यातं) तुम आगे बढो ॥

३३० भावार्थ- यज्ञोंसे जनताकी सेवा करो। धनका बंटवारा करते हुए प्रसिद्ध प्राचीन यज्ञके मार्गोंसे उन्नतिके पथपर आक्रमण करो।

[३३१]

३३१ अवोर्वां नूनमश्विना युवाकुर्हुवे यद् वां सुते माध्वी वसूयुः । आ वां वहन्तु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता मधूनि ॥४॥

३३१ अवोः । वाम् । नूनम् । अश्विना । युवाकुः । हुवे । यत् । वाम् । सुते । माध्वी इति । वसुऽयुः ॥ आ । वाम् । वहन्तु । स्थविरासः । अश्वाः । पिबाथः । अस्मे इति । सुऽसुता । मधूनि ॥४॥

३३१ अन्वयः- माध्वी अश्विना ! नूनं अवोः वां युवाकुः, यत् वसूयुः सुते वां हुवे स्थविरासः अश्वाः वां आ वहन्तु, अस्मे सुसुता मधूनि पिबाथः ।। ४ ।।

३३१ अर्थ- हे (माध्वी अश्विना) मधुरभाषी अश्विदेवों ! (नूनं अवोः वां) सचमुच तुम रक्षणकर्ताओंके साथ (युवाकुः) संबंध रखनेवाला मैं (यत्) अब (वसूयुः) धनकी कामना करता हुआ (सुते वां हुवे) इस सोमयागमें तुम्हें बुलाता हूँ, तुम्हारे (स्थविरासः अश्वाः) वृद्ध घोडे (वां आ वहन्तु) तुम्हें इधर ले आयें, और (अस्मे) हमारे बनाये (सुसुताः मधूनि पिबाथः) भलीभाँति निचोडे हुए मीठे सोमरसोंका पान करो ॥

३३१ भावार्थ— मधुर भाषण करो। संरक्षण करनेवालोंके साथ रहो और धनको प्राप्त करनेका यत्न करो। मीठा सोमरस पीओ।

[३३२]

३३२ प्राचीमु देवाऽश्विना धियं मेऽमृध्रां सातये कृतं वसूयुम् ।
विश्वा अविष्टं वाज आ पुरंधीस्ता नः शक्तं शचीपती
शचीभिः ॥५॥

३३२ प्राचीम् । ऊँ इति । देवा । अश्विना । धियम् । मे ।
अमृध्राम् । सातये । कृतम् । वसुऽयुम् ॥
विश्वाः । अविष्टम् । वाजे । आ । पुरम्ऽधीः । ता ।
नः । शक्तम् । शचीपती इति शचीऽपती । शचीभिः॥५॥

३३२ -अन्वयः- शचीपती देवा अश्विना ! मे वसूयुं अमृध्रां प्राचीं धियं सातये कृतं; वाजे विश्वाः पुरन्धीः आ अविष्टं, ता शचीभिः नः शक्तम् ॥ ५ ॥

३३२ अर्थ- हे (शचीपती) शक्तियोंके अधिपति (देवा) देवो ! (मे वसूयुं) मेरी धनकी कामना करनेहारी (अमृध्रां प्राचीं धियं) अहिंसित सरल बुद्धिको (सातये) धनप्राप्तिके लिए योग्य (कृतं) बना दो, (वाजे) युद्धमें (विश्वाः पुरन्धीः) सभी बुद्धियोंका (आ अविष्टं) पूर्णतया पालन करो, (ता) तुम दोनों (शचीभिः) अपनी शक्तियोंसे (नः शक्तं) हमें सामर्थ्यवान् बना दो ॥

३३२ भावार्थ- अपनी शक्ति बढाओ। धन प्राप्त करो, बुद्धिको बढाओ, युद्धमें अपनी सुरक्षाकी शक्ति प्राप्त करो। अपनी शक्तियां बढाकर सामर्थ्यवान् बनो।

[३३३]

३३३ अविष्टं धीष्वश्विना न आसु प्रजावद्रेतो अह्रयं नो अस्तु ।
आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥

३३३ अविष्टम् । धीषु । अश्विना । नः । आसु ।
प्रजाऽवत् । रेतः । अह्रयम् । नः । अस्तु ॥
आ । वाम् । तोके । तनये । तूतुजानाः ।
सुऽरत्नासः । देवऽवीतिम् । गमेम ॥६॥

३३३ अन्वयः- अश्विना ! आसु धीषु नः अविष्टं, नः प्रजावत् रेतः अह्रयं अस्तु; वां तोके तनये तूतुजानाः सुरत्नासः देववीतिं आ गमेम ॥ ६ ॥

३३३ अर्थ- हे अश्विदेवों ! (आसु धीषु) इन बुद्धियोंमें या कर्मोंमें (नः अविष्टं) हमें सुरक्षित रखो, (नः प्रजावत् रेतः) हमारा सुसन्तान उत्पन्न करनेमें समर्थ-वीर्य (अह्रयं अस्तु) अक्षीण रहे; (वां) तुम्हें (तोके तनये तूतुजानाः) पुत्रपौत्रोंके सुखसंवर्धनके बारेमें त्वरा करनेके लिए प्रवृत्त करते हुए (सुरत्नासः) अच्छे रत्न धारण करके हम (देववीतिं आ गमेम) देवोंकी पवित्रताको प्राप्त करें ॥

३३३ भावार्थ— शुभ कर्मोंको करते हुए हम सुरक्षित रहें । सुसन्तान उत्पन्न करनेवाला वीर्य हमारे अन्दर बढे । पुत्रपौत्रोंका हित करनेकी त्वरा करो । हम अच्छे वस्त्रालंकार धारण करके देवोंके सन्निध पहुंचें ।

३३३ मानवधर्म- शुभ कर्म करो और अपनी सुरक्षा करनेकी शक्ति प्राप्त करो । अपना वीर्य ऐसा शुभ संस्कारसंपन्न करो कि जिससे उत्तम संतान उत्पन्न हो सकें । पुत्रपौत्रोंको शुभ संस्कारसंपन्न करो । अच्छे वस्त्रालंकार धारण करके दिव्य विबुधोंके पास जाकर उनके जैसे दिव्य भाव धारण करो ।

[३३४]

३३४ एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे ।
अहेळता मनसा यातमर्वागश्नन्ता हव्यं मानुषीषु विक्षु ॥७

३३४ एषः । स्यः । वाम् । पूर्वगत्वाऽइव । सख्ये ।
निऽधिः । हितः । माध्वी इति । रातः । अस्मे इति ॥
अहेळता । मनसा । आ । यातम् । अर्वाक् ।
अश्नन्ता । हव्यम् । मानुषीषु । विक्षु ॥७॥

३३४ अन्वयः- माध्वी ! अस्मे रातः एषः स्यः निधिः वां सख्ये पूर्वगत्वा इव निहितः; मानुषीषु विक्षु हव्यं अश्नन्ता अहेळता मनसा अर्वाक् आ यातम् ॥ ७ ॥

३३४ अर्थ- हे (माध्वी) मधुर भाषणकर्ता अश्विदेवों ! (अस्मे रातः) हमने दिया हुआ (एषः स्यः निधिः) यह वह भाण्डार (वां सख्ये) तुम्हारी मित्रताके लिए (पूर्वगत्वा इव हितः) अग्रगन्ताके समान आगे रखा है; (मानुषीषु विक्षु) मानवी प्रजाओंमें (हव्यं अश्नन्ता) अन्नभागका सेवन करते हुए तुम (अहेळता मनसा) क्रोधरहित मनसे (अर्वाक् आ यातम्) हमारे पास आओ ॥

[३३५]

३३५ एकस्मिन् योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात् । न वायन्ति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥८॥

३३५ एकस्मिन् । योगे । भुरणा । समाने ।
परि । वाम् । सप्त । स्रवतः । रथः । गात् ॥
न । वायन्ति । सुऽभ्वः । देवऽयुक्ताः ।
ये । वाम् । धूःऽसु । तरणयः । वहन्ति ॥८॥

३३५ अन्वयः— भुरणा ! एकस्मिन् समाने योगे वां रथः सप्त स्रवतः परि गात्; ये तरणयः धूर्षु वां वहन्ति सुभ्वः देवयुक्ताः न वायन्ति ॥ ८ ॥

३३५ अर्थ- हे (भुरणा) भरण करनेवाले अश्विदेवों ! (एकस्मिन् समाने योगे) एक समान अवसरपर (वां रथः) तुम्हारा रथ (सप्त स्रवतः) सात बहनेवाले स्रोतोंके भी (परि गात्) आगे बढ जाता है, (ये तरणयः) जो तारण करनेवाले घोडे (धूर्षु वां वहन्ति) धुराओंमें तुम्हें ढोते हैं, वे (सुभ्वः) उत्कृष्ट ढंगसे उत्पन्न (देवयुक्ताः) देवोंके जोते हुए होनेके कारण (न वायन्ति) नहीं थकते हैं ॥

[३३६]

३३६ असश्चता मघवंद्भ्यो हि भूतं ये राया मंघदेयं जुनन्ति
प्र ये बन्धुं सूनृताभिस्तिरन्ते गव्या पृञ्चन्तो अश्व्या मघानि ॥९॥

३३६ असश्चता । मघवंत्ऽभ्यः । हि । भूतम् ।
ये । राया । मघऽदेयम् । जुनन्ति ॥
प्र । ये । बन्धुम् । सूनृताभिः । तिरन्ते ।
गव्या । पृञ्चन्तः । अश्व्या । मघानि ॥९॥

३३६ अन्वयः- ये गव्या अश्व्या मघानि पृञ्चन्तः बन्धुं सूनृताभिः प्र तिरन्ते राया मघदेयं जुनन्ति, मघवद्भ्यः असश्चता हि भूतम् ॥ ९ ॥

३३६ अर्थ— (ये) जो (गव्या अश्व्या) गायों तथा घोडोंसे पूर्ण (मघानि पृञ्चन्तः) ऐश्वर्योंका दान करते हुए (बन्धुं) बन्धुको (सूनृताभिः प्र तिरन्ते) सच्ची वाणियोंसे दान देते हैं और (राया) धनसे युक्त होकर (मघदेयं जुनन्ति) धनके देनेको प्रेरित करते हैं, ऐसे उन (मघवद्भ्यः) वैभवशाली लोगोंके लिए (असश्चता हि भूतं) दूसरी जगह न जानेवाले बनो ॥

३३६ भावार्थ— गायों, घोडों और धनोंका दान करो। धनोंका दान करते हुए शुभ भाषण करो। योग्य रीतिसे दान करनेवाले दाताओंके पासही पहुंचो।

[३३७]

३३७ नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत्।
धत्तं रत्नानि जरतं च सूरीन्यूयं पात स्वस्तिभिः सदा नः॥

३३७ नु । मे । हवम् । आ । शृणुतम् । युवाना ।
यासिष्टम् । वर्तिः । अश्विना । इराऽवत् ॥
धत्तम् । रत्नानि । जरतम् । च । सूरीन् ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥१०॥

३३७ अन्वयः- युवाना अश्विनौ ! मे हवं नु आ शृणुतं, इरावत् वर्तिः यासिष्टं, रत्नानि धत्तं सूरीन् जरतं च, स्वस्तिभिः यूयं नः सदा पात ॥ १० ॥

३३७ अर्थ- हे (युवाना अश्विनौ) युवक अश्विदेवों! (मे हवं) मेरी पुकार (नु आ शृणुतं) अब सुन लो, (इरावत् वर्तिः यासिष्टं) अन्नयुक्त घरतक चले जाओ, (रत्नानि धत्तं) रत्नोंको अपने पास धारण करो, (सूरीन् जरतं च) विद्वानोंकी सराहना करो, (स्वस्तिभिः यूयं) हितकारक उपायोंसे तुम (नः सदा पात) हमें हमेशा सुरक्षित रखो ॥

३३७ भावार्थ— जो पुकार करता है उसकी बातको सुनो। जिस घरमें पर्याप्त अन्न है और जो दाता है, वहीं जाओ। स्वयं रत्नोंका धारण करो और रत्नोंका दान करो। सच्चे ज्ञानियोंकीही प्रशंसा करो। कल्याणकारक साधनोंसे सबकी सुरक्षा करो।

[३३८] (ऋ. ७।६८।१—९) विराट्, ८–९ त्रिष्टुप्।

३३८ आ शुभ्रा यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा
युवाकोः। हव्यानि च प्रतिभृता वीतं नः ॥१॥

३३८ आ। शुभ्रा। यातम्। अश्विना। सुऽअश्वा।
गिरः। दस्रा। जुजुषाणा। युवाकोः॥
हव्यानि। च। प्रतिऽभृता। वीतम्। नः ॥१॥

३३८ अन्वयः- शुभ्रा! स्वश्वा! दस्रा अश्विना! युवाकोः गिरः जुजुषाणा आ यातं, नः प्रतिभृता हव्यानि च वीतम्। ॥ १ ॥

३३८ अर्थ— हे (शुभ्रा! स्वश्वा) श्वेतवर्णवाले और अच्छे घोडे रखनेवाले (दस्रा) शत्रुविनाशक अश्विदेवों! (युवाकोः गिरः) तुम्हारी सेवा करनेवालेके भाषणोंको (जुजुषाणा) आदरपूर्वक स्वीकार करते हुए (आ यातं) आओ, (नः प्रतिभृता) हमारे इकट्ठे किये हुए (हव्यानि च वीतं) हविर्भागोंका सेवन करो॥

[३३९]

३३९ प्र वामन्धांसि मद्यान्यस्थुररं गन्तं हविषो वीतये मे।
तिरो अर्यो हवनानि श्रुतं नः ॥२॥

३३९ प्र । वाम् । अन्धांसि । मद्यानि । अस्थुः ।
अरम् । गन्तम् । हविषः । वीतये । मे ॥
तिरः । अर्यः । हवनानि । श्रुतम् । नः ॥२॥

३३९ अन्वयः— वां मद्यानि अन्धांसि प्र अस्थुः, मे हविषः वीतये अरं गन्तं, अर्यः तिरः नः हवनानि श्रुतम् ॥ २ ॥

३३९ अर्थ— (वां मद्यानि) तुम्हारे लिए आनन्ददायक (अन्धांसि प्र अस्थुः) अन्न रखे गये हैं । (मे हविषः वीतये) मेरे हविके आस्वादनके लिए (अरं गन्तं) सीधे यहां आगमन करो, (अर्यः तिरः) शत्रुओंको हटाकर, (नः हवनानि श्रुतं) हमारे बुलावोंको सुन लो ॥

३३९ भावार्थ— हर्षवर्धक अन्नोंका सेवन करो और शत्रुओंको हटा दो ।

[३४०]

३४० प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शतोतिः ।
अस्मभ्यं सूर्यावसू इयानः ॥३॥

३४० प्र । वाम् । रथः । मनःऽजवाः । इयर्ति ।
तिरः । रजांसि । अश्विना । शतऽऊतिः ॥
अस्मभ्यम् । सूर्यावसू इति । इयानः ॥३॥

३४० अन्वयः— सूर्यावसू अश्विना ! वां मनोजवाः रथः शतोतिः अस्मभ्यं इयानः रजांसि तिरः प्र इयर्ति ॥ ३ ॥

३४० अर्थ— हे (सूर्यावसू) सूर्याको वसानेवाले अश्विदेवों ! (वां) तुम्हारा (मनोजवाः) मनके तुल्य वेगवान् रथ (शतोतिः) सैकडों संरक्षणोंसे सुरक्षित होकर (अस्मभ्यं इयानः) हमारे पास आता हुआ (रजांसि तिरः प्र इयर्ति) धूलिके प्रदेशोंको पार करके प्रकर्षसे समीप आता है ॥

३४० भावार्थ— वेगवान् रथमें विराजो और उसकी सुरक्षा सैकडों प्रकारोंसे करो ।

[३४१]

३४१ अयं ह यद्वां देवया उ अद्रिरूर्ध्वो विवक्ति सोमसुद् युवभ्याम् । आ वल्गू विप्रो ववृतीत हव्यैः ॥४॥

३४१ अ॒यम् । ह॒ । यत् । वा॒म् । दे॒व॒ऽया: । ऊँ इति॑ । अद्रि॑: ।
ऊ॒र्ध्वः । विव॑क्ति । सो॒म॒ऽसुत् । यु॒वऽभ्या॑म् ॥
आ । व॒ल्गू इति॑ । विप्र॑: । व॒वृ॒तीत॒ । ह॒व्यैः ॥४॥

३४१ अन्वयः— अयं सोमसुत् अद्रिः ह यत् ऊर्ध्वः देवया वां उ युवभ्यां विवक्ति; विप्रः वल्गू हव्यैः आ ववृतीत ॥ ४ ॥

३४१अर्थ— (अयं सोमसुत्) यह सोमरस निचोडनेवाला (अद्रिः ह) पत्थर (यत्) जब (ऊर्ध्वः देवया) ऊँचे पदपर [सोमपर] आरूढ होकर देवोंकी ओर प्रवृत्त हो (वां उ) तुम दोनोंकोही लक्ष्यमें रखकर (युवभ्यां विवक्ति) तुम दोनोंका ध्यान आकर्षित करनेके लिए विशेष रूपसे [सोम कूटनेका] शब्द करता है, तब (विप्रः) ज्ञानी याजक, (वल्गू) सुन्दर रूपवाले तुम्हें (हव्यैः आ ववृतीत) हवनीय अन्नोंसे अपनी ओर आकर्षित करता है ॥

३४१ भावार्थ- सोम कूटनेका पत्थर सोमपर चढकर जो कूटनेका शब्द करता है, वह शब्द तुम्हें यज्ञके लिये बुलानेके लियेही होता है।

[३४२]

३४२ चि॒त्रं ह॒ यद् वां॒ भोज॑नं॒ न्व॑स्ति॒ न्यत्र॑ये॒ महि॑ष्वन्तं
यु॒योत॑म् । यो वा॑मो॒मानं॒ दध॑ते प्रि॒यः सन् ॥५॥
३४२ चि॒त्रम् । ह॒ । यत् । वा॒म् । भोज॑नम् । नु । अस्ति॑ ।
नि । अत्र॑ये । महि॑ष्वन्तम् । यु॒योत॒म् ॥
यः । वा॒म् । ओ॒मान॑म् । दध॑ते । प्रि॒यः । सन् ॥५॥

३४२ अन्वयः— यत् वां चित्रं भोजनं नु अस्ति ह; अत्रये महिष्वन्तं नि युयोतं, यः प्रियः सन् वां ओमानं दधते ॥ ५ ॥

३४२ अर्थ- (यत् वां चित्रं) जो तुम दोनोंका विलक्षण (भोजनं नु अस्ति ह) अन्नरूपी दान है जो (अत्रये) ऋषि अत्रिके लिए (महिष्वन्तं नि युयोतं) शक्ति बढानेके लिये तुमने दिया, क्योंकि (यः प्रियः सन्) जो तुम्हारा प्यारा होनेके कारण (वां ओमानं दधते) तुम्हारे सुखदायक आश्रयका धारण करता है ॥

३४२ भावार्थ— अश्विदेवोंके पास उत्तम पुष्टिकारक अन्न है, वह उन्होंने अत्रिको शक्ति बढानेके लिये दिया था। क्योंकि वह उनका प्रिय भक्त है अतः उनकी सुरक्षामें वह सदा रहता है।

३४२ मानवधर्म— कृशको पुष्ट करनेके लिये ऐसा अन्न देना चाहिये कि जो शीघ्रही उसे पुष्ट बलवान् और सुदृढ बना सके।

[३४३]

३४३ उत त्यद् वां जुरते अश्विना भूच्च्यवानाय प्रतीत्यं हविर्दे। अधि यद् वर्प इतऊति धत्थः ॥६॥

३४३ उत। त्यत्। वाम्। जुरते। अश्विना। भूत्। च्यवानाय। प्रतीत्यम्। हविःऽदे॥ अधि। यत्। वर्पः। इतःऽऊति। धत्थः ॥६॥

३४३ अन्वयः- उत अश्विना! हविर्दे जुरते च्यवानाय वां त्यत् प्रतीत्यं भूत् यत् इतऊति वर्पः अधि धत्थः ॥ ६ ॥

३४३ अर्थ- (उत अश्विना) और हे अश्विदेवों! (हविर्दे) हविका दान करनेवाले (जुरते च्यवानाय) वृद्ध च्यवानके लिए (वां त्यत्) तुम्हारा वह उनके पास (प्रतीत्यं भूत्) वापस जाना हितकारक सिद्ध हुआ, (यत्) जो-कि (इतऊति वर्पः) इस मृत्युसे संरक्षण देनेवाला रूप (अधि धत्थः) तुम दोनोंने उसे दे दिया ॥

३४३ भावार्थ- च्यवन ऋषि अतिवृद्ध हुआ था, उसके पास अश्विदेव गये और उसको तरुण जैसा रूप दिया, उनकी उस ऋषिपर बडी कृपा हुई।

[३४४]

३४४ उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे। निरीं पर्षदरावा यो युवाकुः ॥७॥

३४४ उत। त्यम्। भुज्युम्। अश्विना। सखायः। मध्ये। जहुः। दुःऽएवासः। समुद्रे॥ निः। ईम्। पर्षत्। अरावा। यः। युवाकुः ॥७॥

३४४ अन्वयः— उत अश्विना ! त्यं भुज्युं दुरेवासः सखायः समुद्रे मध्ये जहुः; यः युवाकुः अरावा ईं निः पर्षत् ॥ ७ ॥

३४४ अर्थ- (उत अश्विना) और हे अश्विदेवो ! (त्यं भुज्युं) उस भुज्युको (दुरेवासः सखायः) बुरी चालवाले मित्र (समुद्रे मध्ये जहुः) समुन्दरके मध्य छोड चुके, (यः युवाकुः) जो तुम्हारी भक्ति करता हुआ (अरावा) तुम्हारे समीप सहायतार्थ आने लगा था, (ईं निः पर्षत्) उसे तुम पूर्णतया पार ले चले ॥

३४४ भावार्थ- राजपुत्र भुज्यु समुद्रमें डूबता था, उसको अश्विदेवोंने उठाया और समुद्रपार करके घर पहुंचाया ।

[३४५]

३४५ वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना ।
याव॒घ्नाम॑पिन्वतम॒पो न स्त॒र्यं॑ चिच्छक्त्य॑श्विना॒ शची॑भिः ॥

३४५ वृका॑य । चि॒त् । जस॑मानाय । श॒क्त॒म् ।
उ॒त । श्रु॒त॒म् । श॒यवे॑ । हू॒यमा॑ना ॥
यौ । अ॒घ्न्याम् । अपि॑न्वतम् । अ॒पः । न ।
स्त॒र्य॑म् । चि॒त् । श॒क्ती । अ॒श्विना॒ । शची॑भिः ॥८॥

३४५ अन्वयः- अश्विना ! जसमानाय वृकाय चित् शक्तं उत हूयमाना शयवे श्रुतं; यौ शचीभिः शक्ती स्तर्यं चित् अघ्न्यां अपः न अपिन्वतम् ॥ ८ ॥

३४५ अर्थ- हे अश्विदेवों ! (जसमानाय वृकाय चित्) क्षीण होनेवाले वृकके भी हितके लिए (शक्तं) तुम दान दे चुके, (उत) और (हूयमाना शयवे श्रुतं) बुलावा आनेपर शयुका हित हो इसलिए तुम उसके कथनकी ओर ध्यान दे चुके । (यौ) जो तुम दोनों (शचीभिः) कर्मोंसे (शक्ती) सामर्थ्यसे (स्तर्यं चित् अघ्न्यां) वन्ध्या गायको भी (अपः न) जलसमूहकी न्याईं (अपिन्वतं) तुम दुधारू बना चुके ॥

३४५ भावार्थ- अश्विदेवोंने वृकके लिये सहायतार्थ दान दिया, शयुकी पुकार सुन ली, वन्ध्या गौको उसके लिये दुधारू बनाया ।

[३४६]

३४६ एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा ।
इषा तं वर्धदघ्न्या पयोभिर्यूयं पात स्वस्तिभिः सदा नः॥९

३४६ एषः । स्यः । कारुः । जरते । सुऽउक्तैः ।
अग्रे । बुधानः । उषसाम् । सुऽमन्मा ॥
इषा । तम् । वर्धत् । अघ्न्या । पयःऽभिः ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥९॥

३४६ अन्वयः- स्यः एषः सुमन्मा कारुः उषसां अग्रे बुधानः सूक्तैः जरते; अघ्न्या पयोभिः इषा तं वर्धत्, यूयं नः स्वस्तिभिः सदा पात ॥ ९ ॥

३४६ अर्थ- (स्यः एषः) वही यह (सुमन्मा) उत्तम बुद्धिवाला (कारुः) कर्मकुशल पुरुष (उषसां अग्रे) उषाओंके पहले (बुधानः) जागृत होता हुआ, (सूक्तैः जरते) सूक्तोंसे प्रशंसा करता है; (अघ्न्या पयोभिः इषा) अवध्य गाय दूधसे और अन्नसे (तं वर्धत्) उसे बढाये, (यूयं नः) तुम हमें (स्वस्तिभिः सदा पात) हितकारक साधनोंसे हमेशा सुरक्षित रखो ॥

३४६ भावार्थः— उषःकालमें भक्त उठे और इष्टदेवताकी स्तुति करे। जो क्षीण होते हैं उनकी पुष्टि गौ अपने दूधरूपी अन्नसे करती है। इस तरह तुम हम सबका संरक्षण करो।

[३४७] (ऋ० ७।६९।१-८) त्रिष्टुप् ।

३४७ आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर्यात्वश्वैः।
घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर्वाजिनीवान्॥

३४७ आ। वाम् । रथः । रोदसी इति । बद्बधानः ।
हिरण्ययः । वृषऽभिः । यातु । अश्वैः ॥
घृतऽवर्तनिः । पविऽभिः । रुचानः ।
इषाम् । वोळ्हा । नृऽपतिः । वाजिनीऽवान् ॥१॥

३४७ अन्वयः- वां हिरण्ययः, घृतवर्तनिः पविभिः रुचानः, इषां वोळ्हा वाजिनीवान् नृपतिः, रोदसी बद्बधानः रथः वृषभिः अश्वैः आ यातु ॥ १ ॥

३४७ अर्थ- (वां हिरण्ययः) तुम्हारा सुवर्णमय, (घृतवर्तनिः) मार्गमें घृतको देनेवाला, (पविभिः रुचानः) अरोंसे जगमगाता हुआ (इषां वोळ्हा) अन्नोंको उचित स्थानपर पहुँचानेवाला, (वाजिनीवान् नृपतिः) सेनासे युक्त मानों नरेश जैसा (रोदसी बद्बधानः) द्युलोक और भूलोकको गर्जनासे प्रतिध्वनित करता हुआ रथ (वृषभिः अश्वैः) बलिष्ठ घोडोंसे युक्त होकर (आ यातु) इधर आजाए ॥

[३४८]

३४८ स पप्रथानो अभि पञ्च भूमा त्रिवन्धुरो मनसा यातु युक्तः।
विशो येन गच्छथो देवयन्तीः कुत्रा चिद् याममश्विना दधाना ॥२॥

३४८ सः । पप्रथानः । अभि । पञ्च । भूम ।
त्रिऽवन्धुरः । मनसा । आ । यातु । युक्तः ॥
विशः । येन । गच्छथः । देवऽयन्तीः ।
कुत्र । चित् । यामम् । अश्विना । दधाना ॥२॥

३४८ अन्वयः- अश्विना ! कुत्रचित् यामं दधाना येन देवयन्तीः विशः गच्छथः सः त्रिवन्धुरः पञ्च भूमा पप्रथानः मनसा युक्तः अभि यातु ॥ २ ॥

३४८ अर्थ- हे अश्विदेवों ! (कुत्रचित् यामं दधाना) कहीं भी यात्राका प्रारंभ करते हुए (येन देवयन्तीः विशः गच्छथः) जिसपरसे तुम देवोंकी कामना करनेवाली प्रजाओंके समीप जाते हो, (सः त्रिवन्धुरः) वह तीन सुन्दर लट्ठोंसे युक्त और (पञ्च भूमा पप्रथानः) पांचोंको विस्तारित करता हुआ रथ (मनसा युक्तः अभि यातु) इशारेसेही जोता हुआ संचार करे ॥

[३४९]

३४९ स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमन्तं पिबाथः ।
वि वां रथो वध्वा३ यादमानोऽन्तान् दिवो बाधते वर्तनिभ्याम् ॥३॥

❀

३४९ सुऽअश्वा । यशसा । आ । यातम् । अर्वाक् ।
दस्रा । निऽधिम् । मधुऽमन्तम् । पिबाथः ॥
वि । वाम् । रथः । वध्वा । यादमानः ।
अन्तान् । दिवः । बाधते । वर्तनिऽभ्याम् ॥३॥

३४९ अन्वयः- दस्रा ! स्वश्वा यशसा अर्वाक् आ यातं मधुमन्तं निधिं पिबाथः, वां रथः वध्वा यादमानः वर्तनिभ्यां दिवः अन्तान् वि बाधते ॥ ३ ॥

३४९ अर्थ— हे (दस्रा) शत्रुविनाशक देवो ! (स्वश्वा यशसा) अच्छे घोडों और यशस्वी कार्यसे युक्त होकर (अर्वाक् आ यातं) हमारे पास आओ और (मधुमन्तं निधिं पिबाथः) मिठाससे पूर्ण इस रसके भाण्डारको पी जाओ; (वां रथः) तुम्हारा रथ (वध्वा यादमानः) वधूके साथ आगे बढता हुआ (वर्तनिभ्यां) पहियोंसे (दिवः अन्तान् वि बाधते) द्युलोकके अन्तिम विभागोंको विशेष रूपसे आन्दोलित करता है ॥

[३५०]

३५० युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम्।
यद् देवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो
गात् ॥४॥

३५० युवोः । श्रियम् । परि । योषा । अवृणीत ।
सूरः । दुहिता । परिऽतक्म्यायाम् ॥
यत् । देवऽयन्तम् । अवथः । शचीभिः ।
परि । घ्रंसम् । ओमना । वाम् । वयः । गात् ॥४॥

३५० अन्वयः- सूरः दुहिता योषा परितक्म्यायां युवोः श्रियं परि अवृणीत यत् देवयन्तं शचीभिः अवथः, वां ओमना घ्रंसं वयः परि गात् ॥ ४ ॥

३५० अर्थ- (सूरः दुहिता) सूर्यकी कन्या (योषा) युवती उषा (परितक्म्यायां) रात्रीके अवसरपर (युवोः श्रियं परि अवृणीत) तुम्हारी शोभा बढानेवाले रथका स्वीकार कर चुकी, (यत्) अब (देवयन्तं शचीभिः

अवथः) देवोंको चाहनेवालेको शक्तियोंसे तुम सुरक्षित रखते हो, जब (वां ओमना) तुम्हारी रक्षाके कारण (प्रसं वयः) दीप्त अन्न (परि गात्) चारों ओर फैल चुका होता है ॥

३५० भावार्थ- सूर्यपुत्री उषा रात्रीके समय आती है, और प्रकाशती है, तथा वह अश्विदेवोंकी शोभा बढाती है। जो यज्ञकर्म करनेवाले हैं उनकी सुरक्षा अश्विदेव करते हैं और इस समय यज्ञमें चारों ओर अन्नदान होता रहता है।

[३५१]

३५१ यो ह स्य वां रथिरा वस्तं उस्रा रथों युजानः परियाति वर्तिः। तेनं नः शं योरुषसो व्युंष्टौ न्यंश्विना वहतं यज्ञे अस्मिन् ॥५॥

३५१ यः। ह। स्यः। वाम्। रथिरा। वस्तें। उस्राः। रथः। युजानः। परिऽयाति। वर्तिः॥
तेनं। नः। शम्। योः। उषसंः। विऽउंष्टौ।
नि। अश्विना। वहतम्। यज्ञे। अस्मिन् ॥५॥

३५१ अन्वयः— रथिरा! यः वां स्यः रथः युजानः वर्तिः परि याति, उस्राः वस्ते तेन अश्विना! उषसः व्युष्टौ अस्मिन् यज्ञे नः शं योः नि वहतम्॥५

३५१ अर्थ— हे (रथिरा) रथवाले देवों! (यः वां) जो तुम्हारा (स्यः रथः) वह रथ (युजानः) घोडोंसे युक्त होनेपर (वर्तिः परि याति) घर चला जाता है, और (उस्राः वस्ते) तेजस्वी किरणोंसे विश्वको आच्छादित रहता है, (तेन) उसी रथसे हे अश्विदेवों! (उषसः व्युष्टौ) उषाके प्रकट होनेपर (अस्मिन् यज्ञे) इस यज्ञमें (नः शं योः) हमारे लिए शान्तिकी प्राप्ति तथा दुःखोंका हटाना (नि वहतं) करो ॥

[३५२]

३५२ नरा गौरेव विद्युतं तृषाणाऽस्माकमद्य सवनोपं यातम्। पुरुत्रा हि वां मतिभिर्हवन्ते मा वामन्ये नि यमन्देवयन्तः॥

३५२ नरा॑ । गौ॒राऽइ॑व । वि॒ऽद्युत॑म् । तृ॒षा॒णा ।
अ॒स्माक॑म् । अ॒द्य । सव॑ना । उप॑ । या॒त॒म् ॥
पु॒रु॒ऽत्रा । हि । वा॒म् । म॒तिऽभिः॑ । हव॑न्ते ।
मा । वा॒म् । अ॒न्ये । नि । य॒म॒न् । दे॒व॒ऽयन्तः॑ ॥६॥

३५२ अन्वयः- नरा ! अद्य अस्माकं सवना उप यातं, तृषाणा विद्युतं गौरा इव; वां पुरुत्रा हि मतिभिः हवन्ते, अन्ये देवयन्तः वां मा नि यमन् ॥ ६ ॥

३५२ अर्थ- हे (नरा) नेता अश्विदेवों ! (अद्य अस्माकं सवना) आज हमारे सवनोंके (उप यातं) समीप आओ, (तृषाणा) प्यासे तुम दोनों (विद्युतं गौरा इव) चमकनेवाले सोमरसके प्रति गौरमृगीके तुल्य जल्द जाओ और पीओ । (वां) तुम्हें (पुरुत्रा हि) अनेक स्थानोंमें सचमुच (मतिभिः हवन्ते) बुद्धिपूर्वक तैयार किये स्तोत्रोंसे (हवन्ते) लोग बुलाते हैं, (अन्ये देवयन्तः) दूसरे लोग जो देवोंकी कामना करते हों वे (वां मा नि यमन्) तुम्हें न रोक रखें ॥

[३५३]

३५३ यु॒वं भु॒ज्युमव॑विद्धं समु॒द्र उदू॑हथु॒रर्ण॑सो॒ अस्रि॑धानैः ।
प॒त॒त्रिभि॑रश्र॒मैर॑व्य॒थिभि॑र्दं॒सना॑भिरश्विना पा॒रय॑न्ता ॥७॥

३५३ यु॒वम् । भु॒ज्युम् । अव॑ऽविद्धम् । स॒मु॒द्रे ।
उत् । ऊ॒ह॒थुः॒ । अर्ण॑सः । अस्रि॑धानैः ॥
प॒त॒त्रिऽभिः॑ । अ॒श्र॒मैः । अ॒व्य॒थिऽभिः॑ ।
दं॒सना॑भिः । अ॒श्वि॒ना॒ । पा॒रय॑न्ता ॥७॥

३५३ अन्वयः- अश्विना ! समुद्रे अवविद्धं भुज्युं युवं अस्रिधानैः अश्रमैः अव्यथिभिः पतत्रिभिः दंसनाभिः पारयन्ता अर्णसः उत् ऊहथुः ॥७॥

३५३ अर्थ— हे अश्विदेवों ! (समुद्रे अवविद्धं भुज्युं) समुन्दरमें गिरे हुए भुज्युको (युवं) तुम दोनों (अस्रिधानैः) क्षीण न होनेवाले (अश्रमैः अव्यथिभिः) न थकनेवाले, व्यथासे रहित (पतत्रिभिः) पंछीके तुल्य उडनेवाले वाहनोंसे और (दंसनाभिः) क्रियाओंसे (पारयन्ता) पार ले चलते हुए (अर्णसः उत् ऊहथुः) समुद्रजलमेंसे ऊपर उठाकर दूर पहुँचा चुके ॥

३५३ भावार्थ- भुज्यु समुद्रमें गिरा था। अश्विदेवोंने उसे उठाया, अपने वाहनोंमें, पक्षीसदृश विमानोंमें, उसको लिया और समुद्रके पार ले जाकर उसको घर पहुंचा दिया।

[३५४]

३५४ नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत्। धत्तं रत्नानि जरतं च सूरीन् यूयं पात स्वस्तिभिः सदा नः॥

३५४ नु। मे। हवम्। आ। शृणुतम्। युवाना। यासिष्टम्। वर्तिः। अश्विनौ। इराऽवत्॥ धत्तम्। रत्नानि। जरतम्। च। सूरीन्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥८॥

३५४ [यह मंत्र ३३७ में देखिये]

[३५५] (ऋ० ७।७०।१-७)

३५५ आ विश्ववाराऽश्विना गतं नः प्र तत् स्थानमवाचि वां पृथिव्याम्। अश्वो न वाजी शुनपृष्ठो अस्थादा यत् सेदथुर्ध्रुवसे न योनिम्॥१॥

३५५ आ। विश्वऽवारा। अश्विना। गतम्। नः। प्र। तत्। स्थानम्। अवाचि। वाम्। पृथिव्याम्॥ अश्वः। न। वाजी। शुनऽपृष्ठः। अस्थात्। आ। यत्। सेदथुः। ध्रुवसे। न। योनिम्॥१॥

३५५ अन्वयः— विश्ववारा अश्विना! पृथिव्यां वां तत् स्थानं प्र अवाचि, नः आगतं, यत् ध्रुवसे योनिं न आ सेदथुः शुनपृष्ठः वाजी अश्वः न अस्थात्॥१॥

३५५ अर्थ— हे (विश्ववारा अश्विना) सबसे वरणीय अश्विदेवों! (पृथिव्यां वां तत् स्थानं) भूमिमें तुम दोनोंका वह स्थान (प्र अवाचि) विशेष ढंगसे वर्णित किया जा चुका है, वहांसे (नः आ गतं) हमारे समीप

आओ, और (यत ध्रुवसे योनिं न आ सेदथुः) जिसपर स्थिर बैठनेके लिए अपने निज स्थानपर बैठनेके समानही तुम बैठो, वह स्थान (शुनपृष्ठः वाजी अश्वः न) जिसकी पीठपर बैठना सुखकारक हो, ऐसे बलिष्ठ घोडेके समान यहां (अस्थात्) रखा है ॥

[३५६]

३५६ सिषक्ति सा वां सुमतिश्चनिष्ठाऽतापि घर्मो मनुषो दुरोणे।
यो वां समुद्रान्त्सरितः पिपर्त्येतग्वा चिन्न सुयुजा युजानः॥

३५६ सिसक्ति । सा । वाम् । सुऽमतिः । चनिष्ठा ।
अतापि । घर्मः । मनुषः । दुरोणे ॥
यः । वाम् । समुद्रान् । सरितः पिपर्ति ।
एतऽग्वा । चित् । न । सुऽयुजा । युजानः॥२॥

३५६ अन्वयः– सा चनिष्ठा सुमतिः वां सिसक्ति, मनुषः दुरोणे घर्मः अतापि; यः सुयुजा युजानः एतग्वा चित् न, वां समुद्रान् सरितः पिपर्ति ॥२॥

३५६ अर्थ– (सा चनिष्ठा सुमतिः) वह अत्यन्त वर्णनीय अच्छी बुद्धि (वां सिसक्ति) तुम्हारी सेवा करती है, (मनुषः दुरोणे) मानवके घरमें (घर्मः अतापि) अग्नि प्रदीप्त है (यः) जो (सुयुजा युजानः) उत्तम जोते जानेवाले (एतग्वा चित् न) घोडेके तुल्य (वां) तुम्हारे समीप आता है और (समुद्रान् सरितः पिपर्ति) समुन्दरों तथा नदियोंको पूर्ण करता है ॥

३५६ भावार्थ-- हमारी बुद्धि अश्विदेवोंकी स्तुतिद्वारा सेवा करती है। अब यहां याजकके घरमें अग्नि प्रदीप्त हुआ है, यज्ञ शुरू हुआ है। वह अश्विदेवोंके समीप हवि पहुंचाता है और वृष्टिद्वारा नदियों और समुद्रोंको जलसे भर देता है।

[३५७]

३५७ यानि स्थानान्यश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु।
नि पर्वतस्य मूर्धनि सदन्तेषं जनाय दाशुषे वहन्ता॥३॥

३५७ यानि । स्थानानि । अश्विना । दुधाथे इति ।
दिवः । यह्वीषु । ओषधीषु । विक्षु ॥
नि । पर्वतस्य । मूर्धनि । सदन्ता ।
इषम् । जनाय । दाशुषे । वहन्ता ॥३॥

३५७ अन्वयः— अश्विना ! दाशुषे जनाय इषं वहन्ता, पर्वतस्य मूर्धनि नि सदन्ता दिवः यह्वीषु ओषधीषु विक्षु यानि स्थानानि दधाथे ॥ ३ ॥

३५७ अर्थ- हे अश्विदेवों ! (दाशुषे जनाय) दानी पुरुषके लिए तुम (इषं वहन्ता) अन्न पहुँचाते हैं, (पर्वतस्य मूर्धनि) पहाडके शिखरपर (नि सदन्ता) बैठते हैं, (दिवः) द्युलोककी (यह्वीषु ओषधीषु) बडी बडी सोमआदि वनस्पतियोंमें तथा (विक्षु) प्रजाओंमें (यानि स्थानानि दधाथे) जो यज्ञस्थान हैं उनका धारण करते हैं ॥

३५७ भावार्थ- अश्विदेव दाता पुरुषके लिये अन्न देते हैं, पर्वतके शिखरपर बैठते हैं, वहांकी सोमादि औषधियां लाकर जो प्रजाजन यज्ञ करते हैं, उनकी सुरक्षा करते हैं ।

[३५८]

३५८ चनिष्टं देवा ओषधीष्वप्सु यद्योग्या अश्नवैथे ऋषीणाम् ।
पुरूणि रत्ना दधतौ न्य१स्मे अनु पूर्वाणि चख्यथुर्युगानि ४

३५८ चनिष्टम् । देवौ । ओषधीषु । अप्ऽसु ।
यत् । योग्याः । अश्नवैथे इति । ऋषीणाम् ॥
पुरूणि । रत्ना । दधतौ । नि । अस्मे इति ।
अनु । पूर्वाणि । चख्यथुः । युगानि ॥४॥

३५८ अन्वयः- देवा ! यत् ऋषीणां योग्याः अश्नवैथे, ओषधीषु अप्सु चनिष्टं, अस्मे पुरूणि रत्नानि दधतौ पूर्वाणि युगानि अनु चख्यथुः ॥ ४ ॥

३५८ अर्थ— हे (देवा) दानी अश्विदेवों ! (यत् ऋषीणां योग्याः) जो ऋषियोंके योग्य अन्न (अश्नवैथे) तुम प्राप्त करते हो, वह (ओषधीषु) वनस्पतियोंमें (अप्सु) जलोंमें (चनिष्टं) सेवनीय अन्न (अस्मे) हमें दो,

और (पुरूणि रत्नानि) अनेक रत्न भी हमें (नि दधतौ) दो, तथा (पूर्वाणि युगानि) पूर्व युगोंके समानही (अनु चक्षथुः) इन युगोंको प्रकट करो ॥

३५८ भावार्थ— ऋषियोंके योग्य पवित्र अन्न तुम औषधियोंसे और जलोंसे प्राप्त करते हो और भक्तको बहुत रत्न भी देते हो, इसलिये जैसे तुम पूर्व समयमें सबकी सहायता करते रहे, वैसीही सहायता अब भी करते जाओ।

३५८ टिप्पणी- यहांका अन्न औषधि और जलसे उत्पन्न होनेवाला है। शाकभोजनही है। मांस नहीं है। यहां 'पूर्वयुग' कहे हैं। इससे 'नये युग' जाने जाते हैं।

[३५९]

३५९ शुश्रुवांसा चिदश्विना पुरूण्यभि ब्रह्माणि चक्षाथे ऋषीणाम्।
प्रति प्र यातं वरमा जनायास्मे वामस्तु सुमतिश्चनिष्ठा ॥५॥

३५९ शुश्रुऽवांसा। चित्। अश्विना। पुरूणि।
अभि। ब्रह्माणि। चक्षाथे इति। ऋषीणाम् ॥
प्रति। प्र। यातम्। वरम्। आ। जनाय।
अस्मे इति। वाम्। अस्तु। सुऽमतिः। चनिष्ठा ॥५॥

३५९ अन्वयः- अश्विनौ ! ऋषीणां पुरूणि ब्रह्माणि शुश्रुवांसा चित् अभि चक्षाथे, वरं प्रति आ प्र यातं, अस्मे जनाय वां सुमतिः चनिष्ठा अस्तु ॥५॥

३५९ अर्थ- हे अश्विदेवों ! (ऋषीणां) ऋषियोंके (पुरूणि) बहुतसे (ब्रह्माणि) स्तोत्र (शुश्रुवांसा चित्) सुनते हुएही (अभि चक्षाथे) तुम सबका निरीक्षण करते हो, तथा (वरं प्रति) श्रेष्ठके प्रति (आ प्र यातं) आते हो, (अस्मे जनाय) हम लोगोंके लिए (वां सुमतिः) तुम्हारी अच्छी बुद्धि (चनिष्ठा अस्तु) अन्न देनेवाली हो जाए। सहायक बन जाय ॥

[३६०]

३६० यो वां यज्ञो नासत्या हविष्मान्कृतब्रह्मा समर्यो३ भवाति।
उप प्र यातं वरमा वसिष्ठमिमा ब्रह्माण्यृच्यन्ते युवभ्याम्

३६० यः । वाम् । यज्ञः । नासत्या । हविष्मान् ।
कृतऽब्रह्मा । सऽमर्यः । भवाति ॥
उप । प्र । यातम् । वरम् । आ । वसिष्ठम् ।
इमा । ब्रह्माणि । ऋच्यन्ते । युवऽभ्याम् ॥६॥

३६० अन्वयः— नासत्या ! वां यः यज्ञः हविष्मान् कृत-ब्रह्मा समर्यः भवाति; वरं वसिष्ठं उप आ प्र यातं, युवभ्यां इमा ब्रह्माणि ऋच्यन्ते ॥ ६ ॥

३६० अर्थ- हे सत्य-पालक अश्विदेवों ! (वां यः यज्ञः) तुम्हारा जो यज्ञ (हविष्मान्) हविसे युक्त, (कृत-ब्रह्मा) जिसमें स्तोत्र निर्माण पूर्ण हो चुका ऐसा, (समर्यः भवाति) मानवोंसे युक्त होता है, उस (वरं वसिष्ठं) श्रेष्ठ जनोंको बसानेहारे यज्ञ-कार्यके (उप) समीप तुम (आ प्र यातं) आ जाओ, क्योंकि (युवभ्यां) तुम्हारे लिएही (इमा ब्रह्माणि ऋच्यन्ते) ये सब स्तोत्र किये जाते हैं ॥

३६० भावार्थ— यज्ञ किये जाते हैं, उनमें अनेक जनसमुदाय सम्मिलित होते हैं, उन मानवोंको सुखसे बसानेका कार्य होता है । यह यज्ञका मुख्य स्वरूप है ।

[३६१]

३६१ इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः॥७

३६१ इयम् । मनीषा । इयम् । अश्विना । गीः ।
इमाम् । सुऽवृक्तिम् । वृषणा । जुषेथाम् ॥
इमा । ब्रह्माणि । युवऽयूनि । अग्मन् ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥७॥

३६१ अन्वयः- वृषणा अश्विना ! इयं मनीषा, इयं गीः, इमां सुवृक्तिं जुषेथां; युव-यूनि इमा ब्रह्माणि अग्मन्, नः सदा यूयं स्वस्तिभिः पात ॥ ७ ॥

३६१ अर्थ- हे (वृषणा) बलवान् आश्विदेवों ! (इयं मनीषा) यह हमारी इच्छा है, (इयं गीः) यह हमारा भाषण है, हमारी (इमां सुवृक्तिं

जुषेथां) इस सुन्दर स्तुतिका स्वीकार करो, क्योंकि (युव-यूनि) तुम्हारी कामना पूर्ण करनेवाले (इमा ब्रह्माणि) ये स्तोत्र अब (अग्मन्) प्रचलित हुए हैं, (नः सदा) हमें हमेशा (यूयं) तुम लोग (स्वस्तिभिः पात) हितकारक साधनोंसे सुरक्षित रखो ॥

[३६२] (ऋ० ७।७१।१-६)

३६२ अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय पन्थाम् ।
अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्
युयोतम् ॥१॥

३६२ अप । स्वसुः । उषसः । नक् । जिहीते ।
रिणक्ति । कृष्णीः । अरुषाय । पन्थाम् ॥
अश्वऽमघा । गोऽमघा । वाम् । हुवेम ।
दिवा । नक्तम् । शरुम् । अस्मत् । युयोतम् ॥१॥

३६२ अन्वयः— नक् स्वसुः उषसः अप जिहीते, अरुषाय कृष्णीः पन्थां रिणक्ति; अश्वामघा गोमघा वां हुवेम, अस्मत् दिवा नक्तं शरुं युयोतम् ॥ १ ॥

३६२ अर्थ— (नक्) रात (स्वसुः उषसः) बहन उषासे (अप जिहीते) दूर हटती है; (अरुषाय) लाल रंगवाले सूर्यके लिये (कृष्णीः) काली रात (पन्थां रिणक्ति) मार्ग खुला करती है, (अश्वामघा गोमघा) घोडों तथा गायोंको वैभवके स्वरूपमें देनेवाले (वां हुवेम) तुम दोनोंको बुलाते हैं, (अस्मत्) हमसे (दिवा नक्तं) दिन तथा रात (शरुं युयोतं) हिंसा करनेवालेको दूर करदो ॥

३६२ भावार्थ— रात्री उषासे दूर हो रही है, और वह सूर्यके उदयके लिये माग दे रही है। इसी तरह तेजस्वी वीरोंको उन्नतिका मार्ग खुला कर देना चाहिये। वीरोंको उचित है कि वे घातपात करनेवाले समाजके शत्रुओंको दूर करें और जनताको सुरक्षित रखें।

[३६३]

३६३ उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहन्ता ।
युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः॥२

३६३ उपऽआयातम् । दाशुषे । मर्त्याय ।
रथेन । वामम् । अश्विना । वहन्ता ॥
युयुतम् । अस्मत् । अनिराम् । अमीवाम् ।
दिवा । नक्तम् । माध्वी इति । त्रासीथाम् । नः ॥२॥

३६३ अन्वयः— माध्वी अश्विना ! रथेन वामं वहन्ता दाशुषे मर्त्याय उप आयातं; अस्मत् अनिरां अमीवां युयुतं; नः दिवा नक्तं त्रासीथाम् ॥ २ ॥

३६३ अर्थ- हे (माध्वी) मीठे स्वभाववाले अश्विदेवों ! (रथेन वामं वहन्ता) रथपर सुन्दर अन्न लेकर (दाशुषे मर्त्याय उप-आयातं) दानी मानवके समीप आओ; (अस्मत्) हमसे (अनिरां=अन्-इरां) अन्नके अभावको और (अमीवां युयुतं) रोगको दूर कर दो, (नः) हमें (दिवा नक्तं दिन-रात (त्रासीथां) सुरक्षित रखो ॥

३६३ भावार्थ— अश्विदेव अपने रथपर उत्तम अन्न रखें और हमारेपास आकर हमें दें। अकाल और रोग हमसे दूर हों और सदा हमारी सुरक्षा हो।

३६३ मानवधर्म— जनताको उत्तम अन्न मिले, उनसे अकाल और रोग दूर किये जांय और प्रजाकी सदा सुरक्षा होती रहे।

[३६४]

३६४ आ वां रथमवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयन्तु ।
स्यूमगभस्तिमृतयुग्भिरश्वैराश्विना वसुमन्तं वहेथाम् ॥३॥

३६४ आ । वाम् । रथम् । अवमस्याम् । विऽउष्टौ ।
सुम्नऽयवः । वृषणः । वर्तयन्तु ॥
स्यूमऽगभस्तिम् । ऋतयुक्ऽभिः । अश्वैः ।
आ । अश्विना । वसुऽमन्तम् । वहेथाम् ॥३॥

३६४ अन्वयः— अवमस्यां व्युष्टौ वृषणः सुम्नायवः वां रथं आ वर्तयन्तु; अश्विना ! ऋतयुग्भिः अश्वैः स्यूम-गभस्तिं वसुमन्तं; आ वहेथाम् ॥ ३ ॥

३६४ अर्थ— (अवमस्यां व्युष्टौ) समीपकी उषाके उदय होनेपर (वृषणः सुम्नायवः) बलवान् सुखपूर्वक जानेवाले घोडे (वां रथं) तुम्हारे

रथको (आ वर्तयन्तु) इधर ले आयँ, हे अश्विदेवों ! (ऋतयुग्भिः) सरलता-पूर्वक जोते जानेवाले (अश्वैः स्यूमगभस्तिं) घोडोंसे सुखदायक किरणवाले (वसुमन्तं आ वहेथां)धनयुक्त रथको इधर ले आओ ॥

३६४ भावार्थ— उषःकालमें उठो, बलवान् और उत्तम गतिवाले घोडे अपने रथको जोतो और उस रथको जनताके रहनेके स्थानोंमें ले जाओ (और उनकी स्थिति देखो) ।

[३६५]

३६५ यो वां रथो नृपती अस्ति वोळ्हा त्रिवन्धुरो वसुमाँ उस्रयामा । आ न एना नासत्योप यातमभि यद्वां विश्वप्स्न्यो जिगाति ॥४॥

३६५ यः । वाम् । रथः । नृपती इति नृऽपती । अस्ति । वोळ्हा । त्रिऽवन्धुरः । वसुऽमान् । उस्रऽयामा ॥ आ । नः । एना । नासत्या । उप । यातम् । अभि । यत् । वाम् । विश्वऽप्स्न्यः । जिगाति ॥४॥

३६५ अन्वयः— नृपती नासत्या ! वां यः रथः वसुमान् उस्रयामा त्रिवन्धुरः वोळ्हा अस्ति, एना नः उप आ यातं, यत् विश्वप्स्न्यः वां जिगाति॥४॥

३६५ अर्थ— हे (नृपती नासत्या) मानवोंके रक्षक और सत्य-पालक अश्विदेवों ! (वां यः रथः) तुम्हारा जो रथ (वसुमान् उस्रयामा) धनयुक्त एवं प्रातःकालमें जानेवाला, (त्रिवन्धुरः वोळ्हा अस्ति) तीन बंधनोंवाला तथा स्थानपर शीघ्र पहुँचानेवाला है, (एना) उससे (नः उप आ यातं) हमारे समीप आओ, (यत्) चूँकि (विश्वप्स्न्यः) सर्वत्र जानेवाला रथ (वां जिगाति) तुम्हें शीघ्र लाता है ॥

३६५ भावार्थ— मानवोंकी सुरक्षा करनेवाले अश्विदेव हैं; इनका रथ अनेक धनोंसे युक्त है; उसमें तीन बैठनेके स्थान हैं और वह शीघ्र पहुँचानेवाला है, वह सब स्थानोंमें जा सकता है, उस रथमें बैठकर वे हमारेपास आजांय ।

[३६६]

३६६ युवं च्यवा॑नं ज॒रसो॑ऽमुमुक्तं॒ नि पे॒दव॑ ऊहथुरा॒शुमश्व॑म् ।
निरंह॑स॒स्तम॑सः स्पर्त॒मत्रिं॒ नि जा॑हु॒षं शि॑थि॒रे धा॑तम॒न्तः ॥५

३६६ यु॒वम् । च्यवा॑नम् । ज॒रसः॑ । अ॒मु॒मु॒क्त॒म् ।
नि । पे॒दवे॑ । ऊ॒ह॒थुः॒ । आ॒शुम् । अश्व॑म् ॥
निः । अंह॑सः । तम॑सः । स्प॒र्त॒म् । अत्रि॑म् ।
नि । जा॒हु॒षम् । शि॒थि॒रे । धा॒त॒म् । अ॒न्तरिति॑ ॥५॥

३६६ अन्वयः- जरसः च्यवानं अमुमुक्तं, युवं आशुं अश्वं पेदवे नि ऊहथुः, अत्रिं तमसः अंहसः निष्पर्तं, जाहुषं शिथिरे अन्तः नि धातम् ॥ ५ ॥

३६६ अर्थ- (जरसः) बुढापेसे च्यवनको तुमने (अमुमुक्तं) छुडा दिया, (युवं आशुं अश्वं) तुमने शीघ्रगामी घोडेको (पेदवे नि ऊहथुः) पेदु नरेशके पास पहुँचा दिया, (अत्रिं तमसः अंहसः) अत्रिको अँधेरेसे और कष्टसे (निष्पर्तं) पूर्णतया पार किया और (जाहुषं शिथिरे अन्तः) नरेश जाहुषको भ्रष्ट हुए उसके राज्यमें पुनः (नि धातं) तुमने बिठला दिया ॥

[३६७]

३६७ इ॒यं म॑नी॒षा इ॒यम॑श्वि॒ना गीरि॒मां सु॑वृ॒क्तिं वृ॑षणा जुषेथाम् ।
इ॒मा ब्रह्मा॑णि युव॒यून्य॑ग्मन् यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥६॥

३६७ इ॒यम् । म॒नी॒षा । इ॒यम् । अ॒श्वि॒ना । गीः ।
इ॒माम् । सु॒ऽवृ॒क्तिम् । वृ॒ष॒णा । जु॒षे॒था॒म् ॥
इ॒मा । ब्रह्मा॑णि । यु॒व॒ऽयूनि॑ । अ॒ग्म॒न् ।
यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥६॥

३६७ [यह मंत्र ३६१ पर देखो ।]

[३६८] (ऋ० ७।७२।१-५)

३६८ आ गोमता नासत्या रथेनाश्वावता पुरुश्चन्द्रेण यातम् ।
अभि वां विश्वा नियुतः सचन्ते स्पार्हया श्रिया तन्वा शुभाना ॥१॥

३६८ आ । गोऽमता । नासत्या । रथेन ।
अश्वऽवता । पुरुऽचन्द्रेण । यातम् ॥
अभि । वाम् । विश्वाः । निऽयुतः । सचन्ते ।
स्पार्हया । श्रिया । तन्वा । शुभाना ॥१॥

३६८ अन्वयः— नासत्या ! गोमता अश्वावता पुरुश्चन्द्रेण रथेन आ यातं; स्पार्हया श्रिया तन्वा शुभाना वां अभि विश्वाः नियुतः सचन्ते ॥ १ ॥

३६८ अर्थ— हे सत्य-पालक अश्विदेवों ! (गोमता अश्वावता) गायों और अश्वोंसे युक्त (पुरुश्चन्द्रेण रथेन) विविध आल्हाददायक धनसे पूर्ण रथपरसे (आ यातं) आओ; (स्पार्हया श्रिया) स्पृहणीय शोभासे तथा (तन्वा शुभाना)शरीरसे शोभायमान होते हुए (वां अभि) तुम्हें (विश्वाः नियुतः सचन्ते) सभी घोडे सेवा करते हैं ।।

३६८ भावार्थ— अश्विदेव सत्यके पालक हैं, गौवें और घोडे तथा सुन्दर रथ उनके पास है । वे सुन्दर और सुशोभित हैं । घोडोंको रथमें जोतकर वे आते हैं ।

[३६९]

३६९ आ नो देवेभिरुप यातमर्वाक् सजोषसा नासत्या रथेन ।
युवोर्हि नः सख्या पित्र्याणि समानो बन्धुरुत तस्य वित्तम् ॥२॥

३६९ आ । नः । देवेभिः । उप । यातम् । अर्वाक् ।
सऽजोषसा । नासत्या । रथेन ॥
युवोः । हि । नः । सख्या । पित्र्याणि ।
समानः । बन्धुः । उत । तस्य । वित्तम् ॥२॥

३६९ अन्वयः— नासत्या ! देवेभिः सजोषसा नः अर्वाक् रथेन उप आयातम्। नः युवोः हि सख्या पित्र्याणि उत बन्धुः समानः तस्य वित्तम् ॥१॥

३६९ अर्थ- हे सत्यके पालक अश्विदेवों ! (देवेभिः सजोषसा) देवताओंके साथ तुम दोनों (नः अर्वाक्) हमारे समीप (रथेन उप आयातं) अपने रथपर बैठकर आजाओ क्योंकि (नः युवोः हि) हमारी तुम्हारे साथ (सख्या पित्र्याणि) मित्रता पितृपरंपरागत है, (उत बन्धुः समानः) और तुम्हारा बंधुभाव भी समान है। (तस्य वित्तं) उस बातको तुम जानतेहीं हो ॥

३६९ टिप्पणी- इस मंत्रमें (नः युवोः पित्र्याणि सख्या) कहा है। अर्थात् 'हमारी तुम्हारे साथ मित्रता पितृपरंपरासे चली आयी है' इससे यह सिद्ध हो रहा है कि अश्विदेवोंकी उपासना इस वसिष्ठ ऋषिके कुलमें पितृपितामहसे चली आती रही है।

[३७०]

३७० उदु स्तोमा॑सो अ॒श्विनो॑रबुध्रञ्जा॒मि ब्रह्मा॑ण्यु॒षस॑श्च दे॒वीः ।
आ॒वि॒वा॑स॒न् रोद॑सी॒ धिष्ण्ये॒मे अच्छा॒ विप्रो॒ नास॑त्या
विवक्ति ॥३॥

३७० उत् । ऊँ॒ इति॑ । स्तोमा॑सः । अ॒श्विनोः॑ । अ॒बु॒ध्र॒न् ।
जा॒मि । ब्रह्मा॑णि । उ॒षस॑ः । च॒ । दे॒वीः ॥
आ॒ऽवि॒वा॑स॒न् । रोद॑सी॒ इति॑ । धिष्ण्ये॒ इति॑ । इ॒मे इति॑ ।
अच्छ॑ । विप्र॑ः । नास॑त्या । वि॒व॒क्ति ॥३॥

३७० अन्वयः- अश्विनोः स्तोमासः देवीः उषसः जामि ब्रह्माणि च उत् अबुध्रन्; इमे धिष्ण्ये रोदसी आविवासन् विप्रः नासत्या अच्छ विवक्ति ॥३॥

३७० अर्थ- (अश्विनोः स्तोमासः) अश्विदेवोंके स्तोत्र (देवीः उषसः) तेजस्वी उषाओंको (जामि ब्रह्माणि च) बन्धुवत् स्तोत्रोंको भी (उत् अबुध्रन्) जागृत कर चुके हैं। (इमे धिष्ण्ये रोदसी) इन स्तुत्य द्यावापृथिवीकी (आविवासन् विप्रः) परिचर्या करता हुआ ज्ञानी पुरुष (नासत्या अच्छ विवक्ति) सत्यपालक अश्विदेवोंका वर्णन करता है, स्तुति करता है ॥

३७० भावार्थ- अश्विदेवोंके स्तोत्र उषःकालमेंही गाये जाते हैं, जिससे सब बन्धु-बान्धव जाग्रत होते हैं। द्युलोक और पृथ्वीकी स्तुति करता हुआ भक्त साथ साथ अश्विदेवोंके भी स्तोत्र गाता है।

[३७१]

३७१ वि चेदुच्छन्त्यश्विना उषासः प्र वां ब्रह्माणि कारवो भरन्ते । ऊर्ध्वं भानुं सविता देवो अश्रेद् बृहदग्नयः समिधा जरन्ते ॥४॥

३७१ वि । च । इत् । उच्छन्ति । अश्विनौ । उषसः । प्र । वाम् । ब्रह्माणि । कारवः । भरन्ते ॥ ऊर्ध्वम् । भानुम् । सविता । देवः । अश्रेत् । बृहत् । अग्नयः । सम्ऽइधा । जरन्ते ॥४॥

३७१ अन्वयः- अश्विनौ ! उषासः वि उच्छन्ति चेत् वां कारवः ब्रह्माणि प्र भरन्ते; देवः सविता ऊर्ध्वं भानुं अश्रेत् समिधा अग्नयः बृहत् जरन्ते ॥४॥

३७१ अर्थ— हे अश्विदेवो ! (उषासः) उषाएँ (वि उच्छन्ति चेत्) अँधेरा हटा दें तो (वां) तुम्हें (कारवः) कार्यकर्ता लोग (ब्रह्माणि प्र भरन्ते) स्तोत्र भर देते या पूर्ण करते या गाते हैं, (देवः सविता) सविता देव (ऊर्ध्वं भानुं अश्रेत्) ऊँचे प्रकाशका आश्रय लेता है, अर्थात् सूर्य भगवान् अपने तेजस्वी किरणोंसे जगमगाने लगा है, तब (समिधा) समिधासे (अग्नयः) (बृहत् जरन्ते) बहुत प्रशंसित होते हैं ॥

[३७२]

३७२ आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् । आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥५॥

३७२ आ । पश्चातात् । नासत्या । आ । पुरस्तात् । आ । अश्विना । यातम् । अधरात् । उदक्तात् ॥ आ । विश्वतः । पाञ्चऽजन्येन । राया । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥५॥

३७१ अन्वयः- नासत्या अश्विना ! अधरात् उदक्तात् पश्चातात् पुरस्तात् आ यातम्; पाञ्चजन्येन राया विश्वतः आ (यातं) यूयं नः स्वस्तिभिः सदा पात ॥ ५ ॥

३७२ अर्थ— हे सत्यपालक अश्विदेवों ! (अधरात्) नीचेसे (उदक्तात्) ऊपरसे (पश्चातात्) पीछेसे और (पुरस्तात्) आगेसे (आ यातं) तुम आओ; (पाञ्चजन्येन राया) पाँचों प्रकारके लोगोंके हितकारी धनके साथ (विश्वतः) चारों ओरसे (आयातं) तुम आओ, और (यूयं नः) तुम लोग हमें (स्वस्तिभिः) कल्याणोंसे (सदा पात) हमेशा सुरक्षित रखो ॥

[३७३] (ऋ. ७।७३।१-५)

३७३ अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयन्तो दधानाः।
पुरुदंसा पुरुतमा पुराजाऽमर्त्या हवते अश्विना गीः ॥१॥

३७३ अतारिष्म । तमसः । पारम् । अस्य ।
प्रति । स्तोमम् । देवऽयन्तः । दधानाः ॥
पुरुऽदंसा । पुरुऽतमा । पुराऽजा ।
अमर्त्या । हवते । अश्विना । गीः ॥१॥

३७३ अन्वयः— देवयन्तः स्तोमं प्रति दधानाः अस्य तमसः पारं अतारिष्म; गीः पुरुदंसा पुरुतमा पुराजा अमर्त्या अश्विना हवते ॥ १ ॥

३७३ अर्थ— (देवयन्तः) देवोंकी कामना करते हुए (स्तोमं प्रति दधानाः) स्तोत्रको धारण करते हुए (अस्य तमसः पारं अतारिष्म) इस अँधेरेके पार हम चले गये । (गीः) वाणी (पुरुदंसा) अनेक कार्यवाले, (पुरुतमा) अत्यन्त विशाल (पुराजा अमर्त्या अश्विना) पूर्वकालसे सुप्रसिद्ध अमर अश्विदेवोंको (हवते) बुलाती है, उनकी स्तुति गाती है ॥

३७३ भावार्थ— देवोंकी स्तुति करते करते अंधेरी रात्र समाप्त हुई, तथापि अश्विदेवोंकी स्तुति चलही रही है ।

[३७४]

३७४ न्यु प्रियो मनुषः सादि होता नासत्या यो यजते वन्दते च । अश्नीतं मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान् ॥२॥

*

३७४ नि । ऊँ इति । प्रियः । मनुषः । सादि । होता ।
नासत्या । यः । यजते । वन्दते । च ॥
अश्नीतम् । मध्वः । अश्विना । उपाके ।
आ । वाम् । वोचे । विदथेषु । प्रयस्वान् ॥२॥

३७४ अन्वयः– नासत्या अश्विना ! यः यजते वन्दते च, होता मनुषः प्रियः नि सादि; उपाके मध्वः अश्नीतं, विधथेषु प्रयस्वान् वां आ वोचे ॥२ ॥

३७४ अर्थ– हे सत्यपालक अश्विदेवों ! (यः यजते) जो यज्ञ करता है, (वन्दते च) और प्रणाम करता है, ऐसा वह (होता मनुषः प्रियः) दानी और मानवका प्यारा यहां (नि सादि) बैठ गया है, तुम दोनों (उपाके मध्वः अश्नीतं) समीप जाकर मधुररसका पान करो, (विदथेषु प्रयस्वान्) यज्ञोंमें अन्न साथ लेकर मैं (वां आ वोचे) तुम्हारी स्तुति करता हूं ॥

३७४ भावार्थ— मैं अश्विदेवोंके लिये यजन करता हूं, उनको प्रणाम करता हूं, मैं उनका प्रिय भक्त यहां बैठा हूं, अश्विदेव यहां आयें और मधुर सोमरसका पान करें । मैंने इन यज्ञोंमें उत्तम अन्न सिद्ध किया है और उसके साथ मैं तुम्हारी स्तुति करता हूं ।

[३७५]

३७५ अहेम यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथाम् ।
श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वसिष्ठः ॥३

३७५ अहेम । यज्ञम् । पथाम् । उराणाः ।
इमाम् । सुऽवृक्तिम् । वृषणा । जुषेथाम् ॥
श्रुष्टीवाऽइव । प्रऽइषितः । वाम् । अबोधि ।
प्रति । स्तोमैः । जरमाणः । वसिष्ठः ॥३॥

३७५ अन्वयः– वृषणा ! इमां सुवृक्तिं जुषेथां, वां प्रति प्रेषितः जरमाणः वसिष्ठः श्रुष्टीवा इव स्तोमैः अबोधि । पथां उराणाः यज्ञं अहेम ॥ ३ ॥

३७५ अर्थ– हे (वृषणा) बलिष्ठ अश्विदेवों ! तुम (इमां सुवृक्तिं जुषेथां) इस अच्छी स्तुतिका सेवन करो, (वां प्रति प्रेषितः) तुम्हारी ओर भेजा

हुआ (जरमाणः वसिष्ठः) स्तुति करता हुआ वसिष्ठ (श्रुष्टीवा इव) शीघ्रगामी दूतके तुल्य तुम्हें (स्तोमैः अबोधि) स्तुति स्तोत्रोंसे जागृत कर चुका है। (पथां उराणाः) यज्ञमार्गोंका अनुसरण करनेवाले हम सब तुम्हारे लिये (यज्ञं अहेम) यज्ञको सम्पन्न करते हैं ॥

३७५ भावार्थ— जिसका मन देवतापरही लगा है ऐसा एकाग्र भक्त यह वसिष्ठ है, वह तुम्हारे स्तोत्र गा रहा है। यज्ञमार्गका अनुसरण करनेवाले हम सब तुम्हारे लियेही ये यज्ञ कर रहे हैं। (एकाग्रतासे स्तुति करनी चाहिये और अपना सब कर्म प्रभुको समर्पण करना चाहिये।)

[३७६]

३७६ उप॒ त्या वह्नी॑ गम॒तो विशं॑ नो रक्षो॒हणा॒ संभृ॑ता
वी॒ळुपा॑णी । समन्धां॒स्यग्मत मत्स॒रा॒णि॒ मा नो॑
मर्धिष्ट॒मा ग॑तं शि॒वेन॑ ॥४॥

३७६ उप॑ । त्या । वह्नी॒ इति॑ । ग॒म॒तः॒ । विश॑म् । नः॒ ।
र॒क्षः॒ऽहना॑ । सम्ऽभृ॑ता । वी॒ळुपा॑णी॒ इति॑ वी॒ळुऽपा॑णी ॥
सम् । अन्धां॑सि । अ॒ग्म॒त॒ । म॒त्स॒रा॒णि॑ ।
मा । नः॒ । म॒र्धि॒ष्ट॒म् । आ । ग॒त॒म् । शि॒वेन॑ ॥४॥

३७६ अन्वयः— त्या वह्नी वीळुपाणी रक्षोहणा संभृता नः विशं उप गमतः, मत्सराणि अन्धांसि सं अग्मत, नः मा मर्धिष्टं शिवेन आ गतम् ॥ ४ ॥

३७६ अर्थ— (त्या वह्नी) वे ढोनेवाले, (वीळुपाणी) दृढ हाथोंसे युक्त, (रक्षोहणा संभृता) राक्षसोंका वध करनेवाले और संभारयुक्त अश्विदेव (नः विशं उप गमतः) हमारी प्रजाके समीप आते हैं, (मत्सराणि अन्धांसि सं अग्मत) आनन्द देनेवाले अन्न इकट्ठे हो चुके, (नः मा मर्धिष्टं) हमें कष्ट न दो, और (शिवेन आ गतं) हितकारक ढंगसे इधर आओ ॥

३७६ भावार्थ- अपने हाथोंमें बल बढाओ, दुष्टोंका वध करो, सब संभार एकत्र करो, प्रजाजनोंके पास जाओ, आनन्ददायक अन्न इकट्ठे करो, किसीको कष्ट न दो, शुभभावसे इधर आओ। (शुभभावसे गमन करो।)

[३७७]

३७७ आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः
सदा नः ॥५॥

३७७ आ । पश्चातात् । नासत्या । आ । पुरस्तात् ।
आ । अश्विना । यातम् । अधरात् । उदक्तात् ॥
आ । विश्वतः । पाञ्चऽजन्येन । राया ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥५॥

३७७ [यह मंत्र ३७२ पर देखो]

[३७८]

(ऋ. ७।७४।१-६) प्रगाथः= (विषमा बृहती+समा सतोबृहती)

३७८ इमा उ वां दिविष्टय उस्रा हवन्ते आश्विना ।
अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥१॥

३७८ इमाः । ऊँ इति । वाम् । दिविष्टयः ।
उस्रा । हवन्ते । अश्विना ।
अयम् । वाम् । अह्वे । अवसे । शचीवसू इति शचीऽवसू ।
विशम्ऽविशम् । हि । गच्छथः ॥१॥

३७८ अन्वयः— शचीवसू ! उस्रा अश्विना ! इमाः दिविष्टयः वां उ हवन्ते; अवसे अयं वां अह्वे, विशंविशं हि गच्छथः ॥ १ ॥

३७८ अर्थ— हे (शचीवसू) शक्तिरूपी धनसे युक्त और (उस्रा) प्रकाशने द्वारे अश्विदेवों ! (इमाः दिविष्टयः) ये द्युलोककी प्राप्तिकी इच्छा करनेवाले (वां उ) तुम्हेंही (हवन्ते) बुलाते हैं; (अवसे) रक्षाके लिए (अयं वां अह्वे) यह मैं तुम्हें बुलाता हूं, क्योंकि (विशंविशं हि गच्छथः) तुम हर प्रजाके समीप जाते हो ॥

३७८ भावार्थ— अश्विदेव शक्तिसे संपन्न हैं, ये भक्त उनकी प्रार्थना करते हैं, सुरक्षाके लिये मैं भी उनकीही स्तुति करता हूं, क्योंकि अश्विदेव प्रत्येक मनुष्यके पास जाते हैं। (और उनकी सहायता करते हैं।)

[३७९]

३७९ युवं चित्रं दंदथुर्भोजनं नरा चोदेथां सूनृतावते ।
अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥२॥

३७९ युवम् । चित्रम् । दुदुथुः । भोजनम् । नरा ।
चोदेथाम् । सूनृताऽवते ॥
अर्वाक् । रथम् । सऽमनसा । यच्छतम् ।
पिबतम् । सोम्यम् । मधु ॥२॥

३७९ अन्वयः- नरा ! युवं चित्रं भोजनं ददथुः, सूनृतावते चोदेथां; समनसा रथं अर्वाक् नि यच्छतं सोम्यं मधु पिबतम् ॥२॥

३७९ अर्थ— हे (नरा) नेता अश्विदेवों ! (युवं चित्रं भोजनं) तुम दोनों विविध प्रकारका भोजन (ददथुः) दे चुके हो, और उसे (सूनृतावते चोदेथां) सच्ची वाणीसे युक्त मनुष्यको प्रेरित करो; (समनसा रथं) एक विचारवाले होकर रथको (अर्वाक् नि यच्छतं) हमारे सम्मुख रोके रखो और (सोम्यं मधु पिबतं) सोमसे युक्त मीठे रसका पान करो ॥

३७९ भावार्थ— मानवोंके नेता अश्विदेव विविध प्रकारका भोजन भक्तोंको देते हैं, मनुष्योंको सत्कर्मकी ओर प्रेरणा करते हैं, अतः वे शुभ मनोभावनासे हमारेपास आजांय और मधुर सोमरस पीयें ।

[३८०]

३८० आ यातमुप भूषतं मध्वः पिबतमश्विना ।
दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम् ॥३

३८० आ । यातम् । उप । भूषतम् ।
मध्वः । पिबतम् । अश्विना ॥
दुग्धम् । पयः । वृषणा । जेन्यावसू इति ।
मा । नः । मर्धिष्टम् । आ । गतम् ॥३॥

३८० अन्वयः— जेन्या-वसू वृषणा अश्विना आयातं, उप भूषतं मध्वः ! पिबतं, नः मा मर्धिष्टं आ गतं पयः दुग्धम् ॥ ३ ॥

३८० अर्थ– हे (जेन्या-वसू) धनोंको जीतनेवाले (वृषणा) बलिष्ठ अश्विदेवों ! (आ यातं) आओ, (उप भूषतं) अलंकृत करो, (मध्वः पिबतं) मधुररसका पान करो, (नः मा मर्धिष्टं) हमें न हिंसित करो, (आगतं) आओ और (पयः दुग्धं) दुग्धका दोहन किया है ॥

[३८१]

३८१ अश्वा॑सो॒ ये वा॒मुप॑ दा॒शुषो॑ गृ॒हं यु॒वां दीय॑न्ति॒ बिभ्र॑तः ।
म॒क्षुयु॑भि॒र्नरा॒ हये॑भिरश्विना ऽऽ दे॑वा यातमस्म॒यू ॥४॥

३८१ अश्वा॑सः । ये । वा॒म् । उप॑ । दा॒शुषः॑ । गृ॒हम् ।
यु॒वाम् । दीय॑न्ति । बिभ्र॑तः ॥
म॒क्षुयु॑ऽभिः । न॒रा॒ । हये॑भिः । अ॒श्वि॒ना॒ ।
आ । दे॒वा॒ । या॒त॒म् । अ॒स्म॒यू इत्य॑स्म॒ऽयू ॥४॥

३८१ अन्वयः– वां ये अश्वासः बिभ्रतः युवां दाशुषः गृहं उप दीयन्ति; नरा अश्विना ! देवा ! अस्मयू मक्षुयुभिः हयेभिः आ यातम् ॥ ४ ॥

३८१ अर्थ– (वां ये अश्वासः) तुम्हारे जो घोडे (बिभ्रतः युवां) धारण करनेवाले तुम्हें (दाशुषः गृहं) दानी पुरुषके घरतक (उप दीयन्ति) पहुँचा देते हैं, हे (नरा) नेता अश्विदेवों ! तथा (देवा) देवतारूपी तुम (अस्मयू) हमसे मिलनेकी चाह रखनेवाले होकर (मक्षुयुभिः हयेभिः) शीघ्रगामी घोडोंसे (आ यातं) आ जाओ ॥

[३८२]

३८२ अधा॑ ह॒ यन्तो॑ अ॒श्विना॒ पृक्षः॑ सचन्त सू॒रयः॑ ।
ता यं॑सतो म॒घव॑द्भ्यो ध्रु॒वं यशः॑श्छ॒र्दिर॒स्मभ्यं॒ नास॑त्या॥५

३८२ अध॑ । ह॒ । यन्तः॑ । अ॒श्विना॑ ।
पृक्षः॑ । स॒च॒न्त॒ । सू॒रयः॑ ॥
ता । यं॒स॒तः॒ । म॒घव॑त्ऽभ्यः । ध्रु॒वम् । यशः॑ ।
छ॒र्दिः । अ॒स्मभ्य॑म् । नास॑त्या ॥५॥

३८१ अन्वयः– नासत्या अश्विना ! अधा सूरयः यन्तः पृक्षः सचन्त, मघवद्भ्यः अस्मभ्यं ता छर्दिः ध्रुवं यशः यंसतः ॥ ५ ॥

३८१ अर्थ– हे सत्यपालक अश्विदेवों ! (अधा सूरयः) अब विद्वान् लोग (यन्तः) यत्न करनेपर (पृक्षः सचन्त ह) अन्न प्राप्त करते हैं, (मघवद्भ्यः अस्मभ्यं) धनिक हम लोगोंको (ता) प्रसिद्ध तुम दोनों (छर्दिः) घर और (ध्रुवं यशः यंसतः) स्थिर यश देदो ॥

३८१ भावार्थ– विद्वान् लोग प्रयत्न करके अन्न प्राप्त करते हैं । उस अन्नका वे यज्ञ करते हैं, जिससे उत्तम घर और स्थिर यश मिलता है ।

३८१ मानवधर्म– मनुष्य सत्यका पालन करें, विद्वान् बनकर प्रयत्नसे विविध अन्न प्राप्त करें, उसका यज्ञ करें, (सबकी भलाईके लिये उसका समर्पण करें,) और इससे अनेकोंको आश्रय देनेवाला घर और स्थायी यश कमावें ।

[३८३]

३८३ प्र ये य॒युर॑वृ॒कासो॒ रथा॑इव नृ॒पाता॑रो॒ जना॑नाम् ।
उ॒त स्वेन॒ शव॑सा शूशुवु॒र्नर॑ उ॒त क्षि॑यन्ति सु॒क्षि॒तिम्॥६॥

३८३ प्र । ये । य॒युः । अ॒वृ॒कास॑ः । रथा॑ःऽइव ।
नृ॒ऽपा॒तार॑ः । जना॑नाम् ॥
उ॒त । स्वेन॑ । शव॑सा । शू॒शु॒वुः॒ । नर॑ः ।
उ॒त । क्षि॒यन्ति॒ । सु॒ऽक्षि॒तिम् ॥६॥

३८३ अन्वयः– ये जनानां नृपातारः अवृकासः रथा-इव प्र ययुः; उत नरः स्वेन शवसा शूशुवुः उत सुक्षितिं क्षियन्ति ॥ ६ ॥

३८३ अर्थ— (ये जनानां) जो लोगोंके (नृपातारः) पालक (अ-वृकासः) भेडियेके गुणोंको अर्थात् क्रूरताको छोडकर (रथाः इव प्र ययुः) रथोंके समान आगे बढते हैं, (उत नरः) तथा वे नेता (स्वेन शवसा) अपने निजी बलसे (शूशुवुः) बढ गये और (उत सुक्षितिं क्षियन्ति) वैसेही अच्छे स्थानमें रहते हैं ॥

३८३ भावार्थ— सब लोगोंकी सुरक्षा करो, क्रूर न बनो, आगे बढकर प्रगति करो, अपना बल बढाकर समर्थ बनो और उत्तम भूमिमें उत्तम ढंगसे रहो ।

[३८४] (ऋ. ८।५।१—३७)

(३८४-४२०) ब्रह्मातिथिः काण्वः । (३७ पूर्वार्धस्य) । गायत्री; ३७ बृहती ।

३८४ दूरादिहेव यत् सत्यरुणप्सुरशिश्वितत् ।
वि भानुं विश्वधातनत् ॥१॥

३८४ दूरात् । इहऽइव । यत् । सती ।
अरुणऽप्सुः । अशिश्वितत् ॥
वि । भानुम् । विश्वधा । अतनत् ॥१॥

३८४ अन्वयः- यत् अरुणप्सुः दूरात् इह इव सती अशिश्वितत् भानुं विश्वधा वि अतनत् ॥ १ ॥

३८४ अर्थ- (यत्) जब (अरुणप्सुः) लाल रंगवाली उषा (दूरात् इह इव सती) दूरसेही मानों इधरही आती हुई सी (अशिश्वितत्) क्रमशः श्वेत वर्णवाली हुई, तब (भानुं) सूर्यको (विश्वधा) सभी प्रकारसे (वि अतनत्) फैला चुकी हैं ॥

३८४ भावार्थ- जब लाल रंगवाली उषा श्वेत वर्णवाली बनने लगी तबा विशेष प्रकाश हुआ और सूर्य भी चमकने लगा ।

[३८५]

३८५ नृवद् दस्रा मनोयुजा रथेन पृथुपाजसा ।
सचेथे अश्विनोषसम् ॥२॥

३८५ नृऽवत् । दस्रा । मनःऽयुजा ।
रथेन । पृथुऽपाजसा ॥
सचेथे इति । अश्विना । उषसम् ॥२॥

३८५ अन्वयः— दस्रा अश्विना ! नृवत् मनोयुजा पृथुपाजसा रथेन उषसं सचेथे ॥२॥

३८५ अर्थ— हे (दस्रा) शत्रुविनाशक अश्विदेवों ! (नृवत्) तुम नेत-के समान हो और (मनो-युजा) मनमें इच्छा करतेही आते हैं, और (पृथु-पाजसा रथेन) बडे विशाल बल या अन्नवाले रथसे (उषसं सचेथे) उषाके साथ साथ चलने लगते हो ॥

[३८६]

३८६ युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्षत ।
वाचं दूतो यथोहिषे ॥३॥

३८६ युवाभ्याम् । वाजिनीवसू इति वाजिनीऽवसू ।
प्रति । स्तोमाः । अदृक्षत ॥
वाचम् । दूतः । यथा । ओहिषे ॥३॥

३८६ अन्वयः— वाजिनीवसू ! युवाभ्यां प्रति स्तोमाः अदृक्षत, दूत यथा वाचं ओहिषे ॥३ ॥

३८६ अर्थ— हे (वाजिनी-वसू) धनको बसानेवाले अश्विदेवों (युवाभ्यां प्रति) तुम्हारी ओर (स्तोमाः अदृक्षत) स्तोत्र आते हुए दीख पडते हैं; (दूतः यथा) दूत जैसे करता है, वैसेही (वाचं ओहिषे) वाणीकं मैं तुम्हारेतक पहुँचाता हूँ ॥

३८६ भावार्थ— अश्विदेव धनको देते हैं, इसलिये उनके स्तोत्र गा जाते हैं, और सेवकके समान उनके विषयमें वर्णन करते हैं ।

[३८७]

३८७ पुरुप्रिया ण ऊतये पुरुमन्द्रा पुरूवसू ।
स्तुषे कण्वासो अश्विना ॥४॥

३८७ पुरुऽप्रिया । नः । ऊतये ।
पुरुऽमन्द्रा । पुरुवसू इति पुरुऽवसू ॥
स्तुषे । कण्वासः । अश्विना ॥४॥

३८७ अन्वयः— नः ऊतये पुरुप्रिया पुरुमन्द्रा पुरूवसू अश्विना कण्वास स्तुषे ॥ ४ ॥

३८७ अर्थ— (नः ऊतये) हमारी सुरक्षाके लिये (पुरुप्रिया) बहुतों प्यारे (पुरुमन्द्रा) बहुतोंको अत्यन्त हर्षित करनेवाले (पुरुवसू) अधिक ध देनेवाले अश्विदेवोंकी (कण्वासः स्तुषे) कण्व परिवारका मैं स्तुति करता हूं ॥

३८७ टिप्पणी — यहां 'कण्वासः' पद कण्व कुलके अनेक ऋषियोंव वाचक है ।

*

[३८८]

३८८ मंहिष्ठा वाजसातमेषयन्ता शुभस्पती ।
गन्तारा दाशुषो गृहम् ॥५॥

३८८ मंहिष्ठा । वाजऽसातमा ।
इषयन्ता । शुभः । पती इति ॥
गन्तारा । दाशुषः । गृहम् ॥५॥

३८८ अन्वयः- मंहिष्ठा वाजसातमा शुभस्पती इषयन्ता, दाशुषः गृहं गन्तारा ॥ ५ ॥

३८८ अर्थ— (मंहिष्ठा) अत्यन्त महनीय, (वाजसातमा) यथेष्ट अन्न, बल देनेहारे (शुभस्पती) शुभ कार्योंके पालनकर्ता (इषयन्ता) अन्न उत्पन्न करनेहारे और (दाशुषः गृहं) दानी पुरुषके घरपर (गन्तारा) जानेवाले अश्विदेव हैं ॥

३८८ भावार्थ-बडे, अन्नदान करनेवाले, शुभ कार्य करनेवाले, अन्न उत्पन्न करनेवाले, दाताकी सहायतार्थ उसके घर जानेवाले अश्विदेव हैं। (वैसे-ही मनुष्य बनें) ।

[३८९]

३८९ ता सुदेवाय दाशुषे सुमेधामवितारिणीम् ।
घृतैर्गव्यूतिमुक्षतम् ॥६॥

३८९ ता । सुऽदेवाय । दाशुषे ।
सुऽमेधाम् । अविऽतारिणीम् ॥
घृतैः । गव्यूतिम् । उक्षतम् ॥६॥

३८९ अन्वयः— सुदेवाय दाशुषे ता अवितारिणीं सुमेधां गव्यूतिं घृतैः उक्षतम् ॥ ६ ॥

३८९ अर्थ— (सुदेवाय) अच्छे तेजस्वी (दाशुषे) दानीके लिये (ता) वे विख्यात तुम दोनों अश्विदेव (अवितारिणीं) नष्ट न होनेवाली (सुमेधां) अच्छी बुद्धि तथा (गव्यूतिं घृतैः उक्षतं) गौओंकी सुरक्षा करनेवाली शक्तिको घृतोंसे सींच देवें ॥

३८९ भावार्थ- अच्छे दाताकी तारक और गोरक्षक-बुद्धिको और संरक्षक-शक्तिको अश्विदेव घृतादिसे अधिक समर्थ बनावें ।

३८९ मानवधर्म- घृतादि पदार्थोंका सेवन करके अपनी तारक-शक्ति, सुबुद्धि और गोरक्षणकी शक्ति बढावें ।

[३९०]

३९० आ नः स्तोममुप द्रवत् तूयं श्येनेभिराशुभिः।
यातमश्वेभिरश्विना ॥७॥

३९० आ । नः । स्तोमम् । उप । द्रवत् ।
तूयम् । श्येनेभिः । आशुऽभिः ॥
यातम् । अश्वेभिः । अश्विना ॥७॥

३९० अन्वयः- अश्विना ! श्येनेभिः आशुभिः अश्वेभिः नः स्तोमं उप तूयं द्रवत् आ यातम् ॥ ७ ॥

३९० अर्थ— हे अश्विदेवों ! (श्येनेभिः) श्येनपक्षीके समान (आशुभिः अश्वेभिः) शीघ्रगामी घोडोंसे (नः स्तोमं उप) हमारे यज्ञके समीप (तूयं द्रवत्) जल्द और दौडते दौडते (आ यातं) आओ ॥

[३९१]

३९१ येभिस्तिस्रः परावतो दिवो विश्वानि रोचना ।
त्रीँरक्तून् परिदीयथः ॥८॥

३९१ येभिः । तिस्रः । पराऽवतः ।
दिवः । विश्वानि । रोचना ॥
त्रीन् । अक्तून् । परिऽदीयथः ॥८॥

३९१ अन्वयः- तिस्रः दिवः त्रीन् अक्तून् परावतः येभिः विश्वानि रोचना परिदीयथः ॥ ८ ॥

३९१ अर्थ- (तिस्रः दिवः) तीन दिन और (त्रीन् अक्तून्) तीन रातों-तक (परावतः) दूर देशसे (येभिः) जिन यानोंकी सहायतासे (विश्वानि रोचना) सभी जगमगाते तेजो-गोलोंके (परि-दीयथः) इर्दगिर्द तुम संचार करते हो उन्हींपर बैठकर इधर आओ ॥

३९१ टिप्पणी— अश्विदेवोंके यान श्येनपक्षीके सदृश आकाशमें तीन दिन और तीन रातोंतक अविकल रूपसे संचार करते थे।

[३९२]

३९२ उत नो गोमतीरिष उत सातीरहर्विदा ।
वि पथः सातये सितम् ॥९॥

३९२ उत । नः । गोऽमतीः । इषः ।
उत । सातीः । अहःऽविदा ॥
वि । पथः । सातये । सितम् ॥९॥

३९२ अन्वयः— अहर्विदा ! उत नः गोमतीः इषः उत सातीः; सातये पथः वि सितम् ॥ ९ ॥

३९२ अर्थ— हे (अहर्विदा) दिनको जतलानेहारे ! (उत) और एक बात है कि (नः गोमतीः इषः) हमें गायोंसे युक्त अन्न (उत सातीः) और बाँटने-योग्य संपत्तियाँ देदो, (सातये) ठीक दान करनेके लिये (पथः वि सितं) मार्ग बतला दो ॥

[३९३]

३९३ आ नो गोमन्तमश्विना सुवीरं सुरथं रयिम् ।
वोळ्हमश्वावतीरिषः ॥१०॥

३९३ आ । नः । गोऽमन्तम् । अश्विना ।
सुऽवीरम् । सुऽरथम् । रयिम् ॥
वोळ्हम् । अश्वऽवतीः । इषः ॥१०॥

३९३ अन्वयः— अश्विना ! नः अश्वावतीः इषः गोमन्तं सुरथं सुवीरं रयिं आ वोळ्हम् ॥ १० ॥

३९३ अर्थ— हे अश्विदेवों ! (नः) हमें (अश्वावतीः इषः) घोडोंसे पूर्ण अन्न (सुरथं सुवीरं रयिं) अच्छे रथ तथा वीर संतानसे युक्त धन (आ वोळ्हं) पहुँचा दो ॥

[३९४]

३९४ वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी ।
पिबतं सोम्यं मधु ॥११॥

३९४ वावृधाना । शुभः । पती इति ।
दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी ॥
पिबतम् । सोम्यम् । मधु ॥११॥

३९४ अन्वयः— शुभस्पती ! दस्रा ! हिरण्यवर्तनी ! वावृधाना सोम्यं मधु पिबतम् ॥ ११ ॥

३९४ अर्थ– हे (शुभः-पती) शुभ कार्योंके अधिपति ! (दस्रा) शत्रु-विनाशक ! (हिरण्यवर्तनी) स्वर्णमय रथवाले अश्विदेवों ! (वावृधाना) बढते हुए तुम दोनों (सोम्यं मधु पिबतं) सोमरससे मिलाये शहदका पान करे ॥

[३९५]

३९५ अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः ।
छर्दिर्यन्तमदाभ्यम् ॥१२॥

३९५ अस्मभ्यम् । वाजिनीवसू इति वाजिनीऽवसू ।
मघवत्ऽभ्यः । च । सऽप्रथः ॥
छर्दिः । यन्तम् । अदाभ्यम् ॥१२॥

३९५ अन्वयः— वाजिनी-वसू ! अस्मभ्यं मघवद्भ्यः च सप्रथः अदाभ्यं छर्दिः यन्तम् ॥ ११ ॥

३९५ अर्थ– हे (वाजिनी-वसू) सेनारूपी धनवाले ! (अस्मभ्यं) हमें (मघवद्भ्यः च) और धनिकोंको (सप्रथः) अत्यन्त विस्तीर्ण (अदाभ्यं छर्दिः यन्तं) दबानेमें असंभव याने सुदृढ घर देदो ॥

[३९६]

३९६ नि षु ब्रह्म जनानां याविष्टं तूयमा गतम् ।
मो ष्व१न्याँ उपारतम् ॥१३॥

३९६ नि । सु । ब्रह्म । जनानाम् ।
या । अविष्टम् । तूयम् । आ । गतम् ॥
मो इति । सु । अन्यान् । उप । अरतम् ॥१३॥

३९६ अन्वयः- या जनानां ब्रह्म सु नि अविष्टं, तूयं आगतं, अन्यान् मो सु उपारतम् ॥ १३ ॥

३९६ अर्थ- (या) जो तुम दोनों (जनानां ब्रह्म) जनताके ज्ञानको (सु नि अविष्टं) भली भाँति खूब सुरक्षित रख चुके, ऐसे तुम (तूयं आगतं) बहुत जल्द आओ (अन्यान्) दूसरोंके (उप) समीप (मो सु आरतं) कभी न जाओ ॥

[३९७]

३९७ अस्य पिबतमश्विना युवं मदस्य चारुणः ।
मध्वो रातस्य धिष्ण्या ॥१४॥

३९७ अस्य । पिबतम् । अश्विना ।
युवम् । मदस्य । चारुणः ॥
मध्वः । रातस्य । धिष्ण्या ॥१४॥

३९७ अन्वयः- धिष्ण्या अश्विना ! अस्य चारुणः मदस्य मध्वः रातस्य पिबतम् ॥ १४ ॥

३९७ अर्थ—हे (धिष्ण्या) पूजनीय अश्विदेवों ! (अस्य चारुणः) इस सुन्दर (मदस्य मध्वः) हर्षजनक, मीठे सोमको जोकि (रातस्य) दान दिया जा चुका है (पिबतं) तुम पीजाओ ॥

[३९८]

३९८ अस्मे आ वहतं रयिं शतवन्तं सहस्रिणम् ।
पुरुक्षुं विश्वधायसम् ॥१५॥

३९८ अस्मे इति । आ । वहतम् । रयिम् ।
शतऽवन्तम् । सहस्रिणम् ॥
पुरुऽक्षुम् । विश्वऽधायसम् ॥१५॥

३९८ अन्वयः- पुरुक्षुं विश्वधायसं शतवन्तं सहस्रिणं रयिं अस्मे आ वहतम् ॥ १५ ॥

३९८ अर्थ— हे अश्विदेवों ! (पुरुक्षुं) बहुतोंको निवास देनेवाले (विश्व-धायसं) सभीका धारण करनेहारे (शतवन्तं सहस्रिणं रयिं) सैकडों हजारों संख्यावाले धनको (अस्मे आ वहतम्) हमें पहुँचादो ॥

[३९९]

३९९ पुरुत्रा चिद्धि वां नरा विह्वयन्ते मनीषिणः ।
वाघद्भिरश्विना गतम् ॥१६॥

३९९ पुरुऽत्रा । चित् । हि । वाम् । नरा ।
विऽह्वयन्ते । मनीषिणः ॥
वाघत्ऽभिः । अश्विना । आ । गतम् ॥१६॥

३९९ अन्वयः- अश्विना ! मनीषिणः नराः वां पुरुत्रा चित् हि वि-ह्वयन्ते; वाघद्भिः आ गतम् ।। १६ ।।

३९९ अर्थ- (मनीषिणः नराः) मननशील नेता (वां) तुम्हें (पुरुत्रा चित् हि) सभी स्थानोंमें जरूर (वि-ह्वयन्ते) विशेष रूपसे बुलाते हैं, इसलिए (वाघद्भिः आ गतं) वाहनोंसे आओ ॥

[४००]

४०० जनासो वृक्तबर्हिषो हविष्मन्तो अरंकृतः ।
युवां हवन्ते अश्विना ॥१७॥

४०० जनासः । वृक्तऽबर्हिषः ।
हविष्मन्तः । अरम्ऽकृतः ॥
युवाम् । हवन्ते । अश्विना ॥१७॥

४०० अन्वयः— अश्विना ! वृक्तबर्हिषः हविष्मन्तः अरंकृतः जनासः युवां हवन्ते ॥ १७ ॥

४०० अर्थ— (वृक्तबर्हिषः) कुशासन फैलाये हुए (हविष्मन्तः अरंकृतः) हविवाले, अलंकृत (जनासः) लोग (युवां हवन्ते) तुम्हें बुलाते हैं ।

[४०१]

४०१ अस्माकमद्य वामयं स्तोमो वाहिष्ठो अन्तमः ।
युवाभ्यां भूत्वश्विना ॥१८॥

४०१ अस्माकम् । अद्य । वाम् । अयम् ।
स्तोमः । वाहिष्ठः । अन्तमः ॥
युवाभ्याम् । भूतु । अश्विना ॥१८॥

४०१ अन्वयः- अद्य अश्विना ! अस्माकं अयं वां वाहिष्ठः स्तोमः युवाभ्यां अन्तमः भूतु ॥ १८ ॥

४०१ अर्थ- (अद्य) आज हे अश्विदेवों ! (अस्माकं अयं) हमारा यह (वां वाहिष्ठः) तुम्हारे प्रति अत्यन्त आतुरतासे जानेवाला (स्तोमः) स्तोत्र (युवाभ्यां अन्तमः भूतु) तुम्हारे अतीव निकट चला जाए ॥

[४०२]

४०२ यो ह वां मधुनो दृतिराहितो रथचर्षणे ।
तर्तः पिबतमश्विना ॥१९॥

४०२ यः । ह । वाम् । मधुनः । दृतिः ।
आऽहितः । रथऽचर्षणे ॥
ततः । पिबतम् । अश्विना ॥१९॥

४०२ अन्वयः- अश्विना ! वां रथचर्षणे यः मधुनः दृतिः आहितः ह ततः पिबतम् ॥ १९ ॥

४०२ अर्थ— हे अश्विदेवों ! (वां रथचर्षणे) तुम्हारे रथके देखनेयोग्य भागमें (यः मधुनः दृतिः) जो मधुका बर्तन (आहितः ह) रखा हुआ है, (ततः पिबतं) उससे पान करो ॥

[४०३]

४०३ तेन नो वाजिनीवसू पश्वे तोकाय शं गवे ।
वहतं पीवरीरिषः ॥२०॥

४०३ तेन । नः । वाजिनीवसू इति वाजिनीऽवसू ।
पश्वे । तोकाय । शम् । गवे ॥
वहतम् । पीवरीः । इषः ॥२०॥

४०३ अन्वयः — वाजिनी-वसू ! नः पश्वे तोकाय गवे शं पीवरीः इषः तेन वहतम् ॥ २० ॥

४०३ अर्थ- हे (वाजिनी—वसू) यज्ञक्रियाको धन माननेवाले अश्विदेवों ! (नः पश्वे तोकाय) हमारे पशु तथा संतान और (गवे) गौके लिए (शं) सुखकारक हो इस ढंगसे (पीवरीः इषः) पुष्ट अन्नसामग्रियाँ (तेन वहतं) उस रथसे इधर ले आओ ॥

[४०४]

४०४ उत नो दिव्या इषं उत सिन्धूँरहर्विदा ।
अप द्वारेव वर्षथः ॥२१॥

४०४ उत । नः । दिव्याः । इषः ।
उत । सिन्धून् । अहःऽविदा ॥
अप । द्वाराऽइव । वर्षथः ॥२१॥

४०४ अन्वयः- अहर्विदा ! उत नः दिव्याः इषः उत सिन्धून् द्वारा इव अप वर्षथः ॥ २१ ॥

४०४ अर्थ- हे (अहः विदा) दिनको जतलानेहारे ! (उत) और (नः) हमें (दिव्याः इषः) उच्चकोटिकी अन्नसामग्रियाँ (उत सिन्धून्) तथा बहनेवाले जलसमूहोंको, (द्वारा इव) मार्गसे जल जैसे छोडे जाते हैं वैसेही, (अप वर्षथः) तुम बारिश लगातार कर देते रहो ॥

[४०५]

४०५ कदा वां तौग्र्यो विधत् समुद्रे जहितो नरा ।
यद् वां रथो विभिष्पतात् ॥२२॥

४०५ कदा । वाम् । तौग्र्यः । विधत् ।
समुद्रे । जहितः । नरा ॥
यत् । वाम् । रथः । विऽभिः । पतात् ॥२२॥

४०५ अन्वयः — नरा ! समुद्रे जहितः तौग्र्यः वां कदा विधत् ? वां रथः यत् विभिः पतात् ॥२२॥

४०५ अर्थ- हे (नरा) नेता अश्विदेवो ! (समुद्रे जहितः तौग्र्यः) समुन्दरमें फेंका हुआ तुग्रका पुत्र (वां कदा विधत्) तुम्हारी स्तुति भला कब करचुका ? (वां रथः) तुम्हारा रथ (यत् विभिः पतात्) जब पक्षी जैसा उडते हुए आगया था ॥

❀

[४०६]

४०६ युवं कण्वाय नासत्याऽपिरिप्ताय हर्म्ये ।
शश्वदूतीर्दशस्यथः ॥२३॥

४०६ युवम् । कण्वाय । नासत्या ।
अपिऽरिप्ताय । हर्म्ये ॥
शश्वत् । ऊतीः । दशस्यथः ॥२३॥

४०६ अन्वयः— नासत्या ! अपिरिप्ताय कण्वाय युवं शश्वत् हर्म्ये ऊतीः दशस्यथः ॥ २३ ॥

४०६ अर्थ— हे सत्यपालक अश्विदेवों ! (अपिरिप्ताय कण्वाय) दुःखी कण्वको (युवं) तुम (शश्वत्) हमेशा (हर्म्ये) ऊँचे महलमें (ऊतीः दशस्यथः) अनेक संरक्षण देते हो ॥

[४०७]

४०७ ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः ।
यद् वां वृषण्वसू हुवे ॥२४॥

४०७ ताभिः । आ । यातम् । ऊतिऽभिः ।
नव्यसीभिः । सुशस्तिऽभिः ॥
यत् । वाम् । वृषण्वसू इति वृषण्ऽवसू । हुवे ॥२४॥

४०७ अन्वयः- वृषण्वसू ! यत् वां हुवे, नव्यसीभिः सुशस्तिभिः ताभि ऊतिभिः आ यातम् ॥२४॥

४०७ अर्थ- हे (वृषण्वसू !) धनकी वर्षा करनेहारे अश्विदेवों ! (यत् वां हुवे) चूँकि मैं तुम्हें बुला रहा हूँ इसलिए (नव्यसीभिः सुशस्तिभिः) नई भलीभाँति प्रशंसनीय बातोंसे और (ताभिः ऊतिभिः) उन संरक्षणोंसे युक्त होकर (आ यातं) इधर आओ ॥

[४०८]

४०८ यथा चित् कण्वमावतं प्रियमेधमुपस्तुतम् ।
अत्रिं शिञ्जारमश्विना ॥२५॥

४०८ यथा । चित् । कण्वम् । आवतम् ।
प्रियऽमेधम् । उपऽस्तुतम् ॥
अत्रिम् । शिञ्जारम् । अश्विना ॥२५॥

४०८ अन्वयः- अश्विना ! यथा शिञ्जारं अत्रिं उपस्तुतं प्रियमेधं कण्वं चित् आवतम् ॥२५॥

४०८ अर्थ- हे अश्विदेवों ! (यथा शिञ्जारं अत्रिं) जैसे शिंजारको, अत्रिको, (उपस्तुतं प्रियमेधं कण्वं चित्) उपस्तुतको, प्रियमेधको और कण्वको भी (आवतं) तुमने सुरक्षित किया ॥

[४०९]

४०९ यथोत कृत्व्ये धनेंऽशुं गोष्वगस्त्यम् ।
यथा वाजेषु सोभरिम् ॥२६॥

४०९ यथा । उत । कृत्व्ये । धने ।
अंशुम् । गोषु । अगस्त्यम् ॥
यथा । वाजेषु । सोभरिम् ॥२६॥

४०९ अन्वयः- उत यथा कृत्व्ये धने अंशुं गोषु अगस्त्यं, यथा सोभरिं वाजेषु ॥२६॥

४०९ अर्थ- (उत) और (यथा कृत्व्ये धने) जैसे संपादन करनेयोग्य धनको पानेमें (अंशुं) अंशुको (गोषु अगस्त्यं) गौवोंकी प्राप्तिमें अगस्त्यको (यथा सोभरिं वाजेषु) जैसे सोभरिको युद्धोंमें तुमने बचाया था ॥

[४१०]

४१० एतावद् वां वृषण्वसू अतो वा भूयो अश्विना ।
गृणन्तः सुम्नमीमहे ॥२७॥

४१० एतावत् । वाम् । वृषण्वसू इति वृषण्ऽवसू ।
अतः । वा । भूयः । अश्विना ॥
गृणन्तः । सुम्नम् । ईमहे ॥२७॥

४१० अन्वयः— वृषण्वसू अश्विना ! गृणन्तः वां एतावत् अतः भूयः वा सुम्नं ईमहे ॥२७॥

४१० अर्थ– वैसेही हे (वृषण्वसू) धनकी वर्षा करनेहारे अश्विदेवों ! (वां गृणन्तः) तुम्हारी सराहना करते हुए (एतावत्) इतना (अतः भूयः वा) या इससे भी अधिक (सुम्नं ईमहे) सुखकी याचना हम करते हैं ॥

[४११]

४११ रथं हिरण्यवन्धुरं हिरण्याभीशुमश्विना ।
आ हि स्थाथों दिविस्पृशम् ॥२८॥

४११ रथम् । हिरण्यऽवन्धुरम् ।
हिरण्यऽअभीशुम् । अश्विना ॥
आ । हि । स्थाथः । दिविऽस्पृशम् ॥२८॥

४११ अन्वयः— अश्विना ! हिरण्यवन्धुरं हिरण्य-अभीशुं दिवि स्पृशं रथं आस्थाथः हि ॥ २८ ॥

४११ अर्थ— हे अश्विदेवों ! (हिरण्यवन्धुरं) सुवर्णमय लट्ठवाले (हिरण्य-अभीशुं) सुनहरे चाबुक या लगामवाले (दिवि-स्पृशं) द्युलोकको छूनेवाले (रथं आ स्थाथः हि) रथपर तुम अवश्य चढ जाते हो ॥

[४१२]

४१२ हिरण्ययीं वां रभिरीषा अक्षो हिरण्ययः ।
उभा चक्रा हिरण्यया ॥२९॥

४१२ हिरण्ययीं । वाम् । रभिः ।
ईषा । अक्षः । हिरण्ययः ॥
उभा । चक्रा । हिरण्यया ॥२९॥

४११ अन्वयः— वां रभिः ईषा हिरण्ययी अक्षः हिरण्ययः उभा चक्रा हिरण्यया ॥२९॥

४१२ अर्थ— (वां रभिः इषा हिरण्ययी) तुम्हारी आलंबन देनेवाली लकडी सुनहली है, (अक्षः हिरण्ययः) पहियेकी धुरी सुवर्णमय है (उभा चक्रा हिरण्यया) दोनों पहिये भी सुवर्णके बने हुए हैं ॥

[४१३]

४१३ तेन॑ नो वाजिनीवसू परावत॑श्चिदा ग॑तम् ।
उपे॒मां सु॑ष्टु॒तिं मम॑ ॥३०॥

४१३ तेन॑ । नः॒ । वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू । प॒रा॒ऽवत॑ः । चि॒त् । आ । ग॒त॒म् ॥
उप॑ । इ॒माम् । सु॒ऽस्तु॒तिम् । मम॑ ॥३०॥

४१३ अन्वयः— वाजिनी-वसू ! तेन इमां मम सुष्टुतिं नः परावतः चित् उप आ गतम् ॥३०॥

४१३ अर्थ— हे (वाजिनी-वसू) बलको धन समझनेवाले ! (तेन) इस रथसे (इमां मम सुष्टुतिं) इस मेरी अच्छी स्तुतिको सुननेके लिये (नः) हमारे पास (परावतः चित्) दूर देशसे भी (उप आ गतं) समीप आओ ॥

[४१४]

४१४ आ व॑हेथे प॒राका॑त् पू॒र्वीर॒श्नन्ता॑वश्विना ।
इषो॒ दासी॑रमर्त्या ॥३१॥

४१४ आ । व॒हे॒थे॒ इति॑ । प॒राका॑त् । पू॒र्वीः । अ॒श्नन्तौ॑ । अ॒श्वि॒ना॒ ॥
इषः॑ । दासीः॑ । अ॒म॒र्त्या॒ ॥३१॥

४१४ अन्वयः— अमर्त्या अश्विना ! पूर्वीः दासीः इषः अश्नन्तौ पराकात् आ वहेथे ॥ ३१ ॥

४१४ अर्थ— हे (अमर्त्या) अ-मरणशील अश्विदेवों ! (पूर्वीः दासीः इषः) बहुतसी दासोंकी अन्नसामग्रियाँ (अश्नन्तौ) प्राप्त करते हुए (पराकात् आ वहेथे) सुदूर देशसे इधर आ पहुँचते हो ॥

[४१५]

४१५ आ नो॑ द्यु॒म्नैरा श्रवो॑भि॒रा रा॒या या॑तमश्विना ।
पुरु॑श्च॒न्द्रा नास॑त्या ॥३२॥

४१५ आ । नः । द्युम्नैः । आ । श्रवःऽभिः ।
आ । राया । यातम् । अश्विना ॥
पुरुऽचन्द्रा । नासत्या ॥ ३२ ॥

४१५अन्वयः— पुरु-चन्द्रा ! नासत्या अश्विना ! नः द्युम्नैः श्रवोभिः राया आ यातम् ॥ ३२ ॥

४१५ अर्थ— हे (पुरु-चन्द्रा) बहुतोंको आनन्द देनेवाले एवं सत्यपूर्ण अश्विदेवों ! (नः) हमारे समीप (द्युम्नैः श्रवोभिः राया) धनों, अन्नों तथा वैभवसे युक्त होकर (आ यातं) आओ ॥

[४१६]

४१६ एह वां प्रुषितप्सवो वयो वहन्तु पर्णिनः ।
अच्छा स्वध्वरं जनम् ॥३३॥

४१६ आ । इह । वाम् । प्रुषितऽप्सवः ।
वयः । वहन्तु । पर्णिनः ॥
अच्छ । सुऽअध्वरम् । जनम् ॥ ३३ ॥

४१६ अन्वयः— इह पर्णिनः प्रुषित-प्सवः वयः स्वध्वरं जनं अच्छ वां आ वहन्तु ॥ ३३ ॥

४१६ अर्थ— (इह) इधर (पर्णिनः) पंखवाले (प्रुषितप्सवः वयः) स्निग्धरूपवाले एवं गतिशील पक्षी जैसे घोडे (स्वध्वरं जनं अच्छ) अच्छे अहिंसक कार्य करनेवाले लोगोंके प्रति (वां आ वहन्तु) तुम्हें ले आयँ ॥

[४१७]

४१७ रथं वामनुगायसं य इषा वर्तते सह ।
न चक्रमभि बाधते ॥३४॥

४१७ रथम् । वाम् । अनुऽगायसम् ।
यः । इषा । वर्तते । सह ॥
न । चक्रम् । अभि । बाधते ॥३४॥

४१७ अन्वयः- यः इषा सह वर्तते (तं) वां अनुगायसं रथं चक्रं न अभि बाधते ॥ ३४ ॥

४१७ अर्थ- (यः इषा सह वर्तते) जो अन्नके साथ रहता है उस (वां अनुगायसं रथं) तुम्हारे रथको जिसके पीछे स्तुति करनेवाले लोग रहते हैं (चक्रं न अभि बाधते) शत्रुसैन्य कष्ट नहीं पहुँचाता है ॥

[४१८]

४१८ हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः ।
धीजवना नासत्या ॥३५॥

४१८ हिरण्ययेन । रथेन ।
द्रवत्पाणिऽभिः । अश्वैः ॥
धीऽजवना । नासत्या ॥३५॥

४१८ अन्वयः— धीजवना नासत्या ! द्रवत्पाणिभिः अश्वैः हिरण्ययेन रथेन (आ यातम्) ॥ ३५ ॥

४१८ अर्थ— हे (धी-जवना) बुद्धिके तुल्य वेगवाले सत्यपूर्ण अश्विदेवो ! (द्रवत्-पाणिभिः अश्वैः) दौडते हुए घोडोंसे और (हिरण्ययेन रथेन) सुवर्णमय रथसे आओ ॥

[४१९]

४१९ युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू ।
ता नः पृङ्क्तमिषा रयिम् ॥३६॥

४१९ युवम् । मृगम् । जागृऽवांसम् ।
स्वदथः । वा । वृषण्वसू इति वृषण्ऽवसू ॥
ता । नः । पृङ्क्तम् । इषा । रयिम् ॥३६॥

४१९ अन्वयः— वृषण्वसू ! युवं वा जागृवांसं मृगं स्वदथः, ता नः रयिं इषा पृङ्क्तम् ॥ ३६ ॥

४१९ अर्थ— हे (वृषण्वसू) धनकी वर्षा करनेहारे ! (युवं वा) तुम तो (जागृवांसं मृगं स्वदथः) जागृत एवं ढूँढनेयोग्य सोमका सेवन करते हो, ऐसे (ता) वे दोनों (नः रयिं) हमारे धनको (इषा पृङ्क्तं) अन्नसे जोड दो ॥

[४२०]

४२० ता मे अश्विना सनीनां विद्यातं नवानाम् ॥३७॥

४२० ता । मे । अश्विना । सनीनाम् ।
विद्यातम् । नवानाम् ॥३७॥

४२० अन्वयः- अश्विना ! ता मे नवानां सनीनां विद्यातम् ॥ ३७ ॥

४२० अर्थ- हे अश्विदेवों! ऐसे तुम विख्यात (ता) वे दोनों (मे) मेरेलिए (नवानां सनीनां विद्यातं) नये प्रदानोंको जान लो ॥

॥४२१॥ (ऋ. ८।८।१-२३)
(४२१-४४३) सध्वंसः काण्वः । अनुष्टुप् ।

४२१ आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवम् ।
दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु ॥१॥

४२१ आ । नः । विश्वाभिः । ऊतिऽभिः ।
अश्विना । गच्छतम् । युवम् ॥
दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी ।
पिबतम् । सोम्यम् । मधु ॥१॥

४२१ अन्वयः— अश्विना ! दस्रा ! हिरण्यवर्तनी ! युवं विश्वाभिः ऊतिभिः नः आगच्छतं, सोम्यं मधु पिबतम् ॥ १ ॥

४२१ अर्थ- हे अश्विदेवों ! हे (दस्रा) शत्रुविध्वंसक ! हे (हिरण्यवर्तनी) सुवर्णमय रथवाले ! (युवं) तुम दोनों (विश्वाभिः ऊतिभिः) सभी संरक्षण आयोजनाओंके साथ (नः आगच्छतं) हमारे समीप आओ और (सोम्यं मधु पिबतं) सोमरसरूपी मीठे रसका पान करो ॥

[४२२]

४२२ आ नूनं यातमश्विना रथेन सूर्यत्वचा ।
भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥२॥

४२२ आ । नूनम् । यातम् । अश्विना ।
रथेन । सूर्यऽत्वचा ॥
भुजी इति । हिरण्यऽपेशसा ।
कवी इति । गम्भीरऽचेतसा ॥२॥

४२२ अन्वयः- भुजी ! हिरण्यपेशसा ! कवी ! गंभीरचेतसा अश्विना ! नूनं सूर्यत्वचा रथेन आ यातम् ॥ २ ॥

४२२ अर्थ- हे (भुजी) भोगयोग्य साधनोंसे पूर्ण ! हे (हिरण्यपेशसा) सुवर्णके बने अलंकार धारण करनेहारे ! हे (कवी गंभीरचेतसा) क्रांतदर्शी विशाल मनवाले अश्विदेवों ! (नूनं) अब सचमुच (सूर्यत्वचा रथेन आ यातं) सूर्यसदृश कांतिवाले रथपर चढकर इधर पधारो ॥

[४२३]

४२३ आ यातं नहुषस्पर्यान्तरिक्षात् सुवृक्तिभिः ।
पिबाथो अश्विना मधु कण्वानां सवने सुतम् ॥३॥

४२३ आ । यातम् । नहुषः । परि । आ ।
अन्तरिक्षात् । सुवृक्तिऽभिः ॥
पिबाथः । अश्विना । मधु ।
कण्वानाम् । सवने । सुतम् ॥३॥

४२३ अन्वयः- अश्विना ! सुवृक्तिभिः अन्तरिक्षात् नहुषः परि आ यातं; कण्वानां सवने सुतं मधु पिबाथः ॥ ३ ॥

४२३ अर्थ— हे अश्विदेवों ! (सुवृक्तिभिः) सुन्दर स्तुतियोंके कारण आकर्षित होकर (अन्तरिक्षात् नहुषः परि) अन्तरिक्षमेंसे या मानवी लोकमें-से भी (आ यातं) आओ और कण्वोंके (सवने सुतं) यज्ञमें निष्पादित (मधु पिबाथः) मीठे सोमरसको पी जाओ ॥

*

[४२४]

४२४ आ नो यातं दिवस्पर्यान्तरिक्षादधप्रिया ।
पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु ॥४॥

४२४ आ । नः । यातम् । दिवः । परि । आ ।
अन्तरिक्षात् । अधऽप्रिया ॥
पुत्रः । कण्वस्य । वाम् । इह ।
सुसाव । सोम्यम् । मधु ॥४॥

४२४ अन्वयः— दिवः परि आ अन्तरिक्षात् नः आ यातं, अधप्रिया ! कण्वस्य पुत्रः इह वां सोम्यं मधु सुषाव ॥ ४ ॥

४२४ अर्थ— (दिवः परि) द्युलोकसे तथा (आ अन्तरिक्षात्) अन्तरिक्षसे भी (नः आ यातं) हमारे समीप आओ; हे (अधप्रिया) अधोभाग अर्थात् भूलोकको चाहनेवालो ! (कण्वस्य पुत्रः) कण्वके पुत्रने (इह) इस जगह (वां) तुम्हारे लिए (सोम्यं मधु सुषाव) सोमसे युक्त शहदका सृजन किया है ॥

[४२५]

४२५ आ नो यातमुपश्रुत्यश्विना सोमपीतये ।
स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा ॥५॥

४२५ आ । नः । यातम् । उपऽश्रुति ।
अश्विना । सोमऽपीतये ॥
स्वाहा । स्तोमस्य । वर्धना ।
प्र । कवी इति । धीतिऽभिः । नरा ॥५॥

४२५ अन्वयः— नरा ! कवी ! अश्विना ! स्वाहा स्तोमस्य प्र वर्धना नः उपश्रुति धीतिभिः सोमपीतये आ यातम् ॥ ५ ॥

४२५ अर्थ— हे (नरा ! कवी !) नेता और क्रान्तदर्शी अश्विदेवो ! तुम (स्वाहा स्तोमस्य प्र वर्धना) सर्वस्व त्यागद्वारा स्तोत्रके बढानेहारे हो, इसलिए (नः उपश्रुति) हमारे यज्ञमें (धीतिभिः सोम-पीतये आ यातं) कर्मोंके साथ किये जानेवाले सोमपानके लिए आओ ॥

[४२६]

४२६ यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा ।
आ यातमश्विना गतमुपेमां सुष्टुतिं मम ॥६॥

४२६ यत् । चित् । हि । वाम् । पुरा । ऋषयः ।
जुहूरे । अवसे । नरा ॥
आ । यातम् । अश्विना । आ । गतम् ।
उप । इमाम् । सुऽस्तुतिम् । मम ॥६॥

४२६ अन्वयः— नरा अश्विना ! पुरा ऋषयः यत् चित् अवसे वां हि जुहूरे, आ यातं; मम इमां सुष्टुतिं उप आ गतम् ॥ ६ ॥

४२६ अर्थ— हे (नरा) नेता अश्विदेवों ! (पुरा ऋषयः) पहले ऋषिओंने (यत् चित्) जब कभी (अवसे) रक्षाके लिए (वां हि जुहूरे) तुम्हेंही पुकारा था तब तुमने उसे सुन लिया था, इसलिए अब भी (आ यातं) आओ; (मम इमां सुस्तुतिं) मेरी इस अच्छी स्तुतिको सुनकर (उप आ गतं) समीप आजाओ ॥

[४२७]

४२७ दिवश्चिद् रोचनादध्या नो गन्तं स्वर्विदा ।
धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥७॥

४२७ दिवः । चित् । रोचनात् । अधि ।
आ । नः । गन्तम् । स्वःऽविदा ॥
धीभिः । वत्सऽप्रचेतसा ।
स्तोमेभिः । हवनऽश्रुता ॥७॥

४२७ अन्वयः—स्वः-विदा ! हवन-श्रुता ! वत्स-प्रचेतसा ! स्तोमेभिः धीभिः रोचनात् दिवः चित् नः अधि आ गन्तम् ॥ ७ ॥

४२७ अर्थ- (स्वः-विदा) हे स्वकीय शक्तिको जाननेवाले ! (हवन-श्रुता) हमारी पुकारको सुननेवालो ! (वत्स-प्रचेतसा) पुत्रपर करनेयोग्य प्रेम करनेवाले ! (स्तोमेभिः धीभिः) स्तोत्रोंसे और कर्मोंसे (रोचनात् दिवः चित्) जगमगाते द्युलोकसे भी (नः अधि आ गन्तम्) हमारे समीप आओ ॥

[४२८]

४२८ किमन्ये पर्यासतेऽस्मत् स्तोमेभिरश्विना ।
पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत् ॥८॥

४२८ किम् । अन्ये । परि । आसते ।
अस्मत् । स्तोमेभिः । अश्विना ॥
पुत्रः । कण्वस्य । वाम् । ऋषिः ।
गीःऽभिः । वत्सः । अवीवृधत् ॥८॥

४२८ अन्वयः— अस्मत् अन्ये किं स्तोमेभिः अश्विना परि आसते ? कण्वस्य पुत्रः ऋषिः वत्सः वां गीर्भिः अवीवृधत् ॥ ८ ॥

४२८ अर्थ-(अस्मत् अन्ये) हमें छोडकर दूसरे लोग (किं स्तोमेभिः) क्या स्तोत्रोंसे (अश्विना परि आसते) अश्विदेवोंके चारों ओर प्रार्थना करनेके लिए बैठते हैं ? कण्वके पुत्र वत्स ऋषिने (वां) तुम्हें (गीर्भिः अवीवृधत्) स्तुतिसे खूब बढाया है– प्रोत्साहित किया है ॥

[४२९]

४२९ आ वां विप्र इहावसेऽह्वत् स्तोमेभिरश्विना ।
अरिप्रा वृत्रहन्तमा ता नो भूतं मयोभुवा ॥९॥

४२९ आ । वाम् । विप्रः । इह । अवसे ।
अह्वत् । स्तोमेभिः । अश्विना ॥
अरिप्रा । वृत्रहन्ऽतमा ।
ता । नः । भूतम् । मयःऽभुवा ॥९॥

४२९ अन्वयः- अरिप्रा वृत्रहन्तमा अश्विना ! इह अवसे विप्रः वां आ अह्वत्; ता नः मयोभुवा भूतम् ॥ ९ ॥

४२९ अर्थ- हे (अ-रिप्रा) दोषरहित तथा (वृत्रहन्तमा) वृत्रके अत्यन्त विनाशकर्ता अश्विदेवों ! (इह अवसे) इधर रक्षाके लिए (विप्रः) ज्ञानी पुरुष (वां आ अह्वत) तुम्हें बुलाता है (ता) वे विख्यात तुम दोनों (नः मयोभुवा भूतं) हमारे लिए सुखदायक बनो ॥

[४३०]

४३० आ यद् वां योषणा रथमतिष्ठद्वाजिनीवसू ।
विश्वान्यश्विना युवं प्र धीतान्यगच्छतम् ॥१०॥

४३० आ । यत् । वाम् । योषणा । रथम् ।
अतिष्ठत् । वाजिनीवसू इति वाजिनीऽवसू ॥
विश्वानि । अश्विना । युवम् ।
प्र । धीतानि । अगच्छतम् ॥१०॥

४३० अन्वयः— वाजिनी-वसू ! अश्विनौ ! यत् वां रथं योषणा आ अतिष्ठत् युवं विश्वानि धीतानि प्र अगच्छतम् ॥ १० ॥

४३० अर्थ— हे (वाजिनी-वसू) बलशाली धनवाले अश्विदेवो ! (यत् वां रथं) जब तुम्हारे रथपर (योषणा आ अतिष्ठत्) महिला पूर्णतया चढ गयी थी, तब (युवं) तुम दोनों (विश्वानि धीतानि) सभी ध्यानमें रखे हुए विषयोंके समीप (प्र अगच्छतं) प्रकर्षसे चले गये थे ॥

[४३१]

४३१ अतः सहस्रनिर्णिजा रथेना यातमश्विना ।
वत्सो वां मधुमद्वचोऽशंसीत् काव्यः कविः ॥११॥

४३१ अतः । सहस्रऽनिर्निजा ।
रथेन । आ । यातम् । अश्विना ॥
वत्सः । वाम् । मधुऽमत् । वचः ।
अशंसीत् । काव्यः । कविः ॥११॥

४३१ अन्वयः- कविः काव्यः वत्सः वां मधुमत् वचः अशंसीत् अतः अश्विना ! सहस्र-निर्णिजा रथेन आ यातम् ॥ ११ ॥

४३१ अर्थ- (कविः) विद्वान् (काव्यः वत्सः) कविका पुत्र ऋषि वत्स (वां) तुम दोनोंके लिए (मधुमत् वचः अशंसीत्) मधुर भाषण कह चुका, (अतः) इसलिए हे अश्विदेवो ! (सहस्र—निर्णिजा रथेन आ यातं) सहस्र प्रकारसे तेजस्वी रथपर चढकर आओ ॥

[४३१]

४३२ पुरुमन्द्रा पुरूवसू मनोतरा रयीणाम् ।
स्तोमं मे अश्विनाविममभि वह्नी अनूषाताम् ॥१२॥

४३२ पुरुऽमन्द्रा । पुरुवसू इति पुरुऽवसू ।
मनोतरा । रयीणाम् ॥
स्तोमम् । मे । अश्विनौ । इमम् ।
अभि । वह्नी इति । अनूषाताम् ॥१२॥

४३१ अन्वयः— रयीणां मनोतरा ! पुरुमन्द्रा ! पुरूवसू अश्विना ! वह्नी मे इमं स्तोमं अभि अनूषाताम् ॥ १२ ॥

४३१ अर्थ— हे (रयीणां मनोतरा) धनसंपदाओंके मनःपूर्वक देनेवाले ! (पुरुमन्द्रा) बहुत आनन्द देनेवाले ! (पुरूवसू) अधिक धनवाले अश्विदेवों ! तुम (वह्नी) ढोनेवाले हो और (मे इमं स्तोमं) मेरे इस स्तोत्रको (अभि अनूषातां) सुनकर प्रशंसित करो ।।

[४३३]

४३३ आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया ।
कृतं न ऋत्वियावतो मा नो रीरधतं निदे॥१३॥

४३३ आ । नः । विश्वानि । अश्विना ।
धत्तम् । राधांसि । अह्रया ॥
कृतम् । नः । ऋत्वियऽवतः ।
मा । नः । रीरधतम् । निदे ॥१३॥

४३३ अन्वयः- अश्विना ! नः विश्वानि अह्रया राधांसि आ धत्तं नः ऋत्वियावतः कृतं, निदे नः मा रीरधतम् ॥ १३ ॥

४३३ अर्थ— हे अश्विदेवों ! (नः) हमें (विश्वानि अह्रया राधांसि) सभी प्रकारके लज्जा न करनेवाले धन (आ धत्तं) लादो, (नः ऋत्वियावतः कृतं) हमें समयके अनुकूल कार्य करनेवाले बना दो और (निदे) निन्दकके लिए (नः मा रीरधतं) हमें न दे डालो [अर्थात् हम निन्दकसे कोसों दूर रह सकें ऐसा प्रबंध कर डालो] ॥

[४३४]

४३४ यन्नासत्या परावति यद्वा स्थो अध्यम्बरे ।
अतः सहस्रनिर्णिजा रथेना यातमश्विना ॥१४॥

४३४ यत् । नासत्या । पराऽवति ।
यत् । वा । स्थः । अधि । अम्बरे ॥
अतः । सहस्रऽनिर्निजा ।
रथेन । आ । यातम् । अश्विना ॥१४॥

४३४ अन्वयः— नासत्या अश्विना ! यत् परावति स्थः यत् वा अंबरे अधि (स्थः) अतः सहस्रनिर्णिजा रथेन आ यातम् ॥१४॥

४३४ अर्थ– हे सत्ययुक्त अश्विदेवों ! (यत् परावति स्थः) जो तुम सुदूर देशमें हो (यत् वा) या तो (अम्बरे अधि स्थः) समीपही कहीं विद्यमान हो, (अतः) उस स्थानसे (सहस्रनिर्णिजा रथेन) सहस्रों शोभावाले रथपरसे (आ यातं) आओ ॥

[४३५]

४३५ यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत् ।
तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतम् ॥१५॥

४३५ यः । वाम् । नासत्यौ । ऋषिः ।
गीःऽभिः । वत्सः । अवीवृधत् ॥
तस्मै । सहस्रऽनिर्निजम् ।
इषम् । धत्तम् । घृतऽश्चुतम् ॥१५॥

४३५ अन्वयः— नासत्यौ ! यः वत्सः ऋषिः वां गीर्भिः अवीवृधत् तस्मै घृतश्चुतं सहस्रनिर्णिजं इषं धत्तम् ॥ १५॥

४३५ अर्थ— हे सत्यनिष्ठ अश्विदेवों ! (यः वत्सः ऋषिः) जो ऋषि वत्स (वां गीर्भिः अवीवृधत्) तुम्हें अपने भाषणोंसे वृद्धिंगत-प्रशंसित-कर चुका है, (तस्मै) (उसे घृतश्चुतं) घी टपकानेवाले (सहस्रनिर्णिजं इषं धत्तं) सहस्र शोभा देनेवाले अन्नको दे डालो ॥

[४३६]

४३६ प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवम् ।
यो वां सुम्नाय तुष्टवद्वसूयाद्दानुनस्पती ॥१६॥

४३६ प्र । अस्मै । ऊर्जम् । घृतऽश्चुतम् ।
अश्विना । यच्छतम् । युवम् ॥
यः । वाम् । सुम्नाय । तुस्तवत् ।
वसुऽयात् । दानुनः । पती इति ॥१६॥

४३६ अन्वयः— दानुनःपती अश्विना ! यः सुम्नाय वां तुष्टवत्, वसू-यात् अस्मै युवं घृतश्चुतं ऊर्जं प्र यच्छतम् ॥ १६ ॥

४३६ अर्थ- हे (दानुनःपती) दानके अधिपति अश्विदेवों ! (यः सुम्नाय) जो सुखके लिए (वां तुष्टवत्) तुम्हारी स्तुति कर चुका है और (वसू-यात्) धनकी कामना करने लगे, (अस्मै) इसके लिए (युवं) तुम दोनों (घृतश्चुतं ऊर्जं प्र यच्छतं) घी टपकानेवाले बलकारी अन्न देओ ॥

[४३७]

४३७ आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा ।
कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥१७॥

४३७ आ । नः । गन्तम् । रिशादसा ।
इमम् । स्तोमम् । पुरुऽभुजा ॥
कृतम् । नः । सुऽश्रियः । नरा ।
इमा । दातम् । अभिष्टये ॥१७॥

४३७ अन्वयः- नरा ! रिशादसा पुरुभुजा ! नः इमं स्तोमं आ गन्तं, नः सुश्रियः कृतं, अभिष्टये इमा दातम् ॥ १७ ॥

४३७ अर्थ— हे (नरा) नेता ! (रिशादसा पुरुभुजा) हिंसकोंके विनाशकर्ता और बहुत भोगवाले ! (नः इमं स्तोमं) हमारे इस स्तोत्रको सुनकर (आ गन्तं) आओ, (नः सुश्रियः कृतं) हमें सुन्दर शोभासे युक्त करो और (अभिष्टये इमा दातं) सुखकी प्राप्तिके लिए इन आवश्यक वस्तुओंको देदो ॥

[४३८]

४३८ आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
राजन्तावध्वराणामश्विना यामहूतिषु ॥१८॥

४३८ आ । वाम् । विश्वाभिः । ऊतिऽभिः ।
प्रियऽमेधाः । अहूषत ॥
राजन्तौ । अध्वराणाम् ।
अश्विना । यामऽहूतिषु ॥१८॥

४३८ अन्वयः— अश्विना ! अध्वराणां राजन्तौ वां याम-हूतिषु विश्वाभिः ऊतिभिः प्रियमेधाः आ अहूषत ॥ १८ ॥

४३८ अर्थ— हे अश्विदेवों ! (अध्वराणां राजन्तौ वां) हिंसारहित कार्योंमें विराजमान तुम्हें (याम-हूतिषु) यात्रामें सम्मिलित होनेके लिए किये जानेवाले स्तोत्रपाठोंमें (विश्वाभिः ऊतिभिः) सभी संरक्षण आयोजनाओंके साथ आनेके लिये (प्रियमेधाः आ अहूषत) प्रियमेध लोगोंने पूर्णतया तुम्हें बुलाया है ॥

[४३९]

४३९ आ नो गन्तं मयोभुवाऽश्विना शंभुवा युवम् ।
यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत् ॥१९॥

४३९ आ । नः । गन्तम् । मयःऽभुवा ।
अश्विना । शम्ऽभुवा । युवम् ॥
यः । वाम् । विपन्यू इति । धीतिऽभिः ।
गीःऽभिः । वत्सः । अवीवृधत् ॥१९॥

४३९ अन्वयः— विपन्यू अश्विना ! युवं नः आ गन्तं; यः वत्सः मयो-भुवा शंभुवा वां धीतिभिः गीर्भिः अवीवृधत् ॥ १९ ॥

४३९ अर्थ- हे (विपन्यू) प्रशंसनीय अश्विदेवों ! (युवं नः आ गन्तं) तुम दोनों हमारे समीप आओ; (यः वत्सः) जो वह वत्स ऋषि (मयो-भुवा शंभुवा वां) सुखदायक एवं शान्तिदायक तुम्हें (धीतिभिः गीर्भिः अवीवृधत्) कर्मोंसे तथा भाषणोंसे प्रशंसित करता है ॥

*

[४४०]

४४० याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजम् ।
याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥२०॥

४४० याभिः । कण्वम् । मेधऽअतिथिम् ।
याभिः । वशम् । दशऽव्रजम् ॥
याभिः । गोऽशर्यम् । आवतम् ।
ताभिः । नः । अवतम् । नरा ॥२०॥

४४० अन्वयः— नरा ! याभिः मेधातिथिं कण्वं, याभिः दश-व्रजं वशं, याभिः गो-शर्यं आवतं ताभिः नः अवतम् ॥ २० ॥

४४० अर्थ— हे (नरा) नेता अश्विदेवों ! (याभिः) जिनकी सहायतासे मेधातिथि कण्वकी (याभिः दशव्रजं वशं) जिनसे दस बाडे रखनेवाले वश की और (याभिः गो-शर्यं आवतं) जिनसे जीर्णशीर्ण गायें रखनेवालेकी रक्षा की थी, (ताभिः नः अवतं) उनसे हमें बचाओ ॥

[४४१]

४४१ याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने ।
ताभिः ष्व१स्माँ अश्विना प्रावतं वाजसातये ॥२१॥

४४१ याभिः । नरा । त्रसदस्युम् ।
आवतम् । कृत्व्ये । धने ॥
ताभिः । सु । अस्मान् । अश्विना ।
प्र । अवतम् । वाजऽसातये ॥२१॥

४४१ अन्वयः— नरा अश्विना ! कृत्व्ये धने याभिः त्रसदस्युं आवतं ताभिः अस्मान् वाजसातये सु प्र अवतम् ॥२१॥

४४१ अर्थ- (कृत्व्ये धने) निष्पादनीय धनके बारेमें जिनसे त्रसदस्युकी (आवतं) रक्षा की थी, (ताभिः) उनसे (अस्मान्) हमें (वाजसातये) धनका बँटवारा करनेके लिए (सु प्र अवतं) भलीभाँति सुरक्षित रखो ॥

[४४२]

४४२ प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना ।
पुरुत्रा वृत्रहन्तमा ता नो भूतं पुरुस्पृहा ॥२२॥

४४२ प्र । वाम् । स्तोमाः । सुऽवृक्तयः ।
गिरः । वर्धन्तु । अश्विना ॥
पुरुऽत्रा । वृत्रहन्ऽतमा ।
ता । नः । भूतम् । पुरुऽस्पृहा ॥२२॥

४४२ अन्वयः- पुरुत्रा ! वृत्रहन्तमा अश्विना ! वां सुवृक्तयः गिरः स्तोमाः प्र वर्धन्तु, ता नः पुरुस्पृहा भूतम् ॥ २२ ॥

४४२ अर्थ— हे (पुरुत्रा) बहुत लोगोंके त्राणकर्ता और (वृत्रहन्तमा) वृत्रके अत्यन्त विनाशकर्ता अश्विदेवों ! (वां सुवृक्तयः गिरः) तुम दोनोंको भलीभाँति रचे हुए भाषण और (स्तोमाः प्र वर्धयन्तु) स्तोत्र खूब बढायें, (ता) वे विख्यात तुम दोनों (नः पुरुस्पृहा भूतं) हमारे लिए अत्यन्त स्पृहणीय बनो ॥

[४४३]

४४३ त्रीणि पदान्यश्विनोराविः सान्ति गुहा परः ।
कवी ऋतस्य पत्मभिरर्वाग् जीवेभ्यस्परि ॥२३॥

४४३ त्रीणि । पदानि । अश्विनोः ।
आविः । सन्ति । गुहा । परः ॥
कवी इति । ऋतस्य । पत्मऽभिः ।
अर्वाक् । जीवेभ्यः । परि ॥२३॥

४४३ अन्वयः— अश्विनोः गुहा त्रीणि पदानि परः आविः सन्ति; ऋतस्य पत्मभिः कवी जीवेभ्यः अर्वाक् परि ॥ २३ ॥

४४३ अर्थ- अश्विदेवोंके (गुहा) गुहामें रखे हुए (त्रीणि पदानि) तीन पद (परः आविः सन्ति) परले स्थानमें प्रकट हुए हैं; (ऋतस्य पत्मभिः) ऋतके मार्गोंसे (कवी) विद्वान् अश्विदेव (जीवेभ्यः अर्वाक्) जीवोंके लिए अभिमुख होकर (परि) ऊपरसे आते हैं ॥

[४४४] (ऋ. ८।९।१-२१)

(४४४-४६४) शशकर्णः काण्वः। अनुष्टुप्; १,४,६,१४-१५, बृहती; २-३,२०-२१ गायत्री; ५ ककुप्; १० त्रिष्टुप्; ११ विराट्; १२ जगती।

४४४ आ नूनमश्विना युवं वत्सस्य गन्तमवसे।
प्रास्मै यच्छतमवृकं पृथु च्छर्दिर्युयुतं या अरातयः ॥१॥

४४४ आ। नूनम्। अश्विना। युवम्।
वत्सस्य। गन्तम्। अवसे॥
प्र। अस्मै। यच्छतम्। अवृकम्। पृथु। छर्दिः।
युयुतम्। याः। अरातयः ॥१॥

४४४ अन्वयः— अश्विना! युवं नूनं वत्सस्य अवसे आ गन्तं, अस्मै पृथु अवृकं छर्दिः प्र यच्छतं, याः अरातयः युयुतम् ॥ १ ॥

४४४ अर्थ— हे अश्विदेवों! (युवं) तुम दोनों (नूनं) अब सचमुच (वत्सस्य अवसे आगतं) वत्सकी रक्षाके लिए आओ (अस्मै) इसे (पृथु) विस्तीर्ण (अवृकं छर्दिः प्र यच्छतं) वृक-भेडिये जैसे क्रोधी कोगोंसे रहित घर देदो; पश्चात् (याः अरातयः युयुतं) जो शत्रु हैं, उन्हें दूर कर दो॥

[४४५]

४४५ यदुन्तरिक्षे यद् दिवि यत् पञ्च मानुषाँ अनु।
नृम्णं तद् धत्तमश्विना ॥२॥

४४५ यत्। अन्तरिक्षे। यत्। दिवि।
यत्। पञ्च। मानुषान्। अनु॥
नृम्णम्। तत्। धत्तम्। अश्विना ॥२॥

४४५ अन्वयः— अश्विना! यत् नृम्णं अन्तरिक्षे, यत् दिवि, यत् पञ्च मानुषान् अनु तत् धत्तम् ॥ २ ॥

४४५ अर्थ— हे अश्विदेवों! (यत् नृम्णं) जो धन अन्तरिक्षमें (यत् दिवि) जो द्युलोकमें (यत् पञ्च मानुषान् अनु) जो पांच तरहके मानव-वर्गोंके पास पाया जाता है, (तत् धत्तं) उसे हमारे लिए धर दो॥

[४४६]

४४६ ये वां दंसांस्यश्विना विप्रासः परिमामृशुः ।
एवेत् काण्वस्यं बोधतम् ॥३॥

४४६ ये । वाम् । दंसांसि । अश्विना ।
विप्रांसः । परिऽममृशुः ॥
एव । इत् । काण्वस्यं । बोधतम् ॥३॥

४४६ अन्वयः— अश्विना ! ये विप्रासः वां दंसांसि परि ममृशुः एव इत् काण्वस्य बोधतम् ॥ ३ ॥

४४६ अर्थ— हे अश्विदेवों ! (ये विप्रासः) जो ज्ञानी (वां दंसांसि तुम्हारे कर्मोंको (परि ममृशुः) पूर्णतया सोच चुके हैं, (एव इत्) उसी प्रकार (काण्वस्य बोधतं) कण्व पुत्रकी प्रार्थनाको जान लो ॥

[४४७]

४४७ अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।
अयं सोमो मधुमान् वाजिनीवसू येन वृत्रं चिकेतथः॥४॥

४४७ अयम् । वाम् । घर्मः । अश्विना ।
स्तोमेन । परि । सिच्यते ॥
अयम् । सोमः । मधुऽमान् । वाजिनीवसू इति वाजिनीऽवसू ।
येन । वृत्रम् । चिकेतथः ॥४॥

४४७ अन्वयः- वाजिनी-वसू अश्विना ! वां अयं घर्मः स्तोमेन परि षिच्यते; मधुमान् अयं सोमः येन वृत्रं चिकेतथः ॥ ४ ॥

४४७ अर्थ— हे (वाजिनी-वसू) सेनारूपी धनवाले ! (वां) तुम्हारेलिए (अयं घर्मः) यह यज्ञ (स्तोमेन) स्तोत्रपाठके साथ (परि सिच्यते) पूर्णतया सींचा जाता है; (मधुमान् अयं सोमः) मधुरिमामय यह सोम है (येन) जिससे, तुम (वृत्रं चिकेतथः) वृत्रको पहचान लेते हो ॥

[४४८]

४४८ यदुप्सु यद्वनस्पतौ यदोषंधीषु पुरुदंससा कृतम् ।
तेनं माऽविष्टमश्विना ॥५॥

४४८ यत् । अप्ऽसु । यत् । वनस्पतौ ।
यत् । ओषंधीषु । पुरुऽदंससा । कृतम् ॥
तेनं । मा । अविष्टम् । अश्विना ॥५॥

४४८ अन्वयः— पुरुदंससा अश्विना ! यत् ओषधीषु यत् वनस्पतौ यत् अप्सु कृतं तेन मा अविष्टम् ॥ ५ ॥

४४८ अर्थ— हे (पुरु-दंससा) विविध कार्यवाले ! (यत् ओषधीषु) जो औषधियोंमें (यत् वनस्पतौ) जो बडे भारी पेडमें तथा (यत् अप्सु) जो जलोंमें (कृतं) तुमने कार्य किया है, (तेन) उसीसे (मा अविष्टं) मेरी भी रक्षा करो ॥

[४४९]

४४९ यन्नासत्या भुरण्यथो यद् वा देव भिषज्यथः ।
अयं वां वत्सो मतिभिर्न विन्धते हविष्मन्तं हि गच्छथः ॥

४४९ यत् । नासत्या । भुरण्यथः ।
यत् । वा । देवा । भिषज्यथः ॥
अयम् । वाम् । वत्सः । मतिऽभिः । न । विन्धते ।
हविष्मन्तम् । हि । गच्छथः ॥६॥

४४९ अन्वयः— देवा नासत्या ! यत् भुरण्यथः यत् वा भिषज्यथः अयं वत्सः वां मतिभिः न विन्धते, हविष्मन्तं हि गच्छथः ॥ ६ ॥

४४९ अर्थ- हे (देवा) दानी या द्योतमान सत्यपूर्ण अश्विदेवों ! (यत् भुरण्यथः) जो तुम भरणका कार्य करते हो, (यत् वा) या जो तुम (भिषज्यथः) औषध देकर वैद्यका कार्य करते हो, (अयं वत्सः) यह वत्स (वां) तुम्हें (मतिभिः न विन्धते) बुद्धियोंसे नहीं पाता है, क्योंकि तुम (हविष्मन्तं हि गच्छथः) हवि साथ रखनेवालेके पासही जाते हो ॥

[४५०]

४५० आ नूनमश्विनोर्ऋषिः स्तोमं चिकेत वामया ।
आ सोमं मधुमत्तमं घर्मं सिञ्चादथर्वणि ॥७॥

४५० आ । नूनम् । अश्विनोः । ऋषिः ।
स्तोमम् । चिकेत । वामया ॥
आ । सोमम् । मधुमत्ऽतमम् ।
घर्मम् । सिञ्चात् । अथर्वणि ॥७॥

४५० अन्वयः- नूनं ऋषिः अश्विनोः स्तोमं वामया आ चिकेत, मधुमत्तमं सोमं घर्मं अथर्वणि आ सिञ्चात् ॥७॥

४५० अर्थ- (नूनं) सचमुच ऋषि (अश्विनोः स्तोमं) अश्विदेवोंके स्तोत्रको (वामया आ चिकेत) उत्कृष्ट बुद्धिसे पूर्णतया पहचाना है (मधुमत्तमं सोमं घर्मं) अत्यन्त मीठे सोमको तथा घर्मको (अथर्वणि आ सिंचत्) अथर्वामें सींच चुका है ॥

[४५१]

४५१ आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना ।
आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥८॥

४५१ आ । नूनम् । रघुऽवर्तनिम् ।
रथम् । तिष्ठाथः । अश्विना ॥
आ । वाम् । स्तोमाः । इमे । मम ।
नभः । न । चुच्यवीरत ॥८॥

४५१ अन्वयः- नूनं रघुवर्तनिं रथं अश्विना! आ तिष्ठाथः, मम इमे स्तोमाः नभः न वां आ चुच्यवीरत ॥८॥

४५१ अर्थ- (नूनं) सचमुच (रघुवर्तनिं रथं) शीघ्रगामी रथपर हे अश्विदेवो! (आ तिष्ठाथः) तुम चढते हो; (मम इमे स्तोमाः) मेरे ये स्तोत्र (नभः न) आकाशकी तरह विशाल (वां) तुम्हारे (आ चुच्यवीरत) पास पहुँचे हैं ॥

[४५२]

४५२ यदुद्य वां नासत्योक्थैराचुच्युवीमहि ।
यद् वा वाणीभिराश्विनेवेत् काण्वस्य बोधतम् ॥९॥

४५२ यत् । अद्य । वाम् । नासत्या ।
उक्थैः । आऽचुच्युवीमहि ॥
यत् । वा । वाणीभिः । अश्विना ।
एव । इत् । काण्वस्य । बोधतम् ॥९॥

४५१ अन्वयः-- नासत्या अश्विना ! यत् उक्थैः अद्य वां आचुच्युवीमहि यत् वा वाणीभिः, काण्वस्य एव इत् बोधतम् ॥९॥

४५१ अर्थ— हे असत्यसे रहित अश्विदेवों ! (यत्) जब (उक्थैः) स्तोत्रोंसे (अद्य वां) आज दिन हम तुम्हें (आचुच्युवीमहि) अपनी ओर प्रवृत्त करते हैं, (यत् वा वाणीभिः) या साधारण भाषणोंसे ऐसा करते हैं, तो (काण्वस्य एव इत् बोधतं) निश्चय जानो कि यह कण्वपुत्रकाही कार्य है ॥

[४५३]

४५३ यद् वां कक्षीवाँ उत यद् व्यश्व ऋषिर्यद् वां दीर्घतमा जुहाव । पृथी यद् वां वैन्यः सादनेष्वेवेदतो अश्विना चेतयेथाम् ॥१०॥

४५३ यत् । वाम् । कक्षीवान् । उत । यत् । विऽअश्वः ।
ऋषिः । यत् । वाम् । दीर्घऽतमाः । जुहाव ॥
पृथी । यत् । वाम् । वैन्यः । सदनेषु ।
एव । इत् । अतः । अश्विना । चेतयेथाम् ॥१०॥

४५३ अन्वयः- अश्विना ! वां यत् कक्षीवान् उत यत् व्यश्वः, यत् वां दीर्घतमाः जुहाव, सदनेषु यत् वैन्यः पृथ्वी वां, अतः एव चेतयेथाम् ॥१०॥

४५३ अर्थ- हे अश्विदेवों ! (वां यत्) तुम्हें जब कक्षीवान्ने (उत यत्) और जब व्यश्वने तथा (यत् वां दीर्घतमाः जुहाव) जिस समय तुम्हें दीर्घतमाने बुलाया था; (सदनेषु यत्) घरोंमें जबकि वेनपुत्र पृथीने (वां) तुम्हें पुकारा था, तब तुमने उधर ध्यान दिया, (अतः एव) इसीलिए अबकी बार भी (चेतयेथां) हमारी पुकारको पहचान लो ॥

[४५४]

४५४ यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उत नस्तनूपा।
वर्तिस्तोकाय तनयाय यातम् ॥११॥

४५४ यातम् । छर्दिःऽपौ । उत । नः । परःऽपा ।
भूतम् । जगत्ऽपौ । उत । नः । तनूऽपा ॥
वर्तिः । तोकाय । तनयाय । यातम् ॥११॥

४५४ अन्वयः- छर्दिःपौ ! यातं, उत नः परःपा भूतम्, जगत्-पौ उत नः तनूपा, तोकाय तनयाय वर्तिः यातम् ॥११॥

४५४ अर्थ— हे (छर्दिःपौ) घरके संरक्षक ! (यातं) जाओ (उत) और (नः परःपा भूतं) हमारे अत्यन्त उच्च कोटिके रक्षक बनो, तथा (जगत्-पौ) गतिशीलके रक्षक (उत नः तनूपाः) एवं हमारे शरीरके संरक्षक हो जाओ, (तोकाय तनयाय) पुत्रपौत्रके हितके लिए (वर्तिः यातं) घरपर आया करो ॥

[४५५]

४५५ यदिन्द्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा । यदादित्येभिर्ऋभुभिः सजोषसा यद् वा विष्णोर्विक्रमणेषु तिष्ठथः ॥१२॥

४५५ यत् । इन्द्रेण । सऽरथम् । याथः । अश्विना ।
यत् । वा । वायुना । भवथः । सम्ऽओकसा ॥
यत् । आदित्येभिः । ऋभुऽभिः । सऽजोषसा ।
यत् । वा । विष्णोः । विऽक्रमणेषु । तिष्ठथः ॥१२॥

*

४५५ अन्वयः- अश्विना! यत् इन्द्रेण सरथं याथः, यत् वा वायुना समोकसा भवथः, यत् आदित्येभिः ऋभुभिः सजोषसा यत् वा विष्णोः विक्रमणेषु तिष्ठथः ॥१२॥

४५५ अर्थ- हे अश्विदेवों! (यत् इन्द्रेण) जो तुम इन्द्रके साथ (सरथं याथः) एक रथपर बैठकर चले जाते हो, (यत् वा) अथवा (वायुना समोकसा भवथः) वायुके साथ एकही घरमें रहते हो, (यत्) या जब (आदित्येभिः ऋभुभिः) अदितिके पुत्रों या ऋभु-संज्ञक कारीगरोंके (सजोषसा) साथ प्रेमपूर्वक निवास करते हो, (यत् वा) किंवा जब (विष्णोः विक्रमणेषु तिष्ठथः) विष्णुके विशेष संचारोंमें तुम उपस्थित होते हो, [पर हमारे समीप अवश्य आओ] ॥

[४५६]

४५६ यदुद्याश्विनावहं हुवेय वाजसातये ।
यत् पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥१३॥

४५६ यत् । अद्य । अश्विनौ । अहम् ।
हुवेय । वाजऽसातये ॥
यत् । पृत्ऽसु । तुर्वणे । सहः ।
तत् । श्रेष्ठम् । अश्विनोः । अवः ॥१३॥

४५६ अन्वयः- अद्य यत् वाजसातये अहं अश्विनौ हुवेय, अश्विनोः तत् अवः श्रेष्ठं यत् पृत्सु तुर्वणे सहः ॥१३॥

४५६ अर्थ- (अद्य यत्) आज जबकि (वाजसातये) अन्नका बँटवारा करनेके लिए (अहं अश्विनौ हुवेय) मैं अश्विदेवोंको बुलाऊँ तो वे अवश्य आयेंगे, क्योंकि (अश्विनोः तत् अवः) अश्विदेवोंका वह संरक्षण (श्रेष्ठं यत् पृत्सु) उत्कृष्ट है, जो युद्धोंमें (तुर्वणे सहः) शत्रुवध करनेमें पूर्ण क्षमता रखता है ॥

[४५७]

४५७ आ नूनं यातमश्विनेमा हव्यानि वां हिता ।
इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ ॥१४॥

४५७ आ । नूनम् । यातम् । अश्विना ।
इमा । हव्यानि । वाम् । हिता ॥
इमे । सोमासः । अधि । तुर्वशे । यदौ ।
इमे । कण्वेषु । वाम् । अथ ॥१४॥

४५७ अन्वयः — अश्विना ! नूनं आ यातं, वां इमा हव्यानि हिता; इमे सोमासः तुर्वशे यदौ अधि, इमे कण्वेषु अथ वाम् ॥१४॥

४५७ अर्थ- हे अश्विदेवो ! (नूनं) अवश्य (आ यातं) आओ, (वां इमा हव्यानि हिता) तुम दोनोंके लिए ये हविर्भाग रखे हुए हैं; (इमे सोमासः) ये सोम (तुर्वशे यदौ अधि) तुर्वश एवं यदुके घरपर पाये जाते हैं, (इमे कण्वेषु) ये कण्वोंके मकानपर विद्यमान हैं (अथ वां) और अब ये तुम्हारे लिए रखे हैं ॥

[४५८]

४५८ यन्नासत्या पराके अर्वाके अस्ति भेषजम् ।
तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतम् ॥१५॥

४५८ यत् । नासत्या । पराके ।
अर्वाके । अस्ति । भेषजम् ॥
तेन । नूनम् । विऽमदाय । प्रऽचेतसा ।
छर्दिः । वत्साय । यच्छतम् ॥१५॥

४५८ अन्वयः— प्रचेतसा नासत्या ! यत् पराके अर्वाके भेषजं अस्ति, तेन विमदाय वत्साय नूनं छर्दिः यच्छतम् ॥१५॥

४५८ अर्थ- हे (प्रचेतसा नासत्या) उत्कृष्ट मनवाले तथा असत्यसे दूर रहनेवाले अश्विदेवो ! (यत् पराके) जो दूर देशमें (अर्वाके) समीप भी (भेषजं अस्ति) औषध विद्यमान है, (तेन) उससे (विमदाय वत्साय) मदसे रहित ऋषि वत्सके लिए (नूनं) निश्चयसे (छर्दिः यच्छतं) घर दे डालो ॥

[४५९]

४५९ अभुंत्स्यु प्र देव्या साकं वाचाहमश्विनोः ।
व्यार्वर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥१६॥

४५९ अभुंत्सि । ऊँ इतिं । प्र । देव्या ।
साकम् । वाचा । अहम् । अश्विनोः ॥
वि । आवः । देवि । आ । मतिम् ।
वि । रातिम् । मर्त्येभ्यः ॥१६॥

४५९ अन्वयः- अहं अश्विनोः देव्या वाचा साकं प्र अभुत्सि, देवि ! मर्त्येभ्यः मतिं रातिं वि आवः ॥१६॥

४५९ अर्थ— (अहं) मैं (अश्विनोः) अश्विदेवोंकी (देव्या वाचा साकं) दिव्यगुणसंपन्न वाणीके साथ (प्र अभुत्सि) विशेष रीतिसे जागृत हो चुका हूँ, इसलिए हे (देवि) द्योतमान उषे ! (मर्त्येभ्यः) मानवोंको (मतिं रातिं) बुद्धि तथा देनको (वि आवः) अँधेरा हटाकर स्पष्ट करो ॥

[४६०]

४६० प्र बोधयोषो अश्विना प्र देवि सूनृते महि ।
प्र यज्ञहोतरानुषक् प्र मदाय श्रवो बृहत् ॥१७॥

४६० प्र । बोधय । उषः । अश्विना ।
प्र । देवि । सूनृते । महि ।
प्र । यज्ञऽहोतः । आनुषक् ।
प्र । मदाय । श्रवः । बृहत् ॥१७॥

४६० अन्वयः- देवि ! सूनृते ! महि उषः ! अश्विना प्र बोधय, हे यज्ञहोतर् आनुषक् मदाय बृहत् श्रवः प्र (बोधय) ॥ १७ ॥

४६० अर्थ— हे द्योतमान ! (सूनृते) भलीभाँति के चलनेवाली (महि) पूजनीय उषे ! तू अश्विदेवोंको (प्र बोधय) जागृत कर; हे (यज्ञ-होतर्) यज्ञमें हवन करनेवाले ! (आनुषक्) सततरूपसे (मदाय) हर्ष उत्पन्न करनेके लिए (बृहत् श्रवः) बडे भारी अन्नको भी दे दो ॥

[४६१]

४६१ यदुषो यासि भानुना सं सूर्येण रोचसे ।
आ हायमश्विनो रथो वर्तिर्याति नृपाय्यम् ॥१८॥

४६१ यत् । उषः । यासि । भानुना ।
सम् । सूर्येण । रोचसे ॥
आ । ह । अयम् । अश्विनोः । रथः ।
वर्तिः । याति । नृऽपाय्यम् ॥१८॥

४६१ अन्वयः— उषः ! यत् भानुना यासि, सूर्येण सं रोचसे; अश्विनोः अयं रथः ह नृपाय्यं वर्तिः आ याति ॥ १८ ॥

४६१ अर्थ— हे उषे ! (यत् भानुना यासि) जो तू किरणसे युक्त हो चली जाती है, और (सूर्येण सं रोचसे) सूर्यके साथ अत्यन्त जगमगाती है इसी समय (अश्विनोः अयं रथः ह) अश्विदेवोंका यह रथ निश्चयसे (नृपाय्यं वर्तिः आ याति) मानवोंने पालन करनेयोग्य घर चला आता है ॥

[४६२]

४६२ यदापीतासो अंशवो गावो न दुह्र ऊधभिः ।
यद् वा वाणीरनूषत प्र देवयन्तो अश्विना॥१९॥

४६२ यत् । आऽपीतासः । अंशवः ।
गावः । न । दुह्रे । ऊधऽभिः ॥
यत् । वा । वाणीः । अनूषत ।
प्र । देवऽयन्तः । अश्विना ॥१९॥

४६२ अन्वयः— ऊधभिः गावः न यत् आपीतासः अंशवः दुह्रे, यत् वा देवयन्तः वाणीः अश्विना प्र अनूषत ॥ १९ ॥

४६२ अर्थ— (ऊधभिः गावः न) ऐनोंसे गायें जिस प्रकार दूध देती हैं वैसेही (यत्) जब (आपीतासः अंशवः) पीये हुए सोमरस (दुह्रे) दोहन करते हैं, (यत् वा) या जब (देवयन्तः) देवोंकी कामना करनेहारे (वाणीः) वाणियोंसे (अश्विना प्र अनूषत) अश्विदेवोंकी खूब स्तुति करते हैं ॥

[४६३]

४६३ प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे ।
प्र दक्षाय प्रचेतसा ॥२०॥

४६३ प्र । द्युम्नाय । प्र । शवसे ।
प्र । नृऽसह्याय । शर्मणे ॥
प्र । दक्षाय । प्रऽचेतसा ॥२०॥

४६३ अन्वयः- प्रचेतसा ! द्युम्नाय, शवसे, नृसाह्याय, शर्मणे, दक्षाय प्र ॥ २० ॥

४६३ अर्थ- हे (प्रचेतसा) उत्कृष्ट ज्ञानवाले अश्विदेवों ! (द्युम्नाय) धनके लिए, (शवसे) बलके लिए, (नृ-साह्याय शर्मणे) जिससे मानवोंमें सहनशक्ति बढे ऐसे सुखके लिए (दक्षाय) दक्षताके लिए (प्र) खूब आयोजना करो ॥

[४६४]

४६४ यन्नूनं धीभिरश्विना पितुर्योना निषीदथः ।
यद् वा सुम्नेभिरुक्थ्या ॥२१॥

४६४ यत् । नूनम् । धीभिः । अश्विना ।
पितुः । योना । निऽसीदथः ॥
यत् । वा । सुम्नेभिः । उक्थ्या ॥२१॥

४६४ अन्वयः— उक्थ्या अश्विना ! नूनं यत् पितुः योना धीभिः यत् वा सुम्नेभिः नि सीदथः ॥ २१ ॥

४६४ अर्थ— (उक्थ्या अश्विना !) हे प्रशंसनीय अश्विदेवों ! (नूनं यत्) सचमुच जब (पितुः योना) पिताके स्थानमें (धीभिः यत् वा सुम्नेभिः) कार्योंसे अथवा सुखोंसे (नि-सीदथः) बैठ जाते हो ॥

[४६५] (ऋ. ८।१०।१-६)

(४६५-४७०) प्रगाथो (घौरः) काण्वः । १ बृहती, २ मध्ये ज्योतिः, ३ अनुष्टुप् (पिंगलमतेन-शंकुमती), ४ आस्तारपंक्तिः, ५-६ प्रगाथः= (५ बृहती+ ६ सतोबृहती

४६५ यत् स्थो दीर्घप्रसद्मनि यद् वादो रोचने दिवः ।
यद् वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥१॥

४६५ यत् । स्थः । दीर्घऽप्रसद्मनि ।
यत् । वा । अदः । रोचने । दिवः ॥
यत् । वा । समुद्रे । अधि । आऽकृते । गृहे ।
अतः । आ । यातम् । अश्विना ॥१॥

४६५ अन्वयः— अश्विना ! यत् दीर्घ-प्रसद्मनि यत् वा अदः दिवः रोचने स्थः, यत् वा आकृते गृहे समुद्रे अधि अतः आ यातम् ॥ १ ॥

४६५ अर्थ— हे अश्विदेवों ! (यत्) जो तुम (दीर्घप्रसद्मनि) लंबे घरोंसे युक्त लोकमें (यत् वा) अथवा (अदः दिवः रोचने) उस द्युलोकके जगमगाते स्थानमें (स्थः) रहते हो, (यत् वा) या (आकृते गृहे) चारों ओर ठीक बनाये घरमें, (समुद्रे अधि) समुन्दरमें रहो, परन्तु (अतः) वहाँसे (आ यातम्) इधर आओ ॥

[४६६]

४६६ यद् वा यज्ञं मनवे संमिमिक्षथुरेवेत् काण्वस्य बोधतम् ।
बृहस्पतिं विश्वान् देवाँ अहं हुव इन्द्राविष्णू
अश्विनावाशुहेषसा ॥२॥

४६६ यत् । वा । यज्ञम् । मनवे । सम्ऽमिमिक्षथुः ।
एव । इत् । काण्वस्य । बोधतम् ॥
बृहस्पतिम् । विश्वान् । देवान् । अहम् । हुवे ।
इन्द्राविष्णू इति । अश्विनौ । आशुऽहेषसा ॥२॥

४६६ अन्वयः— मनवे यज्ञं यत् वा संमिमिक्षथुः काण्वस्य एव इत् बोधतं; अहं बृहस्पतिं विश्वान् देवान् इन्द्राविष्णू आशुहेषसा अश्विनौ हुवे ॥ २ ॥

४६६ अर्थ— (मनवे यज्ञं) मनुके लिए यज्ञको (यत् वा संमिमिक्षथुः) जिस ढंगसे तुमने ठीक तरह मिक्त किया था, (काण्वस्य एव इत्) कण्वपुत्रके यज्ञको भी उसी तरह (बोधतं) समझ लो; (अहं) मैं बृहस्पतिको (विश्वान् देवान्) सभी देवोंको, इन्द्र एवं विष्णुको तथा (आशुहेषसा अश्विनौ हुवे) शीघ्रगामी घोडोंसे युक्त अश्विदेवोंको बुलाता हूँ ॥

[४६७]

४६७ त्या न्व१श्विना हुवे सुदंससा गृभे कृता ।
यय़ोरस्ति प्र णः सख्यं देवेष्वध्याप्यम् ॥३॥

४६७ त्या । नु । अश्विना । हुवे ।
सुऽदंससा । गृभे । कृता ॥
ययोः । अस्ति । प्र । नः । सख्यम् ।
देवेषु । अधि । आप्यम् ॥३॥

४६७ अन्वयः— त्या सुदंससा गृभे कृता अश्विना, ययोः नः सख्यं देवेषु अधि आप्यं प्र अस्ति, नु हुवे ॥ ३ ॥

४६७ अर्थ— (त्या) उन दोनों (सुदंससा) अच्छे कर्म करनेवाले (गृभे कृता अश्विना) ग्रहण करनेके लिए उत्पन्न हुए अश्विदेवोंको, (ययोः) जिनकी (नः सख्यं) हमसे मित्रता (देवेषु अधि आप्यं) देवोंमें प्राप्त करनेयोग्य (प्र अस्ति) उच्च कोटिकी है, (नु हुवे) अभी बुलाता हूँ ॥

[४६८]

४६८ ययोरधि प्र यज्ञा असूरे सन्ति सूरयः ।
ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥४॥

४६८ ययोः । अधि । प्र । यज्ञाः ।
असूरे । सन्ति । सूरयः ॥
ता । यज्ञस्य । अध्वरस्य । प्रऽचेतसा ।
स्वधाभिः । या । पिबतः । सोम्यम् । मधु ॥४॥

४६८ अन्वयः— ययोः अधि यज्ञाः प्र (सन्ति), असूरे सूरयः, ता अध्वरस्य यज्ञस्य प्रचेतसा या स्वधाभिः सोम्यं मधु पिबतः ॥ ४ ॥

४६८ अर्थ– (ययोः अधि) जिन दोनोंके यज्ञ प्र (सन्ति) प्रकर्षसे होते हैं, जो (असूरे सूरयः) अविद्वानोंमें विद्वान् बनकर कार्य करते हैं, (ता) वे दोनों (अध्वरस्य यज्ञस्य) हिंसारहित यज्ञके (प्रचेतसा) अच्छे ज्ञाता हैं, तथा (या) जो (स्वधाभिः) अपनी धारक शक्तियोंसे (सोम्यं मधु पिबतः) सोमयुक्त मधु पी लेते हैं ॥

[४६९]

४६९ यद॒द्याश्वि॑ना॒वपा॒ग्यत्प्राक्स्थो वा॑जिनीवसू ।
यद्द्रु॒ह्यव्यन॑वि तु॒र्वशे॒ यदौ॑ हु॒वे वा॒मथ॒ मा ऽऽ ग॑तम् ॥५॥

४६९ यत् । अ॒द्य । अ॒श्वि॒नौ॒ । अपा॑क् ।
यत् । प्राक् । स्थः । वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू ।
यत् । द्रु॒ह्यवि॑ । अन॑वि । तु॒र्वशे॑ । यदौ॑ ।
हु॒वे । वा॒म् । अथ॑ । मा॒ । आ । ग॒त॒म् ॥५॥

४६९ अन्वयः— वाजिनीवसू अश्विनौ ! अद्य यत् अपाक् यत् प्राक् स्थः यत् द्रुह्यवि अनवि तुर्वशे यदौ (स्थः) वां हुवे, अथ मा आ गतम् ॥ ५ ॥

४६९ अर्थ– हे (वाजिनीवसू) सेनारूपी धनवाले अश्विदेवों ! (अद्य यत्), आज जो तुम (अपाक्) पश्चिम दिशामें (यत् प्राक्) या पूर्वदिशामें (स्थः) रहो, (यत्) जो तुम द्रुह्यु, अनु, तुर्वश यदुके पास रहो, पर (वां हुवे) मैं तुम्हें बुलाता हूँ (अथ) अच्छा अब (मा आ गतम्) मेरे निकट आओ ॥

[४७०]

४७० यद॒न्तरि॑क्षे॒ पत॑थः पुरुभुजा॒ यद् वे॒मे रोद॑सी॒ अनु॑ ।
यद्वा॑ स्व॒धाभि॑रधि॒तिष्ठ॑थो॒ रथ॒मत॒ आ या॑तमश्विना ॥६॥

४७० यत् । अन्तरिक्षे । पतथः । पुरुऽभुजा ।
यत् । वा । इमे इति । रोदसी इति । अनु ॥
यत् । वा । स्वधाभिः । अधिऽतिष्ठथः । रथम् ।
अतः । आ । यातम् । अश्विना ॥६॥

४७० अन्वयः— पुरुभुजा अश्विना ! यत् अन्तरिक्षे पतथः यत् वा इमे रोदसी अनु (पतथः); यत् वा रथं स्वधाभिः अधि-तिष्ठथः, अतः आ यातम्॥६॥

४७० अर्थ— हे (पुरुभुजा) बहुत बडी भुजावाले अश्विदेवों ! (यत्) जो तुम (अन्तरिक्षे पतथः) अन्तरिक्षमें उड्डान करते हो, (यत् वा इमे रोदसी अनु) अथवा इन दो द्युलोक या भूलोकके बीच चले जाते हो, (यत् वा) या कभी (रथं स्वधाभिः अधितिष्ठथः) रथपर अपनी धारक शक्तियोंसे चढ जाते हो, (अतः आ यातं) उधरसे इधर आओ ॥

[४७१] (ऋ. ८।१८।८)

(४७१) इरिम्बिठिः काण्वः । उष्णिक् ।

४७१ उत त्या दैव्या भिषजा शं नः करतो अश्विना ।
युयुयातामितो रपो अप स्रिधः ॥८॥

४७१ उत । त्या । दैव्या । भिषजा ।
शम् । नः । करतः । अश्विना ॥
युयुयाताम् । इतः । रपः । अप । स्रिधः ॥८॥

४७१ अन्वयः— उत त्या दैव्या भिषजा अश्विना नः शं करतः इतः स्रिधः अप रपः युयुयाताम् ॥ ८ ॥

४७१ अर्थ— (उत) और (त्या) वे दोनों (दैव्या भिषजा) दिव्य वैद्य अश्विदेव (नः शं करतः) हमारे लिए सुख देते हैं, तथा (इतः) यहाँसे (स्रिधः अप) शत्रुओंको हटाकर (रपः युयुयातां) दोषको दूर भगायें ॥

४७१ भावार्थ— वैद्य अपने चिकित्सा-कर्ममें प्रवीण हों,और जनताका सुख बढावें और दोषों और रोगोंको दूर करें ।

[४७२] (ऋ० ८।२२।१-१८)

(४७२-४८९) सोभरिः काण्वः। १-६ प्रगाथः = (विषमा बृहती+समा सतोबृहती), ७ बृहती, ८ अनुष्टुप्, ११ ककुप्, १२ मध्ये ज्योतिः, प्रगाथः = (९,१३,१५,१७, ककुप्, १०,१४,१६,१८ सतोबृहती)

४७२ ओ त्यमह्व आ रथमद्या दंसिष्ठमूतये।
यमश्विना सुहवा रुद्रवर्तनी आ सूर्यायै तस्थथुः॥१॥

४७२ ओ इति। त्यम्। अह्वे। आ। रथम्।
अद्य। दंसिष्ठम्। ऊतये॥
यम्। अश्विना। सुऽहवा। रुद्रवर्तनी इति रुद्रऽवर्तनी।
आ। सूर्यायै। तस्थथुः॥१॥

४७२ अन्वयः— ओ, अद्य त्यं दंसिष्ठं रथं, यं सुहवा रुद्रवर्तनी अश्विना सूर्यायै आ तस्थथुः, ऊतये आ अह्वे॥ १॥

४७२ अर्थ— (ओ) आह, (अद्य) आज (त्यं) उस (दंसिष्ठं रथं) अत्यन्त दर्शनीय रथको, (यं) जिसपर (सुहवा) सुखपूर्वक बुलानेयोग्य (रुद्रवर्तनी) दुःखको दूर करनेके मार्गसे जानेहारे अश्विदेव (सूर्यायै आ तस्थथुः) सूर्याके लिए चढ चुके थे, (ऊतये आ अह्वे) संरक्षणके लिए मैं उनको बुलाता हूँ॥

४७२ टिप्पणी— रुद्र (रुद्-र) = रोनेको दूर करनेवाले, दुःखको दूर करनेवाले।

[४७३]

४७३ पूर्वापुषं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्यम्।
सचनावन्तं सुमतिभिः सोभरे विद्वेषसमनेहसम्॥२॥

४७३ पूर्वऽआपुषम्। सुऽहवम्। पुरुऽस्पृहम्।
भुज्युम्। वाजेषु। पूर्व्यम्॥
सचनाऽवन्तम्। सुमतिऽभिः। सोभरे।
विऽद्वेषसम्। अनेहसम्॥२॥

४७३ अन्वयः- सोभरे ! पूर्वा-पुषं, सुहवं, पुरु-स्पृहं, भुज्युं, वाजेषु पूर्व्यं, सचनावन्तं, विद्वेषसं अनेहसं [रथं] सुमतिभिः ॥ २ ॥

४७३ अर्थ- हे (सोभरे) सोभरी ऋषि! (पूर्वा-पुषं) पहले आनेवाले स्तोताओंके पोषणकर्ता, (सुहवं) सुगमतापूर्वक बुलानेयोग्य, (पुरु-स्पृहं) बहुतसे लोग जिसकी इच्छा करते हैं ऐसे, (भुज्युं) भुज्युको, भोजन देनेवाले, (वाजेषु पूर्व्यं) युद्धोंमें सबसे पहले जाकर खडे होनेवाले, (सचनावन्तं) साथी लोगोंसे युक्त, (वि-द्वेषसं) शत्रुओंका विशेष रूपसे द्वेष करनेवाले एवं (अनेहसं) त्रुटिरहित अश्विदेवोंके रथको तू (सुमतिभिः) अच्छी मननीय स्तुतिओंसे प्रशंसित कर ॥

[४७४]

४७४ इह त्या पुरुभूतमा देवा नमोभिरश्विना ।
अर्वाचीना स्ववसे करामहे गन्तारा दाशुषो गृहम् ॥३॥

४७४ इह । त्या । पुरुऽभूतमा ।
देवा । नमःऽभिः । अश्विना ॥
अर्वाचीना । सु । अवसे । करामहे ।
गन्तारा । दाशुषः । गृहम् ॥३॥

४७४ अन्वयः— त्या दाशुषः गृहं गन्तारा, देवा पुरुभूतमा अश्विना इह नमोभिः स्ववसे अर्वाचीना करामहे ॥ ३ ॥

४७४ अर्थ—(त्या) वे दोनों (दाशुषः गृहं गन्तारा) दानी पुरुषके घर जानेवाले, (देवा) तेजस्वी और (पुरु-भूतमा) बहुत अधिक मात्रामें उपस्थित होनेवाले अश्विदेवोंको (इह) इधर (नमोभिः) नमनपूर्वक (स्व-वसे) भलीभाँति रक्षा करनेके लिए (अर्वाचीना करामहे) हमारे अभिमुख करते हैं ॥

[४७५]

४७५ युवो रथस्य परि चक्रमीयत ईर्मान्यद्वामिषण्यति ।
अस्माँ अच्छा सुमतिर्वां शुभस्पती आ धेनुरिव धावतु ॥४॥

४७५ युवोः । रथस्य । परि । चक्रम् । ईयते ।
ईर्मा । अन्यत् । वाम् । इषण्यति ॥
अस्मान् । अच्छ । सुऽमतिः । वाम् । शुभः । पती इति ।
आ । धेनुःऽइव । धावतु ॥४॥

४७५ अन्वयः— युवोः रथस्य चक्रं परि ईयते,,अन्यत ईर्मा वां इषण्यति शुभस्पती ! वां सुमतिः, धेनुः इव, अस्मान् अच्छ आ धावतु ॥ ४ ॥

४७५ अर्थ— (युवोः रथस्य चक्रं) तुम्हारे रथका चक्र (परि ईयते) चारों ओर चला जाता है और (अन्यत्) दूसरा पहिया (ईर्मा वां इषण्यति) प्रेरणकर्ता तुम्हें प्राप्त होता है इसलिए हे (शुभस्पती) शुभके अधिपति ! (वां सुमतिः) तुम्हारी अच्छी बुद्धि, (धेनुः इव) गायके तुल्य जोकि अपने बछडेके समीप दौडी चली जाती है, (अस्मान् अच्छ आ धावतु) हमारे समीप जल्द दौडती आजाय ॥

[४७६]

४७६ रथो यो वां त्रिवन्धुरो हिरण्याभीशुरश्विना ।
परि द्यावापृथिवी भूषति श्रुतस्तेन नासत्या गतम् ॥५॥

४७६ रथः । यः । वाम् । त्रिऽवन्धुरः ।
हिरण्यऽअभीशुः । अश्विना ॥
परि । द्यावापृथिवी इति । भूषति । श्रुतः ।
तेन । नासत्या । आ । गतम् ॥५॥

४७६ अन्वयः— नासत्या अश्विना ! वां यः त्रिवन्धुरः हिरण्य-अभीशुः रथः श्रुतः द्यावा-पृथिवी परि भूषति तेन आ गतम् ॥५॥

४७६ अर्थ— हे सत्यमय अश्विदेवों ! (वां यः) तुम दोनोंका जो (त्रि-वन्धुरः हिरण्य-अभीशुः) तीन स्थानोंमें सुन्दर प्रतीत होनेवाला और सुवर्णमय चाबूकसे युक्त रथ (श्रुतः) विख्यात है तथा (द्यावा-पृथिवी परि भूषति) द्युलोक एवं भूलोकको अलंकृत करता है (तेन आ गतं) उससे इधर पधारो॥

[४७७]

४७७ दशस्यन्ता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः ।
ता वामद्य सुमतिभिः शुभस्पती अश्विना प्र स्तुवीमहि॥६

४७७ दशस्यन्ता । मनवे । पूर्व्यम् । दिवि ।
यवम् । वृकेण । कर्षथः ॥
ता । वाम् । अद्य । सुमतिऽभिः । शुभः । पती इति ।
अश्विना । प्र । स्तुवीमहि ॥६॥

४७७ अन्वयः- मनवे पूर्व्यं दिवि दशस्यन्ता वृकेण यवं कर्षथः; शुभस्पती अश्विना ! अद्य ता वां सुमतिभिः प्र स्तुवीमहि ॥६॥

४७७ अर्थ- हे (शुभस्पती) शुभके पालनकर्ता अश्विदेवों ! (मनवे पूर्व्यं) मनुको पहले विद्यमान धन आदि (दिवि दशस्यन्ता) द्युलोकमें देते हुए तुम (वृकेण यवं कर्षथः) हलसे जौको भूमिपर खींचते हो अर्थात् कृषिकर्म करते हो (अद्य) आज (ता वां) ऐसे विख्यात तुम दोनोंको (सुमतिभिः) अच्छी प्रसन्न बुद्धियोंसे (प्र स्तुवीमहि) खूब प्रशंसित करते हैं ॥

[४७८]

४७८ उप नो वाजिनीवसू यातमृतस्य पथिभिः ।
येभिस्तृक्षिं वृषणा त्रासदस्यवं महे क्षत्राय जिन्वथः॥७॥

४७८ उप । नः । वाजिनीवसू इति वाजिनीऽवसू ।
यातम् । ऋतस्य । पथिऽभिः ॥
येभिः । तृक्षिम् । वृषणा । त्रासदस्यवम् ।
महे । क्षत्राय । जिन्वथः ॥७॥

४७८ अन्वयः— वाजिनी-वसू ! वृषणा ! येभिः ऋतस्य पथिभिः त्रासदस्यवं तृक्षिं महे क्षत्राय जिन्वथः, नः उप यातम् ॥७॥

४७८ अर्थ— हे (वाजिनी-वसू) अन्न या सेनारूपी धनवाले और (वृषणा) बलिष्ठ अश्विदेवों ! (येभिः ऋतस्य पथिभिः) जिन ऋतके मार्गोंसे त्रसदस्युके पुत्र तृक्षिको (महे क्षत्राय) बडे भारी क्षत्रियोचित वीरताके लिए (जिन्वथः) प्रेरित करने जाते हो उन्हीं मार्गोंसे (नः उप यातं) हमारे समीप आओ ॥

[४७९]

४७९ अयं वामद्रिभिः सुतः सोमो नरा वृषण्वसू ।
आ यातं सोमपीतये पिबतं दाशुषो गृहे ॥८॥

४७९ अयम् । वाम् । अद्रिऽभिः । सुतः ।
सोमः । नरा । वृषण्वसू इति वृषण्ऽवसू ॥
आ । यातम् । सोमऽपीतये ।
पिबतम् । दाशुषः । गृहे ॥८॥

४७९ अन्वयः– नरा ! वृषण्वसू ! अयं सोमः वां अद्रिभिः सुतः सोमपीतये आ यातं, दाशुषः गृहे पिबतम् ॥ ८ ॥

४७९ अर्थ— हे (नरा) नेता एवं (वृषण्वसू) धनकी वर्षा करनेहारे अश्विदेवों ! (अयं सोमः) यह सोमरस (वां) तुम दोनोंके लिए (अद्रिभिः सुतः) पत्थरोंसे कूटकर निचोडा गया है; (सोमपीतये आ यातं) सोमपानके लिए आजाओ और (दाशुषः गृहे पिबतं) दानीके घर उसका पान करो ॥

[४८०]

४८० आ हि रुहतमश्विना रथे कोशे हिरण्यये वृषण्वसू ।
युञ्जाथां पीवरीरिषः ॥९॥

४८० आ । हि । रुहतम् । अश्विना ।
रथे । कोशे । हिरण्यये ॥
वृषण्वसू इति वृषण्ऽवसू ।
युञ्जाथाम् । पीवरीः । इषः ॥९॥

४८० अन्वयः— वृषण्वसू अश्विना ! हिरण्यये कोशे रथे आ रुहतं हि, पीवरीः इषः युञ्जाथाम् ॥ ९ ॥

४८० अर्थ– हे (वृषण्वसू) धनकी वर्षा करनेहारे अश्विदेवों ! (हिरण्यये कोशे रथे) सुवर्णमय भांडारवत् रथपर (आ रुहतं हि) चढकर बैठो और (पीवरीः इषः युञ्जाथां) पुष्ट करनेवाली सुसमृद्ध अन्नसामग्रियोंका संयोग करदो ॥

[४८१]

४८१ याभिः पक्थमवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसम् ।
ताभिर्नो मक्षू तूयमश्विना गतं भिषज्यतं यदातुरम्॥१०

४८१ याभिः । पक्थम् । अवथः । याभिः । अध्रिऽगुम् ।
याभिः । बभ्रुम् । विऽजोषसम् ॥
ताभिः । नः । मक्षु । तूयम् । अश्विना । आ । गतम् ।
भिषज्यतम् । यत् । आतुरम् ॥१०॥

४८१ अन्वयः— अश्विना ! याभिः पक्थं अवथः, याभिः अध्रि-गुं, याभिः विजोषसं बभ्रुं, ताभिः नः तूयं मक्षु आ गतं यत् आतुरं भिषज्यतम् ॥ १० ॥

४८१ अर्थ— हे अश्विदेवों ! (याभिः) जिन शक्तियोंसे (पक्थं अवथः) पक्थ नरेशकी रक्षा करते हो, (याभिः अध्रिगुं) जिनसे ऐसे नरेशको बचाते कि जिसकी गतिमें कोई रुकावट न डाल सकता हो और (याभिः वि-जोषसं बभ्रुं) जिनकी मददसे विशेष सेवा करनेवाले बभ्रु नरेशकी सेवा करते हो, (ताभिः) उनसे युक्त होकर (नः तूयं) हमारे समीप शीघ्र (मक्षु आ गतं) तुरन्त आओ तथा (यत् आतुरं) जो कोई बीमार दीख पडे उसकी (भिषज्यतं) औषधादिद्वारा चिकित्सा करो ॥

[४८२]

४८२ यदध्रिगावो अध्रिगू इदा चिदह्नो अश्विना हवामहे ।
वयं गीर्भिर्विपन्यवः ॥११॥

४८२ यत् । अध्रिऽगावः । अध्रिगू इत्यध्रिऽगू ।
इदा । चित् । अह्नः । अश्विना । हवामहे ॥
वयम् । गीःऽभिः । विपन्यवः ॥११॥

४८२ अन्वयः— यत् विपन्यवः अध्रिगावः वयं गीर्भिः अह्नः इदा चित् अध्रिगू अश्विना हवामहे ॥ ११ ॥

४८२ अर्थ- (यत्) जबकि (विपन्यवः) बुद्धिमान्, (अध्रिगावः वयं) रुकावटका अनुभव न करते हुए हम (गीर्भिः) भाषणोंसे (अह्नः इदा चित्) दिनके इस समय भी (अध्रिगू अश्विना) अप्रतिहत गतिवाले अश्विदेवोंको (हवामहे) बुलाते हैं तो वे अवश्यही आयेंगे ॥

४८२ टिप्पणी— अध्रि-गुः, अध्रि-गावः=जिनकी गौवें आगे बढ़ती हैं, जिनकी गौओंको कोई रोक नहीं सकता ।

•

[४८३]

४८३ ताभिरा यातं वृषणोप मे हवं विश्वप्सुं विश्ववार्यम् ।
इषा मंहिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस्ताभिरा गतम् ॥१२॥

४८३ ताभिः । आ । यातम् । वृषणा । उप । मे । हवम् ।
विश्वऽप्सुम् । विश्वऽवार्यम् ॥
इषा । मंहिष्ठा । पुरुऽभूतमा । नरा ।
याभिः । क्रिविम् । ववृधुः । ताभिः । आ । गतम् ॥१२॥

४८३ अन्वयः— वृषणा ! मे विश्वप्सुं विश्ववार्यं हवं आ ताभिः उप यातम् । पुरुभूतमा मंहिष्ठा नरा ! याभिः क्रिविं वावृधुः ताभिः इषा आ गतम् ॥१२॥

४८३ अर्थ- हे (वृषणा) बलवानो ! (मे) मेरी (विश्वप्सुं) सभी रूप धारण करनेवाली एवं (विश्ववार्यं हवं) सबने स्वीकरणीय पुकारको सुनकर (आ) हमारे अभिमुख होकर (ताभिः उप यातं) उन शक्ति या युक्तियोंसे सज्ज हो समीप आओ; हे (पुरु-भूतमा) अधिकतया उपस्थित होनेवाले ! (मंहिष्ठा नरा) अतिशय दान देनेवाले एवं नेता अश्विदेवों ! (याभिः क्रिविं वावृधुः) जिन शक्तियोंसे तुमने कुएँको जलपूर्ण कर दिया (ताभिः इषा आ गतम्) उनसे और अन्नसे युक्त हो इधर आओ ॥

[४८४]

४८४ ताविदा चिदहानां तावश्विना वन्दमान उप ब्रुवे ।
ता ऊ नमोभिरीमहे ॥१३॥

*

४८४ तौ । इदा । चित् । अहानाम् ।
तौ । अश्विना । वन्दमानः । उप । ब्रुवे ॥
तौ । ऊँ इति । नमःऽभिः । ईमहे ॥१३॥

४८४ अन्वयः- अहानां इदा चित् तौ अश्विना वन्दमानः तौ उप ब्रुवे, नमोभिः तौ उ ईमहे ॥ १३ ॥

४८४ अर्थ— (अहानां इदा चित्) दिनोंके इस अवसरपरही (तौ) उन दोनों अश्विदेवोंको (वन्दमानः) नमन करता हुआ, (तौ उप ब्रुवे) उनके समीप जाकर मैं अपना वक्तव्य कहता हूँ, (नमोभिः) नमनपूर्वक (तौ उ ईमहे) उन्हींको हम चाहते हैं ॥

[४८५]

४८५ ताविद् दोषा ता उषसि शुभस्पती ता यामन् रुद्रवर्तनी ।
मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्रावति ख्यतम् ॥

४८५ तौ । इत् । दोषा । तौ । उषसि । शुभः । पती इति ।
ता । यामन् । रुद्रवर्तनी इति रुद्रऽवर्तनी ॥
मा । नः । मर्ताय । रिपवे । वाजिनीवसू इति
वाजिनीऽवसू ।
परः । रुद्रौ । अति । ख्यतम् ॥१४॥

४८५ अन्वयः- तौ शुभस्पती दोषा इत, तौ उषसि ता रुद्रवर्तनी यामन् (हवामहे); वाजिनीवसू रुद्रौ ! नः रिपवे मर्ताय मा परः अति ख्यतम् ॥१४॥

४८५ अर्थ- (तौ शुभस्पती) उन दो अच्छोंके पालक अश्विदेवोंको (दोषा इत) रात्रीके मौकेपर भी, (तौ उषसि) उन्हें प्रातःकाल भी, (ता रुद्रवर्तनी) उन दो वीरभद्रके पथपर चलनेवाले अश्विदेवोंको (यामन्) यात्रा करते समय हम बुलाते हैं । हे (वाजिनी-वसू रुद्रौ) बलरूपी धनवाले ! शत्रुको रुलानेवाले ! (नः) हमें (रिपवे मर्ताय) शत्रुभूत मानवके लिए (मा परः अति ख्यतं) न कभी आगे कह दो । शत्रुको हमारा पता न लगे ॥

४८५ भावार्थ— शुभका पालन करो, वीरोंके मार्गसे गमन करो, बलको धन मानो, शत्रुको अपना पता न दो, अपना स्थान सुरक्षित रखो।

[४८६]

४८६ आ सुग्म्याय सुग्म्यं प्राता रथेनाश्विना वा सक्षणी।
हुवे पितेव सोभरी ॥१५॥

४८६ आ। सुग्म्याय। सुग्म्यम्।
प्रातरिति। रथेन। अश्विना। वा। सक्षणी इति॥
हुवे। पिताऽइव। सोभरी ॥१५॥

४८६ अन्वयः— सोभरी पिता इव हुवे, सक्षणी अश्विना सुग्म्याय प्रातः रथेन वा सुग्म्यं आ ॥ १५ ॥

४८६ अर्थ— मैं सोभरी (पिता इव हुवे) पिता जिस तरह पुत्रोंको बुलाता है वैसेही बुलाता हूँ; (सक्षणी) सेवनीय अश्विदेवों (सुग्म्याय) सुख पानेकी योग्यता रखनेवालेको (प्रातः) सुबह (रथेन वा) चाहे तो रथपरसे (सुग्म्यं आ) सुख पहुँचानेके लिए आओ ॥

[४८७]

४८७ मनोजवसा वृषणा मदच्युता मक्षुंगमाभिरूतिभिः।
आरात्ताच्चिद् भूतमस्मे अवसे पूर्वीभिः पुरुभोजसा॥१६॥

४८७ मनःऽजवसा। वृषणा। मदऽच्युता।
मक्षुम्ऽगमाभिः। ऊतिऽभिः॥
आरात्तात्। चित्। भूतम्। अस्मे इति। अवसे।
पूर्वीभिः। पुरुऽभोजसा ॥१६॥

४८७ अन्वयः— मनो-जवसा! वृषणा पुरु-भोजसा! मदच्युता! अस्मे अवसे पूर्वीभिः मक्षुंगमाभिः ऊतिभिः आरात्तात् चित् भूतम् ॥ १६ ॥

४८७ अर्थ- हे (मनो-जवसा) मनवत् वेगसे जानेवाले! (वृषणा) बलवान्! (पुरु-भोजसा) बहुत लोगोंको भोगके साधन देनेवाले!(मद-च्युता) शत्रुके मदको हटानेवाले! अश्विदेवों! (अस्मे अवसे) हमारी रक्षाके लिए (पूर्वीभिः) बहुतसी तथा (मक्षुं-गमाभिः ऊतिभिः) शीघ्र गतिवाली रक्षणकी शक्तिसे युक्त होकर (आरात्तात् चित्) समीपही (भूतं) तुम रहने लगो॥

[४८८]

४८८ आ नो अश्वा॑वदश्विना व॒र्तिर्या॑सिष्टं मधुपातमा नरा।
गोम॑द् द॒स्रा हिर॑ण्यवत् ॥ १७ ॥

४८८ आ। नः। अश्व॑ऽवत्। अ॒श्वि॒ना।
व॒र्तिः। या॒सि॒ष्ट॒म्। म॒धु॒ऽपा॒त॒मा। न॒रा॥
गोऽम॑त्। द॒स्रा। हिर॑ण्यऽवत् ॥१७॥

४८८ अन्वयः- मधुपातमा! दस्रा! नरा अश्विना! नः गोमत् अश्वावत् हिरण्यवत् वर्तिः आ यासिष्टम्॥ १७॥

४८८ अर्थ- हे (मधु-पातमा) अत्यन्त मधुर सोमरस पीनेहारे! (दस्रा) शत्रुविनाशक! (नरा) नेता अश्विदेवों! (नः गोमत् अश्वावत्) हमारे गोधन एवं वाजिधनसे पूर्ण (हिरण्यवत् वर्तिः आ यासिष्टं) सुवर्णयुक्त निवास-स्थलमें आओ॥

[४८९]

४८९ सु॒प्रा॒व॒र्गं सु॒वीर्यं॑ सु॒ष्ठु वार्य॒मना॑धृष्टं र॒क्ष॒स्विना॑।
अ॒स्मिन्ना वा॑मा॒याने॑ वाजिनीवसू विश्वा॑ वा॒मानि॑ धीमहि॥

४८९ सु॒ऽप्रा॒व॒र्गम्। सु॒ऽवीर्य॑म्। सु॒ष्ठु। वार्य॑म्।
अना॑धृष्टम्। र॒क्ष॒स्विना॑॥
अ॒स्मिन्। आ। वा॒म्। आ॒ऽयाने॑। वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू।
विश्वा॑। वा॒मानि॑। धी॒म॒हि॒॥१८॥

४८९ अन्वयः— वाजिनी-वसू ! रक्षस्विना अनाधृष्टं, सुप्रावर्गं, सुवीर्यं सुष्ठु वार्यं, वां अस्मिन् आयाने विश्वा वामानि आ धीमहि ॥ १८ ॥

४८९ अर्थ— हे (वाजिनी-वसू) बलरूपी धनवाले ! रक्षस्विना अन्-आधृष्टं) रक्षणशक्तिसे युक्त पुरुषके द्वारा भी जिसपर हमला करना असंभव हुआ हो, (सुप्रावर्गं) सुगमतासे प्रदान करनेयोग्य और (सुवीर्यं सुष्ठु वार्यं) अच्छी वीरतासे युक्त अतः भलीभाँति स्वीकरणीय ऐसे गुणोंसे युक्त (विश्वा वामानि) सभी धनोंको (वां अस्मिन् आयाने) तुम दोनोंके इस आगमनसे (आ धीमहि) हम धारण करते हैं ॥

[४९०] (ऋ. ८।२६।१-१९)

(४९०—५०८) विश्वमना वैयश्वः; व्यश्वो वाऽङ्गिरसः। उष्णिक्, १६-१९ गायत्री।

४९० युवोरु षू रथं हुवे सधस्तुत्याय सूरिषु।
अतूर्तदक्षा वृषणा वृषण्वसू ॥१॥

४९० युवोः। ऊँ इति। सु। रथम्। हुवे।
सधऽस्तुत्याय। सूरिषु।
अतूर्तऽदक्षा। वृषणा। वृषण्वसू इति वृषण्ऽवसू ॥१॥

४९० अन्वयः- अतूर्तदक्षा ! वृषणा ! वृषण्वसू ! सूरिषु सधस्तुत्याय युवोः रथं उ सु हुवे ॥ १ ॥

४९० अर्थ— हे (अतूर्त-दक्षा) ऐसे बल धारण करनेवाले कि जिसे दूसरा कोई नष्ट न कर सके और (वृषणा) बलवान् तथा (वृषण्वसू) धनकी वर्षा करनेहारे अश्विदेवो ! (सूरिषु) विद्वानोंमें (सधस्तुत्याय) एकही साथ प्रशंसा करनेके लिए (युवोः रथं उ) तुम्हारे रथकोही (सु हुवे) भलीभाँति बुलाता हूँ ॥

[४९१]

४९१ युवं वरो सुषाम्णे महे तने नासत्या।
अवोभिर्याथो वृषणा वृषण्वसू ॥२॥

४९१ युवम् । वरो इति । सुऽसाम्ने ।
महे । तने । नासत्या ॥
अवःऽभिः । याथः । वृषणा । वृषण्वसू इति
वृषण्ऽवसू ॥२॥

४९१ अन्वयः– नासत्या ! वृषणा ! वृषण्वसू ! युवं सु-साम्ने महे तने अवोभिः याथः; वरो ॥ २ ॥

४९१ अर्थ— हे असत्यसे दूर रहनेवाले ! (वृषणा) बलिष्ठ तथा (वृषण्वसू) धनकी वृष्टि करनेवाले अश्विदेवों ! (युवं) तुम (सुसाम्ने महे तने) सुसामन्‌के लिए बडा धन मिले इस इच्छासे (अवोभिः याथः) संरक्षणोंसे युक्त होकर यात्रा करते हो उसी तरह मेरेलिए भी प्रयत्न करो, ऐसी प्रार्थना (वरो) हे वरु नरेश ! तू कर ॥

[४९२]

४९२ ता वामद्य हवामहे हव्येभिर्वाजिनीवसू ।
पूर्वीरिष इषयन्तावति क्षपः ॥३॥

४९२ ता । वाम् । अद्य । हवामहे ।
हव्येभिः । वाजिनीवसू इति वाजिनीऽवसू ॥
पूर्वीः । इषः । इषयन्तौ । अति । क्षपः ॥३॥

४९२ अन्वयः— वाजिनी-वसू ! क्षपः अति अद्य ता वां पूर्वीः इषः इषयन्तौ हव्येभिः हवामहे ॥ ३ ॥

४९२ अर्थ– हे (वाजिनी-वसू) बलयुक्त धनवाले अश्विदेवों ! (क्षपः अति) रात्रीके बीत जानेपर (अद्य ता वां) आज उन विख्यात तुम्हें जोकि (पूर्वीः इषः इषयन्तौ) बहुतसी अन्नसामग्रियोंको चाहते हो (हव्येभिः हवामहे) हवनीय वस्तुओंके प्रदानके साथ हम बुलाते हैं ॥

[४९३]

४९३ आ वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा ।
उप स्तोमान् तुरस्य दर्शथः श्रिये ॥४॥

४९३ आ । वाम् । वाहिष्ठः । अश्विना ।
रथः । यातु । श्रुतः । नरा ॥
उप । स्तोमान् । तुरस्य । दर्शथः । श्रिये ॥४॥

४९३ अन्वयः— नरा अश्विना ! वां वाहिष्ठः श्रुतः रथः आ यातु, तुरस्य स्तोमान् श्रिये उप दर्शथः ॥ ४ ॥

४९३ अर्थ- हे (नरा) नेता अश्विदेवों ! (वां वाहिष्ठः) तुम्हें खूब जगह जगह पहुँचानेवाला और (श्रुतः) विख्यात रथ (आ यातु) इधर चला आये; पश्चात् (तुरस्य स्तोमान्) शीघ्रतया कार्य करनेवालेके स्तोत्रोंका, (श्रिये) शोभाके लिए (उप दर्शथः) समीप जाकर दर्शन लो ॥

[४९४]

४९४ जुहुराणा चिदश्विनाऽऽ मन्येथां वृषण्वसू ।
युवं हि रुद्रा पर्षथो अति द्विषः ॥५॥

४९४ जुहुराणा । चित् । अश्विना ।
आ । मन्येथाम् । वृषण्वसू इति वृषण्ऽवसू ॥
युवम् । हि । रुद्रा । पर्षथः । अति । द्विषः ॥५॥

४९४ अन्वयः— वृषण्वसू अश्विना ! जुहुराणा चित् आ मन्येथां युवं रुद्रा हि द्विषः अति पर्षथः ॥ ५ ॥

४९४ अर्थ- हे (वृषण्वसू) धनकी वर्षा करनेहारे अश्विदेवों ! (जुहुराणा चित् आ मन्येथां) कुटिल प्रकृतिके लोगोंको भी मान्यता देदो क्योंकि (युवं रुद्रा हि) तुम तो शत्रुको रुलानेवाले हो और (द्विषः अति पर्षथः) द्वेष करनेवाले शत्रुओंको पार करके आगे बढते हो ॥

[४९५]

४९५ दस्रा हि विश्वमानुषङ्मक्षूभिः परिदीयथः ।
धियंजिन्वा मधुवर्णा शुभस्पती ॥६॥

४९५ दस्रा । हि । विश्वम् । आनुषक् ।
मक्षुऽभिः । परिऽदीयथः ॥
धियम्ऽजिन्वा । मधुऽवर्णा । शुभः । पती इति ॥६॥

४९५ अन्वयः— दस्रा ! मधुवर्णा ! धियं-जिन्वा ! शुभस्पती ! मक्षुभिः विश्वं आनुषक् परिदीयथः हि ॥ ६ ॥

४९५ अर्थ— हे (दस्रा) दर्शनीय ! (मधु-वर्णा) मधुर वर्णवाले ! (धियं-जिन्वा) बुद्धि या कर्मोंका ठीक पालन प्रीणन-करनेवाले ! (शुभः पती) शुभ चीजोंके अधिपति ! अश्विदेवों ! (मक्षुभिः) शीघ्रगामी घोडोंके साथ (विश्वं आनुषक्) सबके समीप लगातार (परि दीयथः) चतुर्दिक् चले जाते हो इसमें संशय नहीं है ॥

[४९६]

४९६ उप॑ नो यातमश्विना रा॒या वि॑श्व॒पुषा॑ स॒ह ।
म॒घवा॑ना सु॒वीरा॒वन॑पच्युता ॥७॥

४९६ उप॑ । न॒ः । या॒त॒म् । अ॒श्वि॒ना॒ ।
रा॒या । वि॒श्व॒ऽपुषा॑ । स॒ह ॥
म॒घऽवा॑ना । सु॒ऽवीरौ॑ । अन॑पऽच्युता ॥७॥

४९६ अन्वयः— मघवाना ! अनपच्युता ! सुवीरौ अश्विना ! नः विश्वपुषा राया सह उप यातम् ॥ ७ ॥

४९६ अर्थ— हे (मघवाना !) ऐश्वर्यसंपन्न ! (अन्-अपच्युता) न पदभ्रष्ट हुए (सुवीरौ) अच्छे वीर अश्विदेवों ! (नः) हमारे समीप (विश्व-पुषा राया सह) सबकी पुष्टि करनेहारे धनसे युक्त होकर (उप यातं) आओ ॥

[४९७]

४९७ आ मे॑ अ॒स्य प्र॑ती॒व्य१॒॑मिन्द्र॑नासत्या गतम् ।
दे॒वा दे॒वेभि॑र॒द्य स॒चन॑स्तमा ॥८॥

४९७ आ । मे॒ । अ॒स्य । प्र॒ती॒व्य॑म् ।
इन्द्र॑नासत्या । ग॒त॒म् ॥
दे॒वा । दे॒वेभि॑ः । अ॒द्य । स॒चन॑ःऽतमा ॥८॥

४९७ अन्वयः— इन्द्र-नासत्या ! देवा देवेभिः सचनस्तमा अद्य मे अस्य प्रतीव्यं आ गतम् ॥ ८ ॥

४९७ अर्थ— हे इन्द्र एवं सत्यभक्त अश्विदेवो ! तुम (देवा) दानी और (देवेभिः सचनः तमा) विद्वानोंसे अत्यन्त अधिक मात्रामें युक्त होनेवाले हो, अतः (अद्य मे अस्य प्रतीव्यं) आज मेरे इस स्तोत्रके प्रत्युत्तरके रूपमें (आ गतं) इधर पधारो ॥

[४९८]

४९८ वयं हि वां हवामह उक्षण्यन्तो व्यश्ववत् ।
सुमतिभिरुप विप्राविहा गतम् ॥९॥

४९८ वयम् । हि । वाम् । हवामहे ।
उक्षण्यन्तः । व्यश्वऽवत् ॥
सुमतिऽभिः । उप । विप्रौ । इह । आ । गतम् ॥९॥

४९८ अन्वयः- विप्रौ ! वयं व्यश्ववत् उक्षण्यन्तः वां हि हवामहे; सुमतिभिः इह उप आ गतम् ॥ ९ ॥

४९८ अर्थ- हे (विप्रौ) ज्ञानी अश्विदेवो ! (वयं व्यश्ववत्) हम व्यश्वके समानही, (उक्षण्यन्तः) इच्छा करते हुए (वां हि हवामहे) तुम्हेंही बुलाते हैं, इसलिए (सुमतिभिः इह) अच्छी बुद्धियों एवं विचारोंसे युक्त होकर इधर (उप आ गतं) समीप आओ ॥

[४९९]

४९९ अश्विना स्वृषे स्तुहि कुवित् ते श्रवतो हवम् ।
नेदीयसः कूळयातः पणीँरुत ॥१०॥

४९९ अश्विना । सु । ऋषे । स्तुहि ।
कुवित् । ते । श्रवतः । हवम् ॥
नेदीयसः । कूळयातः । पणीन् । उत ॥१०॥

४९९ अन्वयः- ऋषे ! अश्विनौ सु स्तुहि, ते हवं कुवित् श्रवतः उत पणीन् नेदीयसः कूळयातः ॥ १० ॥

*

४९९. अर्थ— हे ऋषिवर ! तू अश्विदेवोंकी (सु स्तुहि) भलीभाँति सराहना कर, क्योंकि वे दोनों (ते हवं) तेरी पुकारको (कुवित् श्रवतः) बहुतबार सुन लेते हैं, (उत) और (पणीन्) स्वार्थी व्यापारियोंको एवं (नेदीयसः) समीप पहुँचे हुए शत्रुओंको (कूळयातः) विनष्ट कर डालते हैं ॥

[५००]

५०० वैयश्वस्य श्रुतं नरोतो मे अस्य वेदथः ।
सजोषसा वरुणो मित्रो अर्यमा ॥११॥

५०० वैयश्वस्य । श्रुतम् । नरा ।
उतो इति । मे । अस्य । वेदथः ॥
सऽजोषसा । वरुणः । मित्रः । अर्यमा ॥११॥

५०० अन्वयः— नरा ! वैयश्वस्य श्रुतं उत अस्य मे वेदथः; वरुणः मित्रः अर्यमा सजोषसा ॥ ११ ॥

५०० अर्थ— हे (नरा) नेता अश्विदेवों ! (वैयश्वस्य श्रुतं) व्यश्वके पुत्रके कथनको सुन लो (उत) और (अस्य मे वेदथः) इस मेरे भाषणको ठीक तरह जान लो; वरुण, मित्र एवं अर्यमा (सजोषसा) इकट्ठे हो इधर आजायँ ॥

[५०१]

५०१ युवादत्तस्य धिष्ण्या युवानीतस्य सूरिभिः ।
अहरहर्वृषणा मह्यं शिक्षतम् ॥१२॥

५०१ युवाऽदत्तस्य । धिष्ण्या ।
युवाऽनीतस्य । सूरिऽभिः ॥
अहःऽअहः । वृषणा । मह्यम् । शिक्षतम् ॥१२॥

५०१ अन्वयः— धिष्ण्या वृषणा ! सूरिभिः युवानीतस्य युवादत्तस्य अहः अहः मह्यं शिक्षतम् ॥ १२ ॥

५०१ अर्थ— हे (धिष्ण्या वृषणा !) प्रशंसार्ह एवं इच्छापूर्ति करनेहारे अश्विदेवों ! (सूरिभिः) विद्वानोंको (युवानीतस्य युवा दत्तस्य) तुम लाकर जो धन दे चुके हो उसे (अहः अहः) हरदिन (मह्यं शिक्षतं) मुझे दे डालो॥

[५०२]

५०२ यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव ।
सपर्यन्ता शुभे चक्राते अश्विना ॥१३॥

५०२ यः । वाम् । यज्ञेभिः । आऽवृतः ।
अधिऽवस्त्रा । वधूःऽइव ॥
सपर्यन्ता । शुभे । चक्राते इति । अश्विना ॥१३॥

५०२ अन्वयः— अधिवस्त्रा वधूः इव यः वां यज्ञेभिः आवृतः, सपर्यन्ता अश्विना शुभे चक्राते ॥ १३ ॥

५०२ अर्थ— (अधि–वस्त्रा वधूः इव) कपड़े ओढी हुई नववधुके समान (यः) जो मानव (वां यज्ञेभिः आवृतः) तुम्हारे यज्ञोंसे पूर्णतया ढका हुआ हो, उसे (सपर्यन्ता) अभीष्ट चीजोंके प्रदानसे पूजित करते हुए अश्विदेव (शुभे चक्राते) अच्छी दशामें वह रहे ऐसा प्रबन्ध कर देते हैं ॥

५०२ टिप्पणी— 'अधिवस्त्रा वधूः आवृता' इस मंत्रभागसे ऐसा दीखता है कि वधू–नवविवाहित स्त्री-शरीरपर पहने वस्त्रसे भी अधिक ओढती थी। आजकल पंजाबमें यह प्रथा है ॥

[५०३]

५०३ यो वामुरुव्यचस्तमं चिकेतति नृपाय्यम् ।
वर्तिरश्विना परि यातमस्मयू ॥१४॥

५०३ यः । वाम् । उरुव्यचःऽतमम् ।
चिकेतति । नृऽपाय्यम् ॥
वर्तिः । अश्विना । परि । यातम् । अस्मऽयू इत्यस्मऽयू॥

५०३ अन्वयः— अश्विना ! यः उरुव्यचस्तमं नृपाय्यं वां चिकेतति, वर्तिः अस्मयू परि यातम् ॥ १४ ॥

५०३ अर्थ— हे अश्विदेवों ! (यः) जो (उरुव्यचस्तमं) अत्यन्त विस्तीर्ण तथा (नृ-पाय्यं) नेताओंद्वारा सुरक्षित रखनेयोग्य स्थानको (वां चिकेतति.) तुम्हारे लिए बतलाता है, उसके (वर्तिः) घरतक (अस्मयू) हमारी चाह रखनेवाले तुम (परि यातं) चारों ओरसे चले जाओ ॥

[५०४]

५०४ अस्मभ्यं सु वृषण्वसू यातं वर्तिर्नृपाय्यम् ।
विषुद्रुहेव यज्ञमूहथुर्गिरा ॥१५॥

५०४ अस्मभ्यम् । सु । वृषण्वसू इति वृषण्ऽवसू ।
यातम् । वर्तिः । नृऽपाय्यम् ॥
विषुद्रुहाऽइव । यज्ञम् । ऊहथुः । गिरा ॥१५॥

५०४ अन्वयः- वृषण्वसू ! नृपाय्यं वर्तिः अस्मभ्यं सु यातं; गिरा यज्ञं विषुद्रुहेव ऊहथुः ॥ १५ ॥

५०४ अर्थ— हे (वृषण्वसू) धनकी वर्षा करनेहारे अश्विदेवों ! (नृपाय्यं वर्तिः) नेताओंसे रक्षणीय घरको (अस्मभ्यं) हमारे हितके लिए (सु यातं) भलीभाँति जाओ, क्योंकि तुम (गिरा यज्ञं) भाषणसे यज्ञको (वि-षु-द्रुहा इव ऊहथुः) सभी शत्रुओंके वधकर्ता बाणकी तरह उठा के गये ॥

[५०५]

५०५ वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा ।
युवाभ्यां भूत्वश्विना ॥१६॥

५०५ वाहिष्ठः । वाम् । हवानाम् ।
स्तोमः । दूतः । हुवत् । नरा ॥
युवाभ्याम् । भूतु । अश्विना ॥१६॥

५०५ अन्वयः— नरा अश्विना ! हवानां वां वाहिष्ठः स्तोमः दूतः हुवत् युवाभ्यां भूतु ॥ १६ ॥

५०५ अर्थ— हे (नरा) नेता अश्विदेवों ! (हवानां) तुम्हें जो बुलावे भेजे जाते हैं उनमें (वां वाहिष्ठः) तुम्हें अत्यधिक मात्रामें प्राप्त होनेवाला (स्तोमः दूतः हुवत्) हमारा स्तोत्र दूत बनकर इधर बुलाए और वह (युवाभ्यां) तुम्हें प्रिय (भूतु) प्रतीत हो ॥

[५०६]

५०६ यदुदो दिवो अर्णव इषो वा मदथो गृहे।
श्रुतमिन्मे अमर्त्या ॥१७॥

५०६ यत् । अदः । दिवः । अर्णवे ।
इषः । वा । मदथः । गृहे ॥
श्रुतम् । इत् । मे । अमर्त्या ॥१७॥

५०६ अन्वयः- अमर्त्या ! यत् दिवः, अर्णवे, इषः गृहे वा मदथः मे अदः श्रुतं इत् ॥ १७ ॥

५०६ अर्थ— हे (अ-मर्त्या) अमर अश्विदेवों ! (यत् दिवः) जो तुम द्युलोकमें (अर्णवे) समुद्रमें (इषः गृहे वा) या अभीष्टके घरमें (मदथः) हर्षित होते हो, परन्तु (मे अदः) मेरा वह भाषण (श्रुतं इत्) तुम अवश्य सुन लेना ॥

[५०७]

५०७ उत स्या श्वेतयावरी वाहिष्ठा वां नदीनाम्।
सिन्धुर्हिरण्यवर्तनिः ॥१८॥

५०७ उत । स्या । श्वेतऽयावरी ।
वाहिष्ठा । वाम् । नदीनाम् ॥
सिन्धुः । हिरण्यऽवर्तनिः ॥१८॥

५०७ अन्वयः— उत नदीनां वां वाहिष्ठा स्या श्वेतयावरी हिरण्य-वर्तनिः सिन्धुः ॥ १८ ॥

५०७ अर्थ- (उत) और भी (नदीनां वा वाहिष्ठा) नदियोंमें तुम्हेंही अधिक इष्ट स्थानपर पहुँचानेवाली (स्या श्वेतयावरी) वह शुभ्र—निर्मल गतिवाली (हिरण्यवर्तनिः) सुवर्णतुल्य तेजस्वी मार्गवाली (सिन्धुः) नदी है ॥

[५०८]

५०८ स्मदेतया सुकीर्त्याऽश्विना श्वेतया धिया ।
वहेथे शुभ्रयावाना ॥१९॥

५०८ स्मत् । एतया । सुऽकीर्त्या ।
अश्विना । श्वेतया । धिया ॥
वहेथे इति । शुभ्रऽयावाना ॥१९॥

५०८ अन्वयः — शुभ्र-यावाना अश्विना ! एतया सुकीर्त्या श्वेतया धिया स्मत् वहेथे ॥ १९ ॥

५०८ अर्थ- हे (शुभ्र-यावाना) निष्कलंक गतिवाले अश्विदेवो ! (एतया सुकीर्त्या) इस अच्छी कीर्तिवाली (श्वेतया धिया) सफेद—निष्कलंक बुद्धिसे तुम दोनों (स्मत् वहेथे) कल्याणकी ओर-जाते हो—शुभ एवं हितप्रद मार्गके पथिक बनते हो ॥

[५०९] (ऋ० ८।३५।१-२४)
(५०९-५३२) श्यावाश्व आत्रेयः। उपरिष्टाज्ज्योतिः (त्रिष्टुप्),
२२,२४ पंक्तिः, २३ महाबृहती ।

५०९ अग्निनेन्द्रेण वरुणेन विष्णुनाऽऽदित्यै रुद्रैर्वसुभिः
सचाभुवा । सजोषसा उषसा सूर्येण च सोमं
पिबतमश्विना ॥१॥

५०९ अग्निना । इन्द्रेण । वरुणेन । विष्णुना ।
आदित्यैः । रुद्रैः । वसुऽभिः । सचाऽभुवा ॥
सऽजोषसौ । उषसा । सूर्येण । च ।
सोमम् । पिबतम् । अश्विना ॥१॥

५०९ अन्वयः— अश्विना ! अग्निना इन्द्रेण वरुणेन विष्णुना आदित्यैः वसुभिः रुद्रैः सचाभुवा उषसा सूर्येण च सजोषसा सोमं पिबतम् ॥ १ ॥

५०९ अर्थ— हे अश्विदेवों ! तुम अग्नि, इन्द्र, वरुण, विष्णु, आदित्यों वसुओं एवं रुद्रोंके संघोंसे (सचा-भुवा) युक्त होकर (उषसा सूर्येण च सजोषसा) और उषा तथा सूर्यसे मिलकर (सोमं पिबतम्) सोमरसका सेवन करो ॥

[५१०]

५१० विश्वा॑भिर्धी॒भिर्भुव॑नेन वाजिना दि॒वा पृ॑थि॒व्याऽद्रि॑भिः सचा॒भुवा॑ । स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ सोमं॑ पिबतमश्विना ॥२॥

५१० विश्वा॑भिः । धी॒भिः । भुव॑नेन । वा॒जि॒ना । दि॒वा । पृ॒थि॒व्या । अद्रि॑ऽभिः । स॒चा॒ऽभुवा॑ ॥ स॒ऽजोष॑सौ । उ॒षसा॑ । सूर्ये॑ण । च॒ । सोम॑म् । पि॒ब॒त॒म् । अ॒श्वि॒ना ॥२॥

५१० अन्वयः— वाजिना अश्विना ! दिवा, पृथिव्या, अद्रिभिः, विश्वाभिः धीभिः भुवनेन सचाभुवा, उषसा सूर्येण च सजोषसा सोमं पिबतम् ॥ २ ॥

५१० अर्थ— हे (वाजिना) बलवान् अश्विदेवों (दिवा पृथिव्या) द्युलोक एवं भूलोकवर्ती लोगोंसे, (अद्रिभिः) न दौडनेवालोंसे, (विश्वाभिः धीभिः भुवनेन सचाभुवा) सभी बुद्धियों एवं भुवनसे युक्त हो तथा उषा और सूर्यसे सम्मिलित होकर सोमपान करो ॥

[५११]

५११ विश्वै॑र्दे॒वैस्त्रि॒भिरे॑काद॒शैरि॒हाद्भिर्म॒रुद्भि॒र्भृगु॑भिः सचा॒भुवा॑ । स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ सोमं॑ पिबतमश्विना ॥३॥

५११ विश्वैः॑ । दे॒वैः । त्रि॒ऽभिः । ए॒का॒द॒शैः । इ॒ह । अ॒त्ऽभिः । म॒रुत्ऽभिः॑ । भृगु॑ऽभिः । स॒चा॒ऽभुवा॑ ॥ स॒ऽजोष॑सौ । उ॒षसा॑ । सूर्ये॑ण । च॒ । सोम॑म् । पि॒ब॒त॒म् । अ॒श्वि॒ना ॥३॥

५११ अन्वयः— अश्विना ! इह त्रिभिः एकादशैः विश्वैः देवैः भृगुभिः मरुद्भिः अद्भिः सचाभुवा, उषसा सूर्येण च सजोषसा सोमं पिबतम् ॥ ३ ॥

५११ अर्थ– हे अश्विदेवो ! (इह) यहाँपर (त्रिभिः एकादशैः विश्वैः देवैः) सभी तैंतीस देवोंसे, (भृगुभिः मरुद्भिः अद्भिः) भृगुओं, वीर मरुतों तथा जलोंसे (सचाभुवा) संगत होकर और उषा एवं सूर्यके साथ रहकर सोमपान करो ॥ -

[५१२]

५१२ जुषेथां यज्ञं बोधतं हवस्य मे विश्वेह देवौ सवनाव
गच्छतम् । सजोषसा उषसा सूर्येण चेषं नो
वोळ्हमश्विना ॥४॥

५१२ जुषेथाम् । यज्ञम् । बोधतम् । हवस्य । मे ।
विश्वा । इह । देवौ । सवना । अव । गच्छतम् ॥
सऽजोषसौ । उषसा । सूर्येण । च ।
आ । इषम् । नः । वोळ्हम् । अश्विना ॥४॥

५१२ अन्वयः— अश्विना ! यज्ञं जुषेथां, मे हवस्य बोधतं, देवौ इह विश्वा सवना अव गच्छतम्; उषसा सूर्येण च सजोषसा नः इषं वोळ्हम्ः ॥ ४ ॥

५१२ अर्थ— हे अश्विदेवो ! (यज्ञं जुषेथां) यज्ञका सेवन करो, (मे हवस्य बोधतं) मेरी प्रार्थना जान लो, (देवौ) दानी तुम दोनों (इह विश्वा सवना अव गच्छतं) इधर सभी सवनोंके निकट आपहुँचो, पश्चात् उषा एवं सूर्यके साथ (नः इषं वोळ्हं) हमें अन्न पहुँचा दो ॥

[५१३]

५१३ स्तोमं जुषेथां युवशेव कन्यनां विश्वेह देवौ सवनाव
गच्छतम् । सजोषसा उषसा सूर्येण चेषं नो
वोळ्हमश्विना ॥५॥

५१३ स्तोमम् । जुषेथाम् । युवशाऽइव । कन्यनाम् ।
विश्वा । इह । देवौ । सवना । अव । गच्छतम् ॥
सऽजोषसौ । उषसा । सूर्येण । च ।
आ । इषम् । नः । वोळ्हम् । अश्विना ॥५॥

५१३ अन्वयः– देवौ अश्विनौ ! कन्यनां युवशा इव स्तोमं जुषेथां विश्वा सवना इह अव गच्छतम्; उषसा सूर्येण च सजोषसा नः इषं वोळ्हम् ॥ ५ ॥

५१३ अर्थ– हे (देवौ) दानी या द्योतमान अश्विदेवों ! (कन्यनां युवशा इव) कन्या–कमनीय युवतियोंको युवक जैसे चाहते हैं वैसेही (स्तोमं जुषेथां) हमारे स्तोत्रका सेवन करो, तथा (विश्वा सवना) सभी सवनोंमें (इह अगच्छतं) इधर आकर पहुँच जाओ; सूर्य एवं उषःवेळाके समय तुम दोनों हमें अन्न पहुँचा दो ॥

[५१४]

५१४ गिरो जुषेथामध्वरं जुषेथां विश्वेह देवौ सवनाव
गच्छतम् । सजोषसा उषसा सूर्येण चेषं नो
वोळ्हमश्विना ॥६॥

५१४ गिरः । जुषेथाम् । अध्वरम् । जुषेथाम् ।
विश्वा । इह । देवौ । सवना । अव । गच्छतम् ॥
सऽजोषसौ । उषसा । सूर्येण । च ।
आ । इषम् । नः । वोळ्हम् । अश्विना ॥६॥

५१४ अन्वयः— इह गिरः जुषेथां, अध्वरं जुषेथां, देवौ विश्वा सवना अव गच्छतम्; अश्विना ! उषसा सूर्येण च सजोषसा नः इषं वोळ्हम् ॥ ६ ॥

५१४ अर्थ—(इह गिरः जुषेथां) यहाँपर हमारे भाषणोंका स्वीकार करो, (अध्वरं जुषेथां) हिंसारहित कार्यके लिए आदरपूर्वक उपस्थित रहो (देवौ) दानी होकर तुम (विश्वा सवना अव गच्छतं) सभी सवनोंमें आओ, हे अश्विनौ ! सूर्योदय तथा उषःवेलामें हमें अन्न पहुँचा दो ॥

*

[५१५]

५१५ हारिद्रवेव पतथो वनेदुप सोमं सुतं महिषेवाव गच्छथः । सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥७॥

५१५ हारिद्रवाऽइव । पतथः । वना । इत् । उप । सोमम् । सुतम् । महिषाऽइव । अव । गच्छथः ॥ सऽजोषसा । उषसा । सूर्येण । च । त्रिः । वर्तिः । यातम् । अश्विना ॥७॥

५१५ अन्वयः— अश्विना ! सुतं सोमं महिषा इव अव गच्छथः, वना हारिद्रवा इव उप पतथः इत्, उषसा सूर्येण च सजोषसा वर्तिः त्रिः यातम् ॥७

५१५ अर्थ— हे अश्विदेवों (सुतं सोमं) निचोडकर रखे हुए सोमके प्रति (महिषा इव अव गच्छथः) भैंसोंके तुल्य–बहुत प्यासे होकर जाते हो, (वना) जलोंके समीप (हारिद्रवा इव) पंछीके तुल्य (उप पतथः इत्) चले जाते हो, उषःकाल एवं सूर्योदयके समय (वर्तिः त्रिः यातं) घरके समीप तीन बार जाओ ॥

[५१६]

५१६ हंसाविव पतथो अध्वगाविव सोमं सुतं महिषेवाव गच्छथः । सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥८॥

५१६ हंसौऽइव । पतथः । अध्वगौऽइव । सोमम् । सुतम् । महिषाऽइव । अव । गच्छथः ॥ सऽजोषसा । उषसा । सूर्येण । च । त्रिः । वर्तिः । यातम् । अश्विना ॥८॥

५१६ अन्वयः— अश्विना ! हंसौ इव अध्वगौ इव पतथः, सुतं सोमं महिषा इव अव गच्छथः, उषसा सूर्येण च सजोषसा वर्तिः त्रिः यातम् ॥ ८ ॥

'५१६ अर्थ—(हंसौ इव) हंसोंकी नाईं, (अध्वगौ इव) पथिकके तुल्य (पतथः) तुम ऊपरसे आगिरते हो, निचोडकर रखे सोमको पीनेके लिए, जैसे दो भैंसे तालाबके समीप जाते हैं वैसेही, तुम आते हो; उषा एवं सूर्यसे युक्त हो तीन बार घर चले जाओ ॥

[५१७]

५१७ श्येनाविव पतथो हव्यदातये सोमं सुतं महिषेवाव गच्छथः । सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥९॥

५१७ श्येनौऽइव । पतथः । हव्यऽदातये । सोमम् । सुतम् । महिषाऽइव । अव । गच्छथः ॥ सऽजोषसौ । उषसा । सूर्येण । च । त्रिः । वर्तिः । यातम् । अश्विना ॥९॥

५१७ अन्वयः– हव्यदातये श्येनौ इव पतथः, सुतं सोमं महिषा इव अव गच्छथः ; हे अश्विना ! उषसा सूर्येण च सजोषसा वर्तिः त्रिः यातम् ॥ ९ ॥

५१७ अर्थ—(हव्य-दातये) अन्नका दान करने लिए (श्येनौ इव पतथः) बाज पंछीके समान वेगसे आते हो, तैयार सोमरसको पीनेके लिए भैंसोंके तुल्य शीघ्रगतिसे आते हो; हे अश्विदेवों ! उषःकाल एवं सूर्योदयकी वेलामें तीन बार जाओ ॥

[५१८]

५१८ पिबतं च तृष्णुतं चा च गच्छतं प्रजां च धत्तं द्रविणं च धत्तम् । सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥१०॥

५१८ पिबतम् । च । तृष्णुतम् । च । आ । च । गच्छतम् । प्रऽजाम् । च । धत्तम् । द्रविणम् । च । धत्तम् ॥ सऽजोषसौ । उषसा । सूर्येण । च । ऊर्जम् । नः । धत्तम् । अश्विना ॥१०॥

५१८ अन्वयः– पिबतं तृप्णुतं च आ गच्छतं च, प्रजां द्रविणं च धत्तम्; अश्विना ! उषसा सूर्येण च सजोषसा नः ऊर्जं धत्तम् ॥ १० ॥

५१८ अर्थ– (पिबतं तृप्णुतं च) सोमरस पी जाओ और तृप्त बनो तथा (आ गच्छतं च) आ जाओ; (प्रजां द्रविणं च धत्तं) सन्तान एवं धनवैभवको दे डालो; हे अश्विदेवों ! सूर्य एवं उषाके साथ रहते हुए तुम (नः ऊर्जं धत्तं) हमें बल देओ ॥

[५१९]

५१९ जयतं च प्र स्तुतं च प्र चावतं प्रजां च धत्तं द्रविणं
च धत्तम् । सजोषसा उषसा सूर्येण चोर्जं नो
धत्तमश्विना ॥११॥

५१९ जयतम् । च । प्र । स्तुतम् । च । प्र । च । अवतम् ।
प्रऽजाम् । च । धत्तम् । द्रविणम् । च । धत्तम् ॥
सऽजोषसौ । उषसा । सूर्येण । च ।
ऊर्जम् । नः । धत्तम् । अश्विना ॥११॥

५१९ अन्वयः— अश्विना ! जयतं प्र-स्तुतं च, प्र अवतं, प्रजां द्रविणं च धत्तं; उषसा सूर्येण च सजोषसा नः ऊर्जं धत्तम् ॥ ११ ॥

५१९ अर्थ– हे अश्विदेवों ! (जयतं, प्रस्तुतं च) तुम जीत लो और प्रशंसा करो, (प्र अवतं) खूब रक्षा करो, सन्तति तथा द्रव्यका दान करो, उषा एवं सूर्यके साथ रहते हुए हमें बल देदों ॥

[५२०]

५२० हतं च शत्रून् यततं च मित्रिणः प्रजां च धत्तं द्रविणं
च धत्तम् । सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना॥

५२० हतम् । च । शत्रून् । यततम् । च । मित्रिणः ।
प्रऽजाम् । च । धत्तम् । द्रविणम् । च । धत्तम् ॥
सऽजोषसौ । उषसा । सूर्येण । च ॥
ऊर्जम् । नः । धत्तम् । अश्विना ॥१२॥

५२० अन्वयः- शत्रून् हतं, मित्रिणः यततं च, प्रजां द्रविणं च धत्तं। अश्विना ! उषसा सूर्येण च सजोषसा नः ऊर्जं धत्तम् ॥ १२ ॥

५२० अर्थ— (शत्रून् हतं) दुश्मनोंका वध करो और (मित्रिणः यततं) मित्रोंको पानेका यत्न करो, प्रजा तथा धनका दान करो, हे अश्विदेवों ! उषा एवं सूर्यसे सम्मिलित हो हमें बल दो ॥

[५२१-५२३]

५२१ मित्रावरुणवन्ता उत धर्मवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् । सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥ १३

५२२ अङ्गिरस्वन्ता उत विष्णुवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् । सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥ १४

५२३ ऋभुमन्ता वृषणा वाजवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् । सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥ १५

५२१ मित्रावरुणऽवन्तौ । उत । धर्मऽवन्ता ।
मरुत्वन्ता । जरितुः । गच्छथः । हवम् ॥
सऽजोषसौ । उषसा । सूर्येण । च ।
आदित्यैः । यातम् । अश्विना ॥१३॥

५२२ अङ्गिरस्वन्तौ । उत । विष्णुऽवन्ता ।
मरुत्वन्ता । जरितुः । गच्छथः । हवम् ॥
सऽजोषसौ । उषसा । सूर्येण । च ।
आदित्यैः । यातम् । अश्विना ॥१४॥

५२३ ऋभुऽमन्ता । वृषणा । वाजऽवन्ता ।
मरुत्वन्ता । जरितुः । गच्छथः । हवम् ॥
सऽजोषसौ । उषसा । सूर्येण । च ।
आदित्यैः । यातम् । अश्विना ॥१५॥

५२१-५२३ अन्वयः— अश्विना ! मित्रावरुणवन्ता, धर्मवन्ता उत मरुत्वन्ता, अंगिरस्वन्ता उत विष्णुवन्ता, ऋभुमन्ता; वाजवन्ता वृषणा। जरितुः हवं गच्छथः, उषसा सूर्येण आदित्यैः च सजोषसा यातम् ॥ १३-१५ ॥

५२१-५२३ अर्थ— हे अश्विदेवों ! तुम मित्र, वरुण, धर्म एवं वीर मरुत्‌के साथ तथा अंगिरस् और विष्णुके साथ, ऋभुओं तथा अन्नके साथ (वृषणा।) बलवान् बनकर (जरितुः हवं गच्छथः) स्तोताकी पुकार सुनकर चले जाते हो; उषा, सूर्य तथा अदितिके पुत्रोंके साथ (यातं) तुम गमन करो ॥

[५२४-५२६]

५२४ ब्रह्म जिन्वतमुत जिन्वतं धियो हतं रक्षांसि सेधतममीवाः।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१६

५२५ क्षत्रं जिन्वतमुत जिन्वतं नॄन् हतं रक्षांसि सेधतममीवाः।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१७

५२६ धेनूर्जिन्वतमुत जिन्वतं विशो हतं रक्षांसि सेधतममीवाः।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१८॥

५२४ ब्रह्म। जिन्वतम्। उत। जिन्वतम्। धियः।
हतम्। रक्षांसि। सेधतम्। अमीवाः ॥
सऽजोषसौ। उषसा। सूर्येण। च।
सोमम्। सुन्वतः। अश्विना ॥१६॥

५२५ क्षत्रम्। जिन्वतम्। उत। जिन्वतम्। नॄन्।
हतम्। रक्षांसि। सेधतम्। अमीवाः ॥
सऽजोषसौ। उषसा। सूर्येण। च।
सोमम्। सुन्वतः। अश्विना ॥१७॥

५२६ धेनूः। जिन्वतम्। उत। जिन्वतम्। विशः।
हतम्। रक्षांसि। सेधतम्। अमीवाः ॥
सऽजोषसौ। उषसा। सूर्येण। च।
सोमम्। सुन्वतः। अश्विना ॥१८॥

५२४–५२६ अन्वयः– अश्विना ! रक्षांसि हतं, अमीवाः सेधतं, ब्रह्म उत धियः, क्षत्रं उत नॄन्, धेनूः उत विशः जिन्वतं; उषसा सूर्येण च सजोषसौ सोमं सुन्वतः ... ॥ १६–१८ ॥

५२४–५२६ अर्थ– हे अश्विदेवों ! (रक्षांसि हतं) राक्षसोंका वध करो (अमीवाः सेधतं) रोगोंको दूर करो (ब्रह्म उत धियः) ज्ञान, कार्य (क्षत्रं उत नॄन्) क्षात्रतेज तथा नेतृत्व गुणोंको (धेनूः उत विशः) गायों एवं प्रजाओंको (जिन्वतं) संतुष्ट रखो और उषःवेला एवं सूर्योदयके समय (सोमं सुन्वतः) सोम निचोडते हुएके समीप जाकर सोमपान करो ॥

[५२७–५२९]

५२७ अत्रेरिव शृणुतं पूर्व्यस्तुतिं श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥१९॥

५२८ सर्गाँ इव सृजतं सुष्टुतीरुप श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥२०॥

५२९ रश्मीँरिव यच्छतमध्वराँ उप श्यावाश्वस्य सुन्वतो
मदच्युता । सजोषसा उषसा सूर्येण चाश्विना
तिरोअह्न्यम् ॥२१॥

५२७ अत्रेःऽइव । शृणुतम् । पूर्व्यऽस्तुतिम् ।
श्यावऽअश्वस्य । सुन्वतः । मदऽच्युता ॥
सऽजोषसौ । उषसा । सूर्येण । च ।
अश्विना । तिरःऽअह्न्यम् ॥१९॥

५२८ सर्गान्ऽइव । सृजतम् । सुऽस्तुतीः । उप ।
श्यावऽअश्वस्य । सुन्वतः । मदऽच्युता ॥
सऽजोषसौ । उषसा । सूर्येण । च ।
अश्विना । तिरःऽअह्न्यम् ॥२०॥

५२९ रश्मीन्ऽइव । यच्छतम् । अध्वरान् । उप ।
श्यावऽअश्वस्य । सुन्वतः । मदऽच्युता ॥
सऽजोषसौ । । उषसा । सूर्येण । च ।
अश्विना । तिरःऽअह्न्यम् ॥२१॥

५२७-५२९ अन्वयः- मदच्युता अश्विना ! सुन्वतः श्यावाश्वस्य पूर्व्य-स्तुतिं अत्रेः इव शृणुतं, सुष्टुतीः सर्गान् इव उपसृजतम्, रश्मीन् इव अध्वरान् उप यच्छतम्; उषसा सूर्येण च सजोषसौ तिरोअह्न्यम् ... ॥१९-२१॥

५२७-५२९ अर्थ— हे (मदच्युता) शत्रुओंके गर्व हरण करनेवाले अश्वि-देवों ! (सुन्वतः श्यावाश्वस्य) सोमरस निचोडकर तैयार करते हुए श्यावा-श्वकी (पूर्व्यस्तुतिं) प्रथम स्तुतिको (अत्रेः इव शृणुतं) जैसे तुम अत्रिकी प्रशंसाको सुन चुके थे, वैसेही सुन लो, (सुष्टुतीः) अच्छी स्तुतियोंके (सर्गान् इव उप सृजतं) समीप आकर देवोंके समान दान देदो और (रश्मीन् इव) किरणों या लगामोंकी नाईं (अध्वरान् उप यच्छतं) हिंसारहित कार्योंको समीपसे नियंत्रित करो, उषा एवं सूर्योदयके समय कल तैयार बनाए हुए सोमका पान करो ॥

[५३०-५३१]

५३० अर्वाग् रथं नि यच्छतं पिबतं सोम्यं मधु ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२२॥

५३१ नमोवाके प्रस्थिते अध्वरे नरा विवक्षणस्य पीतये ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२३॥

५३२ स्वाहाकृतस्य तृम्पतं सुतस्य देवावन्धसः ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२४॥

५३० अर्वाक् । रथम् । नि । यच्छतम् ।
पिबतम् । सोम्यम् । मधु ॥
आ । यातम् । अश्विना । आ । गतम् ।
अवस्युः । वाम् । अहम् । हुवे ।
धत्तम् । रत्नानि । दाशुषे ॥२२॥

५३१ नमःऽवाके । प्रऽस्थिते । अध्वरे । नरा ।
विवक्षणस्य । पीतये ॥
आ । यातम् । अश्विना । आ । गतम् ।
अवस्युः । वाम् । अहम् । हुवे ।
धत्तम् । रत्नानि । दाशुषे ॥२३॥

५३२ स्वाहाऽकृतस्य । तृम्पतम् ।
सुतस्य । देवौ । अन्धसः ॥
आ । यातम् । अश्विना । आ । गतम् ।
अवस्युः । वाम् । अहम् । हुवे ।
धत्तम् । रत्नानि । दाशुषे ॥२४॥

५३०-५३१ अन्वयः- अश्विना ! आ यातं, आ गतं, अहं अवस्युः वां हुवे; रथं अर्वाक् नि यच्छतं, सोम्यं मधु पिबतं; विवक्षणस्य प्रस्थिते नमोवाके अध्वरे पीतये नरा आ यातं; स्वाहाकृतस्य सुतस्य अन्धसः देवौ तृम्पतं, दाशुषे रत्नानि धत्तम् ॥ २२-२४ ॥

५३०-५३१ अर्थ— हे अश्विदेवों ! (आ यातं; आ गतं) तुम आओ, चले आओ; (अहं अवस्युः) मैं रक्षणार्थी होकर (वां हुवे) तुम्हें बुलाता हूँ; (रथं अर्वाक् नि यच्छतं) रथको हमारे अभिमुख रोक लो, (सोम्यं मधु पिबतं) सोमरस मिलाये हुए मधुका पान करो (विवक्षणस्य प्रस्थिते) विशेष ढंगसे हवि ढोनेवालेके प्रवर्तित (नमोवाके अध्वरे) नमन एवं हिंसारहित कार्य-में (पीतये) सोम पीनेके लिए (नरा) हे नेता अश्विदेवों ! आओ

*

(स्वाहाकृतस्य सुतस्य अन्धसः) हवन किये तथा निचोडे हुए अन्नरसका पान करके (देवौ तृम्पतं) दानी तुम तृप्त बनो और पश्चात् (दाशुषे रत्नानि धत्तं) दानीके लिए रत्न दे डालो ॥

[५३३-५३५] (ऋ. ८।४२।४-६)

(५३३—५३५) नाभाकः काण्वः, अर्चनाना आत्रेयो वा । अनुष्टुप् ।

५३३ आ वां ग्रावाणो अश्विना धीभिर्विप्रा अचुच्यवुः ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥४॥

५३४ यथा वामत्रिरश्विना गीर्भिर्विप्रो अजोहवीत् ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥५॥

५३५ एवा वामह्व ऊतये यथाऽहुवन्त मेधिराः ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥६॥

५३३ आ । वाम् । ग्रावाणः । अश्विना ।
धीभिः । विप्राः । अचुच्यवुः ॥
नासत्या । सोमऽपीतये ।
नभन्ताम् । अन्यके । समे ॥४॥

५३४ यथा । वाम् । अत्रिः । अश्विना ।
गीःऽभिः । विप्रः । अजोहवीत् ॥
नासत्या । सोमऽपीतये ।
नभन्ताम् । अन्यके । समे ॥५॥

५३५ एव । वाम् । अह्वे । ऊतये ।
यथा । अहुवन्त । मेधिराः ॥
नासत्या । सोमऽपीतये ।
नभन्ताम् । अन्यके । समे ॥६॥

५३३-५३५ अन्वयः— नासत्या अश्विना ! सोमपीतये वां विप्राः ग्रावाणः आ अचुच्यवुः; यथा अत्रिः विप्रः वां गीर्भिः अजोहवीत् यथा मेधिराः अहुवन्त एव वां ऊतये अह्वे; अन्यके समे नभन्ताम् ॥ ४-६ ॥

५३३-५३५ अर्थ- हे सत्यके प्रवर्तक अश्विदेवों ! (सोमपीतये) सोमपानके लिए (वां) तुम दोनोंके लिए (विप्राः ग्रावाणः) ज्ञानी एवं सोम कूटनेके पत्थर (आ अचुच्यवुः) रस टपकाते रहे हैं, (यथा) जैसे ऋषि अत्रिने, जो (विप्रः) ज्ञानी था, (वां गीर्भिः अजोहवीत्) तुम्हें भाषणोंद्वारा बुलाया था, (यथा मेधिराः अहुवन्त) जैसे विद्वानोंने बुलाया था, (एव) वैसेही (वां ऊतये अह्वे) तुम्हें रक्षा करनेके लिए बुलाता हूँ, (अन्यके समे नभन्तां) दूसरे छोटे रक्षक झुक जायँ ॥

[५३६] (ऋ. ८।५७। [९ वाल०] १-४)

(५३६—५३९) मेध्यः काण्वः । त्रिष्टुप् ।

५३६ युवं दे॒वा क्रतु॑ना पू॒र्व्येण॑ यु॒क्ता रथे॑न त॒वि॒षं य॑जत्रा ।
आऽग॑च्छतं नास॒त्या शची॑भिरि॒दं तृ॒तीयं॒ सव॑नं पिबाथः ॥

५३६ यु॒वम् । दे॒वा । क्रतु॑ना । पू॒र्व्येण॑ ।
यु॒क्ताः । रथे॑न । त॒वि॒षम् । य॒ज॒त्रा ॥
आ । अ॒ग॒च्छ॒त॒म् । ना॒स॒त्या । शची॑भिः ।
इ॒दम् । तृ॒तीय॑म् । सव॑नम् । पि॒बा॒थः ॥१॥

५३६ अन्वयः— देवा ! यजत्रा नासत्या ! युवं पूर्व्येण क्रतुना युक्ता रथेन तविषं आ ऽगच्छतं; शचीभिः इदं तृतीयं सवनं पिबाथः ॥ १ ॥

५३६ अर्थ- हे (देवा) देवतारूपी ! (यजत्रा) हे पूजनीय ! हे सत्यके पालक ! (युवं) तुम दोनों (पूर्व्येण क्रतुना युक्ता) पूर्वकालीन कार्यसे युक्त होकर (रथेन तविषं आऽगच्छतं) रथपरसे बलपूर्वक हाँकते हुए आओ; (शचीभिः) शक्तियोंसे (इदं तृतीयं सवनं पिबाथः) इस तीसरे सवनमें सोम पीजाओ ॥

[५३७]

५३७ यु॒वां दे॒वास्त्रय॑ एकाद॒शासः॑ स॒त्याः स॒त्यस्य॑ ददृशे पु॒रस्ता॑त् । अ॒स्माकं॑ य॒ज्ञं सव॑नं जुषा॒णा पा॒तं सोम॑मश्विना॒ दीद्य॑ग्नी ॥२॥

५३७ युवाम् । देवाः । त्रयः । एकादशासः ।
सत्याः । सत्यस्य । ददृशे । पुरस्तात् ॥
अस्माकम् । यज्ञम् । सवनम् । जुषाणा ।
पातम् । सोमम् । अश्विना । दीद्यग्नी इति दीदिऽअग्नी ॥२

५३७ अन्वयः– त्रयः एकादशासः सत्याः देवाः युवां सत्यस्य पुरस्तात् ददृशे; दीद्यग्नी अश्विना! अस्माकं यज्ञं सवनं जुषाणा सोमं पातम् ॥ २ ॥

५३७ अर्थ— (त्रयः एकादशासः) तीनगुने ग्यारह याने ३३ (सत्याः देवाः) सच्चे देव, (युवां) तुम दोनों (सत्यस्य पुरस्तात् ददृशे) सत्यके आगे दीख पडे, हे (दीद्यग्नी) जगमगाते अग्निके सदृश तेजस्वी अश्विदेवों ! (अस्माकं यज्ञं सवनं जुषाणा) हमारे यज्ञ तथा सवनका सेवन करते हुए (सोमं पातं) सोमका पान करो ॥

[५३८]

५३८ पनाय्यं तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः ।
सहस्रं शंसा उत ये गविष्टौ सर्वाँ इत् ताँ उप याता पिबध्यै ॥३॥

५३८ पनाय्यम् । तत् । अश्विना । कृतम् । वाम् ।
वृषभः । दिवः । रजसः । पृथिव्याः ॥
सहस्रम् । शंसाः । उत । ये । गोऽइष्टौ ।
सर्वान् । इत् । तान् । उप । यात । पिबध्यै ॥३॥

५३८ अन्वयः— अश्विना ! वां तत् कृतं पनाय्यं (यत्) दिवः पृथिव्या रजसः वृषभः; ये गविष्टौ सहस्रं शंसाः तान् सर्वान् इत् पिबध्यै उप यात ॥३॥

५३८ अर्थ– (अश्विना) हे अश्विदेवों ! (वां तत् कृतं) तुम्हारा वह कार्य (पनाय्यं) प्रशंसनीय है, जोकि (दिवः) द्युलोकसे (पृथिव्याः) भूमंडलके हितके लिए (रजसः वृषभः) जलकी वर्षा करनेवाला हुआ है; (ये गविष्टौ) जो गायोंके ढूंढनेमें (सहस्रं शंसाः) हजारों कहनेयोग्य कार्य होते हैं, (तान् सर्वान् इत्) उन सभी स्थलोंके समीप जरूर (पिबध्यै उप यात) पीनेके लिए चले जाओ ॥

[५३९]

५३९ अयं वां भागो निहितो यजत्रेमा गिरो नासत्योप यातम् ।
पिबतं सोमं मधुमन्तमस्मे प्र दाश्वांसमवतं शचीभिः ॥४॥

५३९ अयम् । वाम् । भागः । निऽहितः । यजत्रा ।
इमाः । गिरः । नासत्या । उप । यातम् ॥
पिबतम् । सोमम् । मधुऽमन्तम् । अस्मेऽइति ।
प्र । दाश्वांसम् । अवतम् । शचीभिः ॥४॥

५३९ अन्वयः— यजत्रा नासत्या ! वां अयं भागः निहितः, इमाः गिरः उप यातं, अस्मे मधुमन्तं सोमं पिबतं, दाश्वांसं शचीभिः प्र अवतम् ॥ ४ ॥

५३९ अर्थ- हे (यजत्रा) पूजनीय अश्विदेवों ! (वां) तुम दोनोंके लिए (अयं भागः निहितः) यह भाग या हिस्सा रखा है (इमाः गिरः उप यातं) इन भाषणोंको सुननेके लिए हमारे समीप आओ (अस्मे मधुमन्तं सोमं पिबतं) हमारे लिए मधु डाले हुए सोमका पान करो और (दाश्वांसं शचीभिः) दानीको अपनी शक्तियोंसे (प्र अवतं) यथेष्ट मात्रामें सुरक्षित रखो॥

[५४०-५४१] (ऋ. ८।७३।१-१८)

(५४०-५५७) गोपवन आत्रेयः सप्तवध्रिर्वा । गायत्री ।

५४० उदीराथामृतायते युञ्जाथामश्विना रथम् ।
अन्ति षद्भूतु वामवः ॥१॥

५४१ निमिषश्चिज्जवीयसा रथेना यातमश्विना ।
अन्ति षद्भूतु वामवः ॥२॥

५४२ उप स्तृणीतमत्रये हिमेन घर्ममश्विना ।
अन्ति षद्भूतु वामवः ॥३॥

५४० उत् । ईराथाम् । ऋतऽयते ।
युञ्जाथाम् । अश्विना । रथम् ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥१॥

५४१ निऽमिषः । चित् । जवीयसा ।
रथेन । आ । यातम् । अश्विना ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥२॥

५४२ उप । स्तृणीतम् । अत्रये ।
हिमेन । घर्मम् । अश्विना ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥३॥

५४०-५४२ अन्वयः- अश्विना ! ऋतायते उदीराथां, रथं युञ्जाथां; निमिषः चित् जवीयसा रथेन आ यातं; अत्रये घर्मं हिमेन उप स्तृणीतं; वां अवः अन्ति सत् भूतु ॥ १-३ ॥

५४०-५४२ अर्थ— हे अश्विदेवों ! (ऋतायते उदीराथां) सरल मार्गसे जानेहारेके लिए तुम आजाओ, (रथं युञ्जाथां) रथको तैयार करो; (निमिषः चित् जवीयसा) पलकसे भी वेगवान् (रथेन आ यातं) रथपरसे आजाओ; (अत्रये) ऋषि अत्रिके लिए (घर्मं हिमेन) गर्म अग्निको बर्फसे (उप स्तृणीतं) ढक चुके हो, (वां अवः) तुम्हारी रक्षा (अन्ति सत् भूतु) सदैव हमारे निकट विद्यमान होती रहे ॥

[५४३-५४५]

५४३ कुह स्थः कुह जग्मथुः कुह श्येनेव पेतथुः ।
अन्ति षद्भूतु वामवः ॥४॥

५४४ यदुद्य कर्हि चिच्छुश्रूयातमिमं हवम् ।
अन्ति षद्भूतु वामवः ॥५॥

५४५ अश्विना यामहूतमा नेदिष्ठं याम्याप्यम् ।
अन्ति षद्भूतु वामवः ॥६॥

५४३ कुह । स्थः । कुह । जग्मथुः ।
कुह । श्येनाऽइव । पेतथुः ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥४॥

५४४ यत् । अद्य । कर्हि । कर्हि । चित् ।
शुश्रुयातम् । इमम् । हवम् ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥५॥

५४५ अश्विना । यामऽहूतमा ।
नेदिष्ठम् । यामि । आप्यम् ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥६॥

५४३-५४५ अन्वयः- कुह स्थः ? कुह जग्मथुः ? श्येना इव कुह पेतथुः ? अद्य यत् कर्हि कर्हि चित् इमं हवं शुश्रुयातं; यामहूतमा अश्विना नेदिष्ठं आप्यं यामि, वां अवः अन्ति सत् भूतु ॥ ४-६ ॥

५४३-५४५ अर्थ— (कुह स्थः) भला तुम कहाँ हो ? (कुह जग्मथुः) बतलाओ तो किधर तुम जा चुके ? (श्येना इव) बाज पंछीकी न्याईं (कुह पेतथुः) भला तुम किधर गये थे ? (अद्य) आज (यत्) अगर कहीं (कर्हि कर्हि चित्) किसी भी स्थान या किसी भी कालमें (इमं हवं शुश्रु-यातं) इस पुकारको तुम सुन सको तो; (यामहूतमा अश्विना) बिलकुल ठीक समय बुलानेयोग्य अश्विदेवोंको (नेदिष्ठं आप्यं यामि) अत्यन्त निकटवर्ती बान्धवके तुल्य समझकर मैं उनके पास चला जाता हूँ, (वां अवः अन्ति सत् भूतु) तुम्हारा संरक्षण समीपवर्ती हो जाए ॥

[५४६-५४९]

५४६ अवन्तमत्रये गृहं कृणुतं युवमश्विना ।
आन्ति षद्भूतु वामवः ॥७॥

५४७ वरेथे अग्निमातपो वदते वल्ग्वत्रये ।
अन्ति षद्भूतु वामवः ॥८॥

५४८ प्र सप्तवध्रिराशसा धारामग्नेरशायत ।
अन्ति षद्भूतु वामवः ॥९॥

५४९ इहा गतं वृषण्वसू शृणुतं म इमं हवम् ।
अन्ति षद्भूतु वामवः ॥१०॥

५४६ अर्वन्तम् । अत्रये । गृहम् ।
कृणुतम् । युवम् । अश्विना ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥७॥

५४७ वरेथे इति । अग्निम् । आऽतपः ।
वदते । वल्गु । अत्रये ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥८॥

५४८ प्र । सप्तऽवध्रिः । आऽशसा ।
धाराम् । अग्नेः । अशायत ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥९॥

५४९ इह । आ । गतम् । वृषण्वसू इति वृषण्ऽवसू ।
शृणुतम् । मे । इमम् । हवम् ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥१०॥

५४६-५४९ अन्वयः— अश्विना ! युवं अत्रये अवन्तं गृहं कृणुतं, वल्गु वदते अत्रये आतपः अग्निं वरेथे; सप्तवध्रिः आशसा अग्नेः धारां प्र अशायत; वृषण्वसू ! मे इमं हवं शृणुतं, इह आ गतं; वां अवः अन्ति सत् भूतु ॥७-१०॥

५४६-५४९ अर्थ— हे अश्विदेवों ! (युवं अत्रये) तुमने अत्रिके लिये (अवन्तं गृहं कृणुतं) रक्षणक्षम घर बना चुके, (वल्गु वदते अत्रये) सुन्दर ढंगसे भाषण करनेवाले अत्रिके लिये (आतपः अग्निं वरेथे) चारों ओरसे धधकते हुए अग्निको हटाते हो, सप्तवध्रिने (आशसा) आशापूर्ण प्रशंसासे (अग्नेः धारां प्र अशायत) अग्निकी ऊँची लपटको भूमितक बिछाया। हे (वृषणवसू) धनकी वर्षा करनेवाले ! (मे इमं हवं शृणुतं) मेरी इस पुकारको सुन लो (इह आ गतं) इधर आओ मेरी इच्छा है कि तुम्हारा संरक्षण समीप रहे ॥

[५५०-५५२]

५५० किमिदं वां पुराणवज्जरतोरिव शस्यते ।
अन्ति षद्भूतु वामवः ॥११॥

५५१ समानं वां सजात्यं समानो बन्धुरश्विना ।
आन्ति षद्भूतु वामवः ॥१२॥
५५२ यो वां रजांस्यश्विना रथो वियाति रोदसी ।
अन्ति षद्भूतु वामवः ॥१३॥

५५० किम् । इदम् । वाम् । पुराणऽवत् ।
जरतोःऽइव । शस्यते ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥११॥
५५१ समानम् । वाम् । सऽजात्यम् ।
समानः । बन्धुः । अश्विना ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥१२॥
५५२ यः । वाम् । रजांसि । अश्विना ।
रथः । विऽयाति । रोदसी इति ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥१३॥

५५०-५५२ अन्वयः— वां किं इदं जरतोः पुराणवत् इव शस्यते, वां सजात्यं समानं, अश्विना ! बन्धुः समानः; अश्विना ! वां यः रथः रोदसी रजांसि वियाति; वां अवः अन्ति सत् भूतु ॥ ११-१३ ॥

५५०-५५२ अर्थ— (वां) तुम दोनोंके बारेमें (किं इदं) यह क्या (जरतोः पुराणवत् शस्यते) बूढे होनेवालोंको पुरानी बात जैसी अच्छी लगती है, वैसेही बताया जाता है; (वां सजात्यं समानं) तुम्हारा उत्पन्न होना समान है और हे अश्विदेवों ! (बन्धुः समानः) बांधव भी समान है, (वां यः रथः) तुम्हारा जो रथ (रोदसी रजांसि वियाति) द्युलोक और भूलोक एवं अन्य भुवनोंको पार कर चला जाता है, इसलिए हम चाहते हैं कि तुम्हारा संरक्षण समीप रहनेवाला होवे ॥

[५५३-५५५]

५५३ आ नो गव्येभिरश्व्यैः सहस्रैरुप गच्छतम् ।
आन्ति षद्भूतु वामवः ॥१४॥

*

५५४ मा नो गव्येभिरश्व्यैः सहस्रेभिरति ख्यतम् ।
अन्ति षद्भूतु वामवः ॥१५॥

५५५ अरुणप्सुरुषा अभूदकुर्ज्योतिर्ऋतावरी ।
अन्ति षद्भूतु वामवः ॥१६॥

५५३ आ । नः । गव्येभिः । अश्व्यैः ।
सहस्रैः । उप । गच्छतम् ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥१४॥

५५४ मा । नः । गव्येभिः । अश्व्यैः ।
सहस्रेभिः । अति । ख्यतम् ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥१५॥

५५५ अरुणऽप्सुः । उषाः । अभूत् ।
अकः । ज्योतिः । ऋतऽवरी ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥१६॥

५५३-५५५ अन्वयः- नः सहस्रैः गव्येभिः अश्व्यैः आ उप गच्छतं; नः सहस्रेभिः गव्येभिः अश्व्यैः मा अति ख्यतं; उषा अरुणप्सुः अभूत्, ऋतावरी ज्योतिः अकः; वां अवः अन्ति सत् भूतु ॥ १४-१६ ॥

५५३-५५५ अर्थ— (नः सहस्रैः) हमारे समीप हजारों (गव्येभिः अश्व्यैः) गायों और घोडोंके झुंडोंके साथ (आ उप गच्छतं) समीप आजाओ । (नः) हमें (सहस्रेभिः गव्येभिः अश्व्यैः) हजारों गौओं और घोडोंके झुंडोंसे (मा अति ख्यतं) युक्त हो छोड न जाओ । (उषा अरुणप्सुः अभूत्) उषःवेला लालिमा मयरूपवाली हुई (ऋतावरी ज्योतिः अकः) ऋतसे युक्त वह प्रकाशका सृजन कर चुकी है, इसलिए तुम्हारा संरक्षण समीप रहनेवाला होवे ॥

[५५६-५५७]

५५६ अश्विना सु विचाकशद् वृक्षं परशुमाँ इव ।
आन्ति षद्भूतु वामवः ॥१७॥

५५७ पुरं न धृष्णवा रुज कृष्णया बाधितो विशा ।
अन्ति षद्भूतु वामवः ॥१८॥

५५६ अश्विना । सु । विऽचाकशत् ।
वृक्षम् । परशुमान्ऽइव ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥१७॥

५५७ पुरम् । न । धृष्णो इति । आ । रुज ।
कृष्णया । बाधितः । विशा ॥
अन्ति । सत् । भूतु । वाम् । अवः ॥१८॥

५५६-५५७ अन्वयः- अश्विना! परशुमान् वृक्षं इव सु विचाकशत्; धृष्णो! कृष्णया विशा बाधितः पुरं न रुज; वां अवः अन्ति सत् भूतु ॥ १७-१८ ॥

५५६-५५७ अर्थ— हे अश्विदेवों ! (परशुमान् वृक्षं इव) हाथमें कुल्हाडी रखनेवाला पेडको जैसे तोड डालता है, वैसेही अँधेरेको मिटाकर सूर्य ठीक प्रकाशमान होगया है। (धृष्णो) हे साहसी ! (कृष्णया विशा बाधितः) काली प्रजासे पीडित तू (पुरं न रुज) शत्रुनगरीको जैसे इन्द्रने भग्न किया, वैसेही इसे विनष्ट कर । तुम दोनोंका संरक्षण समीप रहनेवाला होवे ॥

[५५८-५६१] (ऋ० ८।८५।१-९)

(५५८-५६६) कृष्ण आङ्गिरसः । गायत्री ।

५५८ आ मे हवं नासत्याऽश्विना गच्छतं युवम् ।
मध्वः सोमस्य पीतये ॥१॥

५५९ इमं मे स्तोममश्विनेमं मे शृणुतं हवम् ।
मध्वः सोमस्य पीतये ॥२॥

५६० अयं वां कृष्णो अश्विना हवते वाजिनीवसू ।
मध्वः सोमस्य पीतये ॥३॥

५६१ शृणुतं जरितुर्हवं कृष्णस्य स्तुवतो नरा ।
मध्वः सोमस्य पीतये ॥४॥

५५८ आ । मे । हवम् । नासत्या ।
अश्विना । गच्छतम् । युवम् ॥
मध्वः । सोमस्य । पीतये ॥१॥

५५९ इमम् । मे । स्तोमम् । अश्विना ।
इमम् । मे । शृणुतम् । हवम् ॥
मध्वः । सोमस्य । पीतये ॥२॥

५६० अयम् । वाम् । कृष्णः । अश्विना ।
हवते । वाजिनीवसू इति वाजिनीऽवसू ॥
मध्वः सोमस्य । पीतये ॥३॥

५६१ शृणुतम् । जरितुः । हवम् ।
कृष्णस्य । स्तुवतः । नरा ॥
मध्वः । सोमस्य । पीतये ॥४॥

५५८ अन्वयः— नासत्या अश्विना ! युवं मध्वः सोमस्य पीतये मे हवं आ गच्छतम् ।

५५९ अन्वयः— अश्विना ! मध्वः सोमस्य पीतये मे इमं हवं, मे इमं स्तोमं श्रृणुतम् ।

५६० अन्वयः— वाजिनीवसू अश्विना ! मध्वः सोमस्य पीतये अयं कृष्णः वां हवते ।

५६१ अन्वयः— नरा ! जरितुः कृष्णस्य स्तुवतः हवं मध्वः सोमस्य पीतये श्रृणुतम् ।

५५८-५६१ अर्थ— हे (नासत्या) सत्यपालक वीरो ! (वाजिनी-वसू) सेनाहीको धन समझनेवाले (नरा अश्विना) नेता अश्विदेवों ! (युवं) तुम दोनों (मध्वः सोमस्य पीतये) मधुरिमामय सोमको पीनेके लिए (मे हवं आ गच्छतं) मेरी पुकारको सुनकर आओ, (मे इमं हवं) मेरी इस पुकारको (मे इमं स्तोमं) मेरे इस स्तोत्रको (श्रृणुतं) सुन लो, (अयं कृष्णः) यह कृष्ण ऋषि (वां हवते) तुम्हें बुलाता है, (जरितुः कृष्णस्य) स्तोता कृष्णके (स्तुवतः) प्रशंसा करते समय (हवं शृणुतं) उसकी पुकारको सुन लो ॥

[५६२–५६४]

५६२ छर्दिर्यन्तमदाभ्यं विप्राय स्तुवते नरा ।
मध्वः सोमस्य पीतये ॥५॥

५६३ गच्छतं दाशुषो गृहमित्था स्तुवतो अश्विना ।
मध्वः सोमस्य पीतये ॥६॥

५६४ युञ्जाथां रासभं रथे वीड्वङ्गे वृषण्वसू ।
मध्वः सोमस्य पीतये ॥७॥

५६२ छर्दिः । यन्तम् । अदाभ्यम् ।
विप्राय । स्तुवते । नरा ॥
मध्वः । सोमस्य । पीतये ॥५॥

५६३ गच्छतम् । दाशुषः । गृहम् ।
इत्था । स्तुवतः । अश्विना ॥
मध्वः । सोमस्य । पीतये ॥६॥

५६४ युञ्जाथाम् । रासभम् । रथे ।
वीळुऽअङ्गे । वृषण्वसू इति वृषण्ऽवसू ॥
६२४ अन्वयः- स्तोमं ऋध्याम, वाजं सनुयाम, सरथा इह नः मन्त्रं उप आ यातम्; गोषु अन्तः पक्वं मधु यशो न, भूतांशः अश्विनोः कामं आ अप्राः ॥ ११ ॥

६२४ अर्थ— हम (स्तोमं ऋध्याम) सत्कर्मको बढाते हैं। (वाजं सनुयाम) अन्नका दान करते हैं। (सरथा इह नः मन्त्रं उप आ यातं) रथमें बैठकर यहां हमारे मननीय स्तोत्र सुननेके लिये आओ। (गोषु अन्तः पक्वं मधु यशो न) गौके अन्दर परिपक्व मधुर अन्न तुमने रखा है। इसलिये। (भूतांशः अश्विनोः कामं आ अप्राः) भूतोंका अंशरूप ऋषि अश्विदेवोंकी भक्ति यथेच्छ तथा पूर्णरूपसे करता है ॥

[६२५] (ऋ. १०।१३१।४-५)

(६२५-६२६) सुकीर्तिः काक्षीवतः। ४ अनुष्टुप्, ५ त्रिष्टुप्।

६२५ युवं सुराममश्विना नमुचावासुरे सचा। विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥४॥

६२५ युवम्। सुरामम्। अश्विना। नमुचौ। आसुरे। सचा॥ विऽपिपाना। शुभः। पती इति। इन्द्रम्। कर्मऽसु। आवतम्॥४॥

६२५ अन्वयः— शुभस्पती अश्विना ! सुरामं पिपाना युवं, सचा आसुरे नमुचौ कर्मसु इन्द्रं आवतम् ॥ ४ ॥

६२५ अर्थ— हे (शुभस्पती अश्विना) उत्तम कर्मोंके संरक्षक दोनों अश्विदेवों ! (सुरामं वि-पिपाना युवं) उत्तम रमणीय रसका पान करनेवाले तुम (सचा) साथ साथ रहनेवाले दोनों देवोंने (आसुरे नमुचौ कर्मसु इन्द्रं आवतम्) नमुची असुरके साथ होनेवाले युद्धरूप कर्मोंमें इन्द्रकी सुरक्षा की ॥

[६२६]

६२६ पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः ।
यत् सुरामं व्यपिबः शचीभिः सरस्वती त्वा
मघवन्नभिष्णक् ॥५॥

६२६ पुत्रम्ऽइव । पितरौ । अश्विना । उभा ।
इन्द्र । आवथुः । काव्यैः । दंसनाभिः ॥
यत् । सुरामम् । वि । अपिबः । शचीभिः ।
सरस्वती । त्वा । मघऽवन् । अभिष्णक् ॥५॥

६२६ अन्वयः— पितरौ पुत्रं इव उभा अश्विना काव्यैः दंसनाभिः आवथुः; सुरामं यत् शचीभिः अपिबः, मघवन् ! सरस्वती त्वा अभिष्णक् ॥ ५ ॥

६२६ अर्थ— हे इन्द्र ! (पितरौ पुत्रं इव) मातापिता पुत्रकी जैसी रक्षा करते हैं वैसे (उभा अश्विना काव्यैः दंसनाभिः आवथुः) तुम दोनों प्रशंसनीय कर्मोंसे हमारी रक्षा करते हैं । (सुरामं यत् शचीभिः अपिबः) उत्तम रमणीय रस अपनी शक्तिके अनुसार तुमने पीया है । हे (मघवन्) इन्द्र ! (सरस्वती त्वा अभिष्णक्) सरस्वती तुम्हारी सेवा करती है, वर्णन करती है ॥

[६२७] (ऋ. १०।१४३।१-६)

(६२७-६३२) अत्रिः सांख्यः । अनुष्टुप् ।

६२७ त्यं चिदत्रिमृतजुरमर्थमश्वं न यातवे ।
कक्षीवन्तं यदी पुना रथं न कृणुथो नवम् ॥१॥

६२७ त्यम् । चित् । अत्रिम् । ऋतऽजुरम् ।
अर्थम् । अश्वम् । न । यातवे ॥
कक्षीवन्तम् । यदि । पुनरिति ।
रथम् । न । कृणुथः । नवम् ॥१॥

६२७ अन्वयः— त्यं चित् ऋतजुरं अत्रिं, अश्वं न यातवे अर्थम्; यदि कक्षीवन्तं पुनः नवं रथं न कृणुथः ॥१॥

६२७ अर्थ— (त्यं चित् ऋतजुरं अत्रिं) उस असुरोंके उपद्रवसे क्षीण हुए अत्रिको (अश्वं न यातवे) घोडेके समान वेगसे जानेके लिये (अर्थं) समर्थ बनानेके अर्थ तुमने सहायता दी । (यदि कक्षीवन्तं पुनः नवं रथं न कृणुथः) वैसेही कक्षीवान् ऋषिको पुनः तरुण, रथको पुनः नया बनानेके समान, बनाया ॥

[६२८]

६२८ त्यं चिदश्वं न वाजिनमरेणवो यमत्नत ।
दृळ्हं ग्रन्थिं न वि ष्यतमत्रिं यविष्ठमा रजः ॥२॥

६२८ त्यम् । चित् । अश्वम् । न । वाजिनम् ।
अरेणवः । यम् । अत्नत ॥
दृळ्हम् । ग्रन्थिम् । न । वि । स्यतम् ।
अत्रिम् । यविष्ठम् । आ । रजः ॥२॥

६२८ अन्वयः— अरेणवः, वाजिनं अश्वं न, यं अत्नत, त्यं चित् अत्रिं यविष्ठं रजः आ वि ष्यतं दृळ्हं ग्रन्थिं न ॥२॥

६२८ अर्थ— (अरेणवः, वाजिनं अश्वं न, यं अत्नत) धूलीके समान बिखरे न रहनेवाले असुरोंने, वेगवान् अश्वके समान जिस अत्रिको बांध रखा था । (त्यं चित् अत्रिं यविष्ठं) उस अत्रिको तरुण बनाकर (रजः आ विष्यतं) इस भूलोकमें बन्धमुक्त किया । (दृळ्हं ग्रन्थिं न) जैसे कोई दृढ ग्रन्थिको छोड देता है ॥

[६२९]

६२९ नरा दंसिष्ठावत्रये शुभ्रा सिषासतं धियः ।
अथा हि वां दिवो नरा पुनः स्तोमो न विशसे ॥३॥

६२९ नरा । दंसिष्ठौ । अत्रये ।
शुभ्रा । सिसासतम् । धियः ॥
अथ । हि । वाम् । दिवः । नरा ।
पुनरिति । स्तोमः । न । विऽशसे ॥३॥

६२९ अन्वयः— नरा दंसिष्ठौ शुभ्रा ! अत्रये धियः सिषासतम्, अथ हि दिवः स्तोमः न नरा ! वां पुनः विशसे ॥ ३ ॥

६२९ अर्थ— हे (नरा दंसिष्ठौ शुभ्रा) नेता दर्शनीय सुन्दर वीरों ! (अत्रये धियः सिषासतं) अत्रिके लिये उत्तम बुद्धि और कर्मशक्तिको तुमने दिया । (अथ हि दिवः स्तोमः न) पश्चात् दिव्य स्तोत्रके समान, हे (नरा) नेता वीरो ! (वां पुनः विशसे) वही तुम दोनोंकी पुनः विशेष प्रशंसा करने लगा ॥

[६३०]

६३० चिते तद् वां सुराधसा रातिः सुमतिरश्विना ।
आ यन्नः सदने पृथौ समने पर्षथो नरा ॥४॥

६३० चिते । तत् । वाम् । सुऽराधसा ।
रातिः । सुऽमतिः । अश्विना ॥
आ । यत् । नः । सदने । पृथौ ।
समने । पर्षथः । नरा ॥४॥

६३० अन्वयः— सुराधसा अश्विना ! सुमतिः रातिः तत् वां चिते; नरा ! यद् पृथौ समने सदने नः आ पर्षथः ॥ ४ ॥

६३० अर्थ— हे (सुराधसा अश्विना) उत्तम दान देनेवाले अश्विदेवो ! (सुमतिः रातिः तत् वां चिते) तुम्हारी उत्तम बुद्धि और उत्तम दातृत्व-शक्ति यह सब तुम्हारे उत्तम ज्ञानका सूचक है । हे (नरा) नेताओ ! (यत् पृथौ समने सद्ने नः आपर्षथः) तुम विस्तृत यज्ञगृहमें हमारी सुरक्षा करते हैं। इसलिये हम तुम्हारी भक्ति करते है ॥

[६३१]

६३१ युवं भुज्युं समुद्र आ रजसः पार ईङ्खितम् ।
यातमच्छा पतत्रिभिर्नासत्या सातये कृतम् ॥५॥

६३१ युवम् । भुज्युम् । समुद्रे । आ ।
रजसः । पारे । ईङ्खितम् ॥
यातम् । अच्छ । पतत्रिऽभिः ।
नासत्या । सातये । कृतम् ॥५॥

६३१ अन्वयः— युवं समुद्रे, रजसः पारे ईङ्खितं भुज्युं अच्छ; पतत्रिभिः आ यातं, नासत्या ! सातये कृतम् ॥ ५ ॥

६३१ अर्थ— (युवं समुद्रे, रजसः पारे ईङ्खितं भुज्युं अच्छ) तुम दोनों समुद्रमें, रेतके प्रदेशके परे डूबनेवाले भुज्युके पास (पतत्रिभिः आ यातं) पहुँच गये । हे (नासत्या) सत्यपालको ! (सातये कृतं) यह तुमने उनकी सहायताके लिये किया ॥

[६३२]

६३२ आ वां सुम्नैः शंयू इव मंहिष्ठा विश्ववेदसा ।
समस्मे भूषतं नरोत्सं न पिप्युषीरिषः ॥६॥

६३२ आ । वाम् । सुम्नैः । शंयू इवेति शंयूऽइव ।
मंहिष्ठा । विश्वऽवेदसा ॥
सम् । अस्मे इति । भूषतम् । नरा ।
उत्सम् । न । पिप्युषीः । इषः ॥६॥

६३१ अन्वयः— विश्ववेदसा नरा! वां शंयू इव मंहिष्ठा सुम्नैः आ; पिप्युषीः इषः उस्रं न अस्मे सं भूषतम् ॥ ६ ॥

६३१ अर्थ— हे (विश्ववेदसा नरा) सब जाननेवाले नेता वीरों! (वां शंयू इव मंहिष्ठा सुम्नैः आ) तुम दोनों सुखदायी राजाओंके समान सम्मान योग्य, सब सुखसाधनोंके साथ हमारे पास आते हैं। (पिप्युषीः इषः उस्रं न अस्मे सं भूषतं) पुष्ट करनेवाले धनके हौजको (गौके दुग्धाशयको) देनेके समान, हमें धन देकर सुभूषित करो ॥ /

॥६३२॥ (ऋ. १०।१८४।३)

(६३२) त्वष्टा गर्भकर्ता, विष्णुर्वा प्राजापत्यः। अनुष्टुप्।

६३२ हिरण्ययीं अरणी यं निर्मन्थतो अश्विना।
तं ते गर्भं हवामहे दशमे मासि सूतवे ॥३॥

६३२ हिरण्ययी इति। अरणी इति। यम्।
निःऽमन्थतः। अश्विना ॥
तम्। ते। गर्भम्। हवामहे।
दशमे। मासि। सूतवे ॥३॥

६३२ अन्वयः— हिरण्ययी अरणी यं अश्विना निर्मन्थतः; तं ते गर्भं हवामहे दशमे मासि सूतवे ॥ ३ ॥

६३२ अर्थ— (हिरण्ययी अरणी) सुवर्णकी अरणियाँ (यं अश्विना निर्मन्थतः) जिसको अश्विदेव मथते हैं, (तं ते गर्भं हवामहे) हे स्त्री! तुम्हारे लिये उस गर्भको हम आवाहन करते हैं कि वह (दशमे मासि सूतवे) दसवें महिनेमें उत्पन्न हो जाय ॥

[६३४] (वा. य. १४।१-५)

६३४ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिमासीद साधुया।
उख्यस्य केतुं प्रथमं जुषाणाश्विनाऽध्वर्यू सादयतामिह त्वा

*

६३४ ध्रुवक्षितिरिति ध्रुवऽक्षितिः । ध्रुवयोनिरिति ध्रुवऽयोनिः ।
ध्रुवा । असि । ध्रुवम् । योनिम् । आ । सीद ।
साधुयेति साधुऽया ॥
उख्यस्य । केतुम् । प्रथमम् । जुषाणा ।
अश्विना । अध्वर्यूऽइत्यध्वर्यू । सादयताम् । इह । त्वा ॥ १

६३४ अन्वयः— ध्रुवक्षितिः, ध्रुवयोनिः ध्रुवा, उख्यस्य प्रथमं केतुं जुषाणा असि; साधुया ध्रुवं योनिं आ सीद, अध्वर्यू अश्विनौ त्वा इह सादयताम् ॥ १ ॥

६३४ अर्थ- तू (ध्रुवक्षितिः) स्थिर रहनेवाली (ध्रुवयोनिः) स्थिर जन्मस्थानमें रहनेवाली अत एव (ध्रुवा) स्थिर हो । (उख्यस्य प्रथमं केतुं जुषाणा असि) उषाके प्रथम ध्वजाकी सेवा करनेवाली है । अतः (साधुया ध्रुवं योनिं आ सीद) उत्तम पद्धतिसे स्थिर स्थानमें बैठ । (अध्वर्यू अश्विनौ त्वा इह सादयतां) अहिंसक कार्य करनेवाले दोनों अश्विदेव तुझे यहां स्थापन करें । अग्निको मथकर इस वेदीमें रखें ॥

[६३५]

६३५ कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः ।
अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि
सौभगायाश्विनाऽध्वर्यू सादयतामिह त्वा ॥ २ ॥

६३५ कुलायिनी । घृतवतीति घृतऽवती । पुरन्धिरिति पुरम्ऽधिः । स्योने । सीद । सदने । पृथिव्याः ।
अभि । त्वा । रुद्राः । वसवः । गृणन्तु ।
इमा । ब्रह्म । पीपिहि । सौभगाय ।
अश्विना । अध्वर्यूऽइत्यध्वर्यू । सादयताम् । इह । त्वा ॥ २

६३५ अन्वयः— पृथिव्याः स्योने सदने सीद, कुलायिनी घृतवती पुरन्धिः वसवः रुद्राः त्वा अभि गृणन्तु, सौभगाय इमा ब्रह्म पीपिहि, अध्वर्यू अश्विनौ त्वा इह सादयताम् ॥ २ ॥

६३५ अर्थ— (पृथिव्याः स्योने सदने सीद) पृथ्वीके ऊपरके सुखदायी स्थानमें बैठ । (कुलायिनी घृतवती) घरवाली और घीसे भरपूर होकर (पुरन्धिः) नगरका धारण करनेवाली हो । (वसवः रुद्राः त्वा अभि गृणन्तु) निवास करनेवाले और शत्रुको रुलानेवाले वीर तुम्हारी प्रशंसा करें। (सौभगाय इमा ब्रह्म पीपिहि) उत्तम भाग्य प्राप्त करनेके लिये इस स्तोत्रको—इस ज्ञानकोरसमय बनाओ । (अध्वर्यू अश्विनौ त्वा इह सादयतां) अहिंसक कार्य करनेवाले दोनों अश्विदेव तुझे यहां स्थापन करें ॥

[६३६]

६३६ स्वैर्दक्षैर्दक्षपितेह सीद देवानां सुम्ने बृहते रणाय ।
पितेवैधि सूनव आ सुशेवा स्वावेशा तन्वा
संविशस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ॥३॥

६३६ स्वैः । दक्षैः । दक्षपितेति दक्षऽपिता । इह । सीद ।
देवानाम् । सुम्ने । बृहते । रणाय ॥
पितेवेति पिताऽइव । एधि । सूनवे । आ ।
सुशेवेति सुऽशेवा । स्वावेशेति । सुऽआवेशा ।
तन्वा । सम् । विशस्व ।
अश्विना । अध्वर्यूऽइत्यध्वर्यू । सादयताम् । इह । त्वा ॥

६३६ अन्वयः— पिता सूनवे इव दक्षपिता देवानां रणाय बृहते सुम्ने स्वैः दक्षैः इह सीद; सुशेवा एधि, स्वावेशा तन्वा संविशस्व अध्वर्यू अश्विनौ त्वा इह सादयताम् ॥ ३ ॥

६३६ अर्थ— (पिता सूनवे इव) जैसा पिता पुत्रको सहारा देता है उस तरह (दक्षपिता देवानां रणाय) बलका संरक्षण करनेवाली होकर दिव्य विबुधोंके आनंदके लिये (बृहते सुम्ने) बडे सुखके लिये (स्वैः दक्षैः इह सीद) अपने बलोंके साथ तुम यहां आकर बैठ। (सुशेवा एधि) उत्तम सेवा करने योग्य हो । (स्वावेशा तन्वा सं विशस्व) सुखसे प्रवेश करनेयोग्य उत्तम चपल शरीरसे यहां आकर रह । अध्वर्यु अश्विदेव तुझे यहां स्थापन करें ॥

[६३७]

६३७ पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे
अभि गृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽ
यजस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ॥४॥

६३७ पृथिव्याः । पुरीषम् । असि । अप्सः । नाम ।
ताम् । त्वा । विश्वे । अभि । गृणन्तु । देवाः ॥
स्तोमपृष्ठेति स्तोमऽपृष्ठा । घृतवतीति घृतऽवती । इह ।
सीद । प्रजावदिति प्रजाऽवत् । अस्मेऽइत्यस्मे ।
द्रविणा । आ । यजस्व ।
अश्विना । अध्वर्यूऽइत्यध्वर्यू । सादयताम् । इह । त्वा ॥

६३७ अन्वयः— पृथिव्याः पुरीषं अप्सः नाम असि तां त्वा विश्वे देवाः अभि गृणन्तु; स्तोमपृष्ठा घृतवती इह सीद प्रजावत् द्रविणं अस्मे आ यजस्व अध्वर्यू अश्विनौ त्वा इह सादयताम् ॥ ४ ॥

६३७ अर्थ— (पृथिव्याः पुरीषं) तू पृथ्वीको पूर्ण करनेवाली, (अप्सः नाम असि) तू उदकका अन्नरस हो । (तां त्वा विश्वे देवा अभि गृणन्तु) तुम्हारी सब देव प्रशंसा करें । (स्तोमपृष्ठा घृतवती) स्तोत्रोंसे प्रशंसित और घीसे भरपूर होकर (इह सीद) यहां रह । (प्रजावत् द्रविणा अस्मे आ यजस्व) संतान और धन हमें दे । अध्वर्यु अश्विदेव तुम्हें यहां रखें ॥

[६३८]

६३८ अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्री विष्टम्भनीं
दिशामधिपत्नीं भुवनानाम् ।
ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाऽध्वर्यू
सादयतामिह त्वा ॥५॥

६३८ अदित्याः । त्वा । पृष्ठे । सादयामि ।
अन्तरिक्षस्य । धर्त्रीम् । विष्टम्भनीम् । दिशाम् ॥
अधिपत्नीमित्यधिऽपत्नीम् । भुवनानाम् । ऊर्मिः । द्रप्सः ।
अपाम् । असि । विश्वकर्मेति विश्वऽकर्मा । ते । ऋषिः ।
अश्विना । अध्वर्यू इत्यध्वर्यू । सादयताम् । इह । त्वा ॥५

६३८ अन्वयः— अन्तरिक्षस्य धर्त्रीं, भुवनानां अधिपत्नीं त्वा अदित्याः पृष्ठे सादयामि; अपां द्रप्सः ऊर्मिः असि, ते ऋषिः विश्वकर्मा अध्वर्यू अश्विनौ त्वा इह सादयताम् ॥ ५ ॥

६३८ अर्थ— (अन्तरिक्षस्य धर्त्रीं) अन्तरिक्षका धारण करनेवाली, (भुवनानां अधिपत्नीं) भुवनोंका पालन करनेवाली, (त्वा अदित्याः पृष्ठे सादयामि) तुम्हें पृथ्वीके ऊपर स्थिर रूपसे स्थापित करते हैं। (अपां द्रप्सः ऊर्मिः असि) तू उदककी राशीसदृश हो। (ते ऋषिः विश्वकर्मा) तेरा द्रष्टा विश्वकर्मा है। अध्वर्यू अश्विदेव तुझे यहां स्थापन करें ॥

[६३९] (वा० य० ३८।१०,१३)

६३९ विश्वा आशा दक्षिणसद् विश्वान् देवानयाडिह ।
स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना ॥१०॥

६३९ विश्वाः । आशाः । दक्षिणसादिति दक्षिणऽसत् ।
विश्वान् । देवान् । अयाट् । इह ॥
स्वाहाकृतस्येति स्वाहाऽकृतस्य । घर्मस्य ।
मधोः । पिबतम् । अश्विना ॥१०॥

६३९ अन्वयः— इह दक्षिणसत् विश्वाः आशाः विश्वान् देवान् अयाट्; अश्विना ! स्वाहाकृतस्य मधोः घर्मस्य पिबतम् ॥ १० ॥

६३९ अर्थ— (इह दक्षिणसत्) यहां दक्षिण दिशामें रहनेवाला (विश्वाः आशाः विश्वान् देवान् अयाट्) सब दिशाओं और सब देवोंका यजन करता है। हे (अश्विना) अश्विदेवों ! (स्वाहाकृतस्य मधोः घर्मस्य पिबतं) स्वाहाकारपूर्वक दिये मधुर रसका पान करो ॥

[६४०]

६४० अपातामश्विना घर्ममनु द्यावापृथिवी अमꣳसाताम् ।
इहैव रातयः सन्तु ॥१३॥

६४० अपाताम् । अश्विना । घर्मम् । अनु ।
द्यावापृथिवीऽइति द्यावापृथिवी । अमꣳसाताम् ॥
इह । एव । रातयः । सन्तु ॥१३॥

६४० अन्वयः— अश्विना घर्मः अपातां द्यावापृथिवी अन्वमंसातां; इह एव रातयः सन्तु ॥ १३ ॥

६४० अर्थ—(अश्विना घर्मं अपातां) अश्विदेवोंने रसका पान किया है । उसका (द्यावापृथिवी अन्वमंसातां) द्यु और पृथ्वीने अनुमोदन किया है । (इह एव रातयः सन्तु) यहांही सब धन रहे ॥

[६४१] (साम० ३०५)

(६४१) अश्विनौ वैवस्वतौ । बृहती ।

६४१ कुष्ठः को वामश्विना तपानो देवा मर्त्यः ।
घ्नता वामश्मया क्षयमाणोऽशुनेत्थमु आद्वन्यथा ॥३॥

६४१ कु-स्थः । कः । वाम् । अश्विना ।
तपानः । देवा । मर्त्यः ॥
घ्नता । वाम् । अश्मया । क्षयमाणः ।
अꣳशुना । इत्थम् । उ । आत् । उ ।
अन्यथा । अनु । यथा ॥३॥

६४१ अन्वयः— देवा अश्विना ! कु-स्थः कः मर्त्यः वां तपानः वां अश्मया घ्नता अंशुना क्षयमाणः आद्वनु यथा इत्थं उ ॥ ३ ॥

६४१ अर्थ— हे (देवा अश्विना) प्रकाशमान अश्विदेवों! (कु-स्थः कः मर्त्यः) भूमिपर रहनेवाला कौन मानव (वां सपानः) तुम्हको प्रकाश दे सकता है ? (वां अश्मया) आपको खानेके लिये देनेके अर्थ (स्रुता अंशुना क्षयमाणः) कूटकर निकाले रसके कारण क्षीण हुआ, थका हुआ, उपासक (आद्नन् यथा) यथेच्छ भोजन करनेवालेके समान (इत्थं उ) ही बलवान् होता है ॥

[६४२] (अथर्व. २।२९।६)
(६४२-६४५) अथर्वा । त्रिष्टुप् ।

६४२ शिवाभिष्टे हृदयं तर्पयाम्यनमीवो मोदिषीष्ठाः सुवर्चाः ।
सवासिनौ पिबतां मन्थमेतमश्विनो रूपं परिधाय मायाम्

६४२ शिवाभिः । ते । हृदयम् । तर्पयामि ।
अनमीवः । मोदिषीष्ठाः । सुऽवर्चाः ॥
सऽवासिनौ । पिबताम् । मन्थम् । एतम् ।
अश्विनोः । रूपम् । परिऽधाय । मायाम् ॥६॥

६४२ अन्वयः— शिवाभिः ते हृदयं तर्पयामि, अनमीवः सुवर्चाः मोदिषीष्ठाः; सवासिनौ अश्विनोः रूपं मायां परिधाय एतं मन्थं पिबतम् ॥६॥

६४२ अर्थ— (शिवाभिः ते हृदयं तर्पयामि) कल्याण करनेवाली विद्याओंसे मैं तेरे हृदयकी तृप्ति करता हूं । तू (अन्-अमीवः सुवर्चाः मोदिषीष्ठाः) नीरोग और उत्तम तेजस्वी होकर आनन्दप्रसन्न हो । (सवासिनौ) साथ रहनेवाले तुम दोनों (अश्विनोः रूपं) अश्विदेवोंके समान सुंदर रूपको और उनकी (मायां परिधाय) कुशलतापूर्वक कर्म करनेकी शक्तिको धारण कर (एतं मन्थं पिबतं) इस मधुर रसका पान करो ॥

[६४३] (अथर्व. ६।५०।१-३)
अथर्वा (अभयकामः) । १ विराड् जगती, २-३ पथ्यापङ्क्तिः ।

६४३ हतं तर्दं समङ्कमाखुमश्विना छिन्तं शिरो अपि पृष्टीः शृणीतम् । यवान्नेददानपि नह्यतं मुखमथाभयं कृणुतं धान्याय ॥१॥

६४३ हुतम् । तर्दम् । सम्ऽअङ्कम् । आखुम् ।
अश्विना । छिन्तम् । शिरः । अपि । पृष्टीः । शृणीतम् ॥
यवान् । न । इत् । अदान् । अपि । नह्यतम् ।
मुखम् । अथ । अभयम् । कृणुतम् । धान्याय ॥१॥

६४३ अन्वयः— अश्विनौ ! तर्दं समङ्कं आखुं हतं शिरः छिन्तं पृष्टीः अपि शृणीतम्; यवान् न इत् अदान् मुखं अपि नह्यतं, अथ धान्याय अभयं कृणुतम् ॥ १ ॥

६४३ अर्थ— हे (अश्विनौ) अश्विदेवों ! (तर्दं समङ्कं आखुं हतं) नाश करनेवाले बिलमें रहनेवाले चूहेको मारो ! (शिरः छिन्तं) उसका सिर काटो । (पृष्टीः अपि शृणीतं) उसकी पीठ तोडो । वे चूहे (यवान् न इत् अदान्) जौंको न खावें । (मुखं अपि नह्यतं) उनका मुख बंद करो । (अथ धान्याय अभयं कृणुतं) और धान्यके लिये निर्भयता करो ॥

[६४४]

६४४ तर्द है पतङ्ग है जभ्य हा उपक्वस ।
ब्रह्मेवासंस्थितं हविरनदन्त इमान्यवानहिंसन्तो अपोदित ॥

६४४ तर्द । है । पतङ्ग । है । जभ्य । है । उपऽक्वस ॥
ब्रह्माऽइव । असम्ऽस्थितम् । हविः । अनदन्तः ।
इमान् । यवान् । अहिंसन्तः । अपऽउदित ॥२॥

६४४ अन्वयः— हे तर्द ! हे पतङ्ग ! हे जभ्य उपक्वस ! ब्रह्मा इव असंस्थितं हविः इमान् यवान् अनदन्तः अहिंसन्तः अपोदित ॥ २ ॥

६४४ अर्थ— (हे तर्द) हे हिंसक ! (हे पतंग) हे शलभ ! (हे जभ्य उपक्वस) हे वध्य और दुष्ट ! (ब्रह्मा इव असंस्थितं हविः) ब्रह्मा जैसा असंस्कृत हविको छोडता है, उस तरह (इमान् यवान् अनदन्तः अहिंसन्तः) इन जौओंको न खाते और न नष्ट करते हुए (अपोदित) दूर हट जाओ ॥

[६४५]

६४५ तर्दापते वघापते तृष्टजम्भा आ शृणोत मे ।
य आरण्या व्यद्वरा ये के च स्थ व्यद्वरास्तान्त्सर्वान्
जम्भयामसि ॥३॥

६४५ तर्दऽपते । वघाऽपते । तृष्टऽजम्भाः । आ । शृणोत । मे ।
ये । आरण्याः । विऽअद्वराः ॥
ये । के । च । स्थ । विऽअद्वराः ।
तान् । सर्वान् । जम्भयामसि ॥३॥

६४५ अन्वयः— तर्दापते, वघापते, तृष्टजम्भ ! मे आ शृणोत; ये आरण्याः व्यद्वराः ये के च व्यद्वराः स्थ तान् सर्वान् जम्भयामसि ॥ ३ ॥

६४५ अर्थ— हे (तर्दापते) महा हिंसक ! हे (वघापते) शलभ ! हे (तृष्टजम्भ) तीक्ष्ण दंष्ट्रावाले ! (मे आ शृणोत) मेरा भाषण सुनो । (ये आरण्याः व्यद्वराः) जो अरण्यमें रहकर अधिक खानेवाले हैं और (ये के च व्यद्वराः स्थ) जो कोई सर्वभक्षक हैं (तान् सर्वान् जम्भयामसि) इन सबका हम नाश करते हैं ॥

[६४६] (अथर्व. २।३०।२)

(६४६) प्रजापतिः । अनुष्टुप् ।

६४६ सं चेन्नयाथो अश्विना कामिना सं च वक्षथः ।
सं वां भगासो अग्मत सं चित्तानि समु व्रता ॥२॥

६४६ सम् । च । इत् । नयाथः । अश्विना ।
कामिना । सम् । च । वक्षथः ॥
सम् । वाम् । भगासः । अग्मत ।
सम् । चित्तानि । सम् । ऊं इति । व्रता ॥२॥

६४६ अन्वयः— कामिना अश्विना ! च इतः सं नयाथः, च सं वक्षथः, वां भगासः सं अग्मत चित्तानि सं व्रतानि सम् ॥ २ ॥

*

६४६ अर्थ— हे (कामिना अश्विना) इच्छा करनेवाले अश्विदेवों ! (च इतः सं नयाथः) यहांसे मिलकर चलो, (च सं वक्षथः) और मिलकर आगे बढो। (वां भगासः सं अग्मत) तुम दोनोंके ऐश्वर्य तुम्हारे साथ रहें, (चित्तानि सं) चित्त मिले रहें, (व्रतानि सं) तुम्हारे कर्म एक हो॥

इस मंत्रके 'कामिना आश्विना' ये पद अश्विदेवोंके समान इकट्ठे रहनेवाली पतिपत्नीके दर्शक हैं॥

[६४७] (अथर्व. ६।१०२।१-३)
(६४७-६४९) जमदग्निः। अनुष्टुप्।

६४७ यथाऽयं वाहो अश्विना समैति सं च वर्तते।
एवा मामभि ते मनः समैतु सं च वर्तताम् ॥१॥

६४७ यथा। अयम्। वाहः। अश्विना।
सम्ऽएति। सम्। च। वर्तते॥
एव। माम्। अभि। ते। मनः।
सम्ऽएतु। सम्। च। वर्तताम् ॥१॥

६४७ अन्वयः— अश्विनौ ! यथा अयं वाहः सं एति सं वर्तते; एवा ते मनः मां अभि सं आ एतु सं वर्ततां च ॥ १ ॥

६४७ अर्थ— हे (अश्विनौ) अश्विदेवों ! (यथा अयं वाहः सं एति) जिस तरह यह घोडा साथ साथ जाता है, और (सं वर्तते) मिलकर रहता है, (एवा ते मनः मां अभि) वैसा तेरा मन मेरे पास (सं आ एतु) आकर्षित हो जावे, और (सं वर्ततां च) मेरे साथ रहे॥

[६४८]

६४८ आऽहं खिदामि ते मनो राजाश्वः पृष्ट्यामिव।
रेष्मच्छिन्नं यथा तृणं मयि ते वेष्टतां मनः ॥२॥

६४८ आ। अहम्। खिदामि। ते। मनः।
राजऽअश्वः पृष्ट्याम्ऽइव॥
रेष्मऽछिन्नम्। यथा। तृणम्।
मयि। ते। वेष्टताम्। मनः ॥२॥

६४८ अन्वयः— अहं ते मनः आ खिदामि पृष्ट्यां राजाश्वः इव यथा रेष्मच्छिन्नं तृणं ते मनः मयि वेष्टताम् ॥ २ ॥

६४८ अर्थ- (अहं ते मनः आ खिदामि) मैं तेरा मन खींचता हूं। (पृष्ट्यां राजाश्वः इव) गाडीको श्रेष्ठ घोडा जैसा खींचता है, (यथा रेष्म-छिन्नं तृणं) जैसा छिन्नभिन्न घास एक दूसरेसे चिपकता है, वैसा (ते मनः मयि वेष्टतां) तेरा मन मेरे साथ चिपकता रहे ॥

[६४९]

६४९ आञ्जनस्य मदुघस्य कुष्ठस्य नलदस्य च ।
तुरो भगस्य हस्ताभ्यामनुरोधनमुद्भरे ॥३॥

६४९ आऽअञ्जनस्य । मदुघस्य ।
कुष्ठस्य । नलदस्य । च ॥
तुरः । भगस्य । हस्ताभ्याम् ।
अनुऽरोधनम् । उत् । भरे ॥३॥

६४९ अन्वयः— तुरः भगस्य आञ्जनस्य मदुघस्य कुष्ठस्य नलदस्य च हस्ताभ्यां अनुरोधनं उद्भरे ॥ ३ ॥

६४९ अर्थ— (तुरः भगस्य) त्वरासे प्राप्त होनेवाले भाग्यको, (आञ्जनस्य मदुघस्य) अञ्जनके समान हर्षित करनेवाले, (कुष्ठस्य नलदस्य हस्ताभ्यां) कूठ और नलके समान हाथों द्वारा (अनुरोधनं उद्भरे) अनुकूलतासे प्राप्त करता हूं ॥

इन तीन मंत्रोंमें पतिपत्नीका परस्पर प्रेम अटल रहे यह विषय है ॥

[६५०] (अथर्व. ६।१४१।१—३)
(६५०—६५२) विश्वामित्रः । अनुष्टुप् ।

६५० वायुरेनाः समाकरत् त्वष्टा पोषाय ध्रियताम् ।
इन्द्र आभ्यो अधि ब्रवद् रुद्रो भूम्ने चिकित्सतु ॥१॥

६५० वायुः । एनाः । सम्ऽआकरत् ।
त्वष्टा । पोषाय । ध्रियताम् ॥
इन्द्रः । आभ्यः । अधि । ब्रवत् ।
रुद्रः । भूम्ने । चिकित्सतु ॥१॥

६५० अन्वयः— वायुः एनाः सं आकरत्, त्वष्टा पोषाय ध्रियतां; इन्द्रः आभ्यः अधि ब्रवत्, रुद्रः भूम्ने चिकित्सतु ॥ १ ॥

६५१ अर्थ– (वायुः एना सं आकरत्) वायु इन गौओंको इकट्ठा करे, (त्वष्टा पोषाय ध्रियतां) त्वष्टा इनको पुष्टिके लिये धरे, (इन्द्रः आभ्यः अधि ब्रवत्) इन्द्र इनको बुलावे, (रुद्रः भूम्ने चिकित्सतु) रुद्र इनकी वृद्धि करनेके लिये चिकित्सा करे ॥

[६५१]

६५१ लोहितेन स्वधितिना मिथुनं कर्णयोः कृधि ।
अकर्तामश्विना लक्ष्म तदस्तु प्रजया बहु ॥२॥

६५१ लोहितेन । स्वऽधितिना ।
मिथुनम् । कर्णयोः । कृधि ॥
अकर्ताम् । अश्विना । लक्ष्म ।
तत् । अस्तु । प्रऽजया । बहु ॥२॥

६५१ अन्वयः— लोहितेन स्वधितिना कर्णयोः मिथुनं कृधि; अश्विनौ लक्ष्म अकर्तां तत् प्रजया बहु अस्तु ॥ २ ॥

६५१ अर्थ— (लोहितेन स्वधितिना) लोहेकी शलाकासे (कर्णयोः मिथुनं कृधि) कानोंके ऊपर जोडका चिन्ह कर । (अश्विनौ लक्ष्म अकर्तां) अश्विदेव चिन्ह करें, (तत् प्रजया बहु अस्तु) वह सन्ततिके साथ बहुत हितकारी हो ॥

[६५२]

६५२ यथा चक्रुर्देवासुरा यथा मनुष्या उत ।
एवा सहस्रपोषाय कृणुतं लक्ष्माश्विना ॥३॥

६५२ यथा । चक्रुः । देवऽअसुराः ।
यथा । मनुष्याः । उत ॥
एव । सहस्रऽपोषाय ।
कृणुतम् । लक्ष्म । अश्विना ॥३॥

६५२ अन्वयः— यथा देवासुराः चक्रुः उत यथा मनुष्याः; अश्विना ! एवा सहस्रपोषाय लक्ष्म कृणुतम् ॥ ३ ॥

६५२ अर्थ— (यथा देवासुराः चक्रुः) जैसे देवों और असुरोंने चिन्ह किये, (उत यथा मनुष्याः) और जैसे मनुष्य भी करते हैं, हे (अश्विना) हे अश्विदेवों ! (एवा सहस्रपोषाय लक्ष्म कृणुतं) इस प्रकार सहस्रों प्रकारकी पुष्टिके लिये गौओंपर चिन्ह करो ॥

अश्विसहचारी देवगणः ।

(१) अश्विसरस्वतीन्द्राः ।

[६५३] (६५३-६६९) (वा. य. १९।३३-३५)

६५३ यस्ते रसः सम्भृत ओषधीषु सोमस्य शुष्मः सुरया
सुतस्य । तेन जिन्व यजमानं मदेन सरस्वती-
मश्विनाविन्द्रमग्निम् ॥३३॥

६५३ यः । ते । रसः । सम्भृत इति सम्ऽभृतः । ओषधीषु ।
सोमस्य । शुष्मः । सुरया । सुतस्य ॥
तेन । जिन्व । यजमानम् । मदेन ।
सरस्वतीम् । अश्विनौ । इन्द्रम् । अग्निम् ॥३३॥

६५३ अन्वयः — ओषधीषु ते यः रसः सम्भृतः, सुरया सुतस्य सोमस्य शुष्मः; तेन मदेन यजमानं सरस्वतीं अश्विनौ इन्द्रं अग्निं जिन्व ॥ ३३ ॥

६५३ अर्थ- (ओषधीषु ते यः रसः सम्भृतः) ओषधियोंमें तेरा जो रस भरपूर भरकर रहा है, (सुरया सुतस्य सोमस्य शुष्मः) जलके साथ कूटे हुए सोमरसका जो बल है, (तेन मदेन) आनन्दकारक रससे (यजमानं सरस्वतीं अश्विनौ इन्द्रं अग्निं) यजमान, सरस्वती, अश्विदेव, इन्द्र और अग्निको (जिन्व) प्रसन्न कर ॥

[६५४]

६५४ यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ।
इमं त१ँ शुक्रं मधुमन्तमिन्दु१ँ सोम१ँ राजानमिह भक्षयामि

६५४ यम् । अश्विना । नमुचेः । आसुरात् । अधि ।
सरस्वती । असुनोत् । इन्द्रियाय ॥
इमम् । तम् । शुक्रम् । मधुमन्तम् । इन्दुम् ।
सोमम् । राजानम् । इह । भक्षयामि ॥३४॥

६५४ अन्वयः— अश्विना नमुचेः असुरात् अधि यं, सरस्वती इन्द्राय असुनोत्; तं इमं शुक्रं मधुमन्तं इन्दुं राजानं सोमं इह भक्षयामि ॥ ३४ ॥

६५४ अर्थ— (अश्विना नमुचेः असुरात् अधि यं) अश्विदेवोंने नमुचि-असुरसे जो सोम लाया, (सरस्वती इन्द्राय असुनोत्) सरस्वतीने इन्द्रके लिये जिसका रस निचोडा, (तं इमं शुक्रं मधुमन्तं राजानं सोमं) उसी इस शुभ्रवर्ण मधुर और आल्हाद देनेवाले दीप्तिमान सोमरसको (इह भक्षयामि) यहां इस यज्ञमें मैं भक्षण करता हूं ॥

[६५५]

६५५ यदत्र रिप्त१ँ रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः ।
अहं तदस्य मनसा शिवेन सोम१ँ राजानमिह भक्षयामि॥

६५५ यत् । अत्र । रिप्तम् । रसिनः । सुतस्य ।
यत् । इन्द्रः । अपिबत् । शचीभिः ॥
अहम् । तत् । अस्य । मनसा । शिवेन ।
सोमम् । राजानम् । इह । भक्षयामि ॥३५॥

६५५ अन्वयः— रसिनः सुतस्य यत् अत्र रिप्तं शचीभिः इन्द्रः यत् अपिबत्; तत् अस्य राजानं सोमं इह शिवेन मनसा भक्षयामि ॥ ३५ ॥

६५५अर्थ— (रसिनः सुतस्य यत् अत्र रिप्तं) रसयुक्त सोमरसका जो अंश यहां लिपटा है, चिपका है, (शचीभिः इन्द्रः यत् अपिबत्) शक्तियों-समेत इन्द्र जिसे पीता है, (तत् अस्य राजानं सोमं इह शिवेन मनसा भक्षयामि) उस तेजस्वी सोमरसको यहां मैं शुभ मनोभावनाके साथ भक्षण करता हूं ॥

[६५६] (वा. य. २०।६७-६९)

६५६ अ॒श्विना॑ ह॒विरि॑न्द्रि॒यं नमु॑चेर्धि॒या सर॑स्वती ।
आ शु॒क्रमा॑सु॒राद्वसु॑ म॒घमिन्द्रा॑य जभ्रिरे ॥६७॥

६५६ अ॒श्विना॑ । ह॒विः । इ॒न्द्रि॒यम् ।
नमु॑चेः । धि॒या । सर॑स्वती ।
आ । शु॒क्रम् । आ॒सु॒रात् । वसु॑ ।
म॒घम् । इन्द्रा॑य । ज॒भ्रि॒रे ॥६७॥

६५६ अन्वयः— अश्विना सरस्वती धिया नमुचेः आसुरात्, इन्द्राय शुक्रं हविः इन्द्रियं मघं वसु जभ्रिरे ॥ ६७ ॥

६५६ अर्थ— (अश्विना सरस्वती धिया) अश्विदेव और सरस्वतीने बुद्धिपूर्वक (नमुचेः आसुरात्) नमुचि असुरसे (इन्द्राय शुक्रं हविः इन्द्रियं मघं वसु) इन्द्रको देनेके लिये बलवर्धक हविरूप इन्द्रियशक्तिवर्धक पूजनीय धन जैसा यह सोमरस (आ जभ्रिरे) लाया गया है ॥

[६५७]

६५७ यम॒श्विना॒ सर॑स्वती ह॒विषेन्द्र॒मव॑र्धयन् ।
स बि॑भेद व॒लं म॒घं नमु॑चावासु॒रे सचा॑ ॥६८॥

६५७ यम् । अ॒श्विना॑ । सर॑स्वती ।
ह॒विषा॑ । इन्द्र॑म् । अव॑र्धयन् ॥
सः । बि॒भे॒द॒ । व॒लम् । म॒घम् ।
नमु॑चौ । आ॒सु॒रे । सचा॑ ॥६८॥

६५७ अन्वयः— अश्विना सरस्वती यं इन्द्रं हविषा वर्धयन्; सः नमुचौ आसुरे सचा मघं बलं बिभेद ॥ ६८ ॥

६५७ अर्थ— (अश्विना सरस्वती यं इन्द्रं) अश्विदेव और सरस्वतीने जिस इन्द्रको (हविषा वर्धयन्) हवि देकर बढाया, (सः नमुचौ आसुरे सचा मघं बलं बिभेद) उस इन्द्रनें नमुचि असुरको और उसके साथ बडे बल असुरको भी चूर चूर किया ॥

[६५८]

६५८ तमिन्द्रं॑ प॒शव॑: स॒चाश्विनो॒भा सर॑स्वती ।
द॒धा॑ना अ॒भ्य॑नूषत ह॒विषा॑ य॒ज्ञ इ॑न्द्रि॒यैः ॥६९॥

६५८ तम् । इन्द्र॑म् । प॒शव॑: । स॒चा ।
अ॒श्विना॑ । उ॒भा । सर॑स्वती ॥
द॒धा॑नाः । अ॒भि । अ॒नू॒षत॒ ।
ह॒विषा॑ । य॒ज्ञे । इ॒न्द्रि॒यैः ॥६९॥

६५८ अन्वयः— पशवः उभा अश्विना सरस्वती सचा यज्ञे हविषा इन्द्रियैः दधानाः तं इन्द्रं अभ्यनूषत ॥ ६९ ॥

६५८ अर्थ— (पशवः उभा अश्विना सरस्वती सचा) सब पशु, दोनों अश्विदेव और सरस्वती एकत्रित होकर (यज्ञे हविषा इन्द्रियैः दधानाः) यज्ञमें हविष्यान्नसे इन्द्रिय शक्तियोंको बढाकर बल धारण करके (तं अभ्यनूषत) उस इन्द्रकी प्रशंसा की ॥

[६५९] (वा. य. २१।४८-५८)

६५९ दे॒वं ब॒र्हिः सर॑स्वती सु॒दे॒वमिन्द्रे॑ अ॒श्विना॑ ।
तेजो॒ न चक्षु॑र॒क्ष्योर्ब॒र्हिषा॑ दधुरिन्द्रि॒यं व॑सु॒वने॑
वसु॒धेय॑स्य व्यन्तु॒ यज ॥४८॥

१९ देवम् । बर्हिः । सरस्वती । सुदेवमिति सुऽदेवम् ।
इन्द्रे । अश्विना ॥ तेजः । न । चक्षुः ।
अक्ष्योः । बर्हिषा । दधुः । इन्द्रियम् ।
वसुवनऽइति वसुऽवने । वसुधेयस्येति
वसुऽधेयस्य । व्यन्तु । यज ॥४८॥

६५९ अन्वयः— सुदेवं बर्हिः देवं बर्हिषा अश्विना सरस्वती इन्द्रे तेजः अक्ष्योः चक्षुः इन्द्रियं दधुः वसुवने वसुधेयस्य व्यन्तु, (होतः !) । ॥ ४८ ॥

६५९ अर्थ—(सुदेवं बर्हिः) देवोंको प्रिय यह बर्हि है । (देवं बर्हिषा अश्विना सरस्वती) इस देवके लिये बर्हिसे अश्विदेवोंने और सरस्वतीने इन्द्रे तेजः न अक्ष्योः चक्षुः इन्द्रियं दधुः) इन्द्रमें तेज और आखोंमें दर्शन शक्तिरूपी इंद्रिय धारण किया । (वसुवने वसुधेयस्य व्यन्तु) हमें धन प्राप्त इसलिये धनके संग्रहसे प्राप्त होनेवाला हवि इन देवोंको प्राप्त हो । हे होतः ! यज) हे हवन करनेवाले ! यजन कर ॥

[६६०]

६० देवीर्द्वारो अश्विना भिषजेन्द्रे सरस्वती ।
प्राणं न वीर्यं नासि द्वारो दधुरिन्द्रियं वसुवने
वसुधेयस्य व्यन्तु यज ॥४९॥

६० देवीः । द्वारः । अश्विना । भिषजा । इन्द्रे । सरस्वती ॥
प्राणम् । न । वीर्यम् । नसि । द्वारः । दधुः । इन्द्रियम् ।
वसुवन इति वसुऽवने । वसुधेयस्येति वसुऽधेयस्य ।
व्यन्तु । यज ॥४९॥

६६० अन्वयः– देवीः द्वारः द्वारः भिषजा अश्विना सरस्वती, इन्द्रे वीर्यं न प्राणं इन्द्रियं दधुः वसुवने वसुधेयस्य व्यन्तु, (होतः !) यज ॥ ४९ ॥

*

६६० अर्थ— (देवीः द्वारः) ये द्वार देवियाँ हैं । (द्वारः भिषजा अश्विना सरस्वती) ये द्वार, वैद्य अश्विदेव और सरस्वती इन्होंने मिलकर, (इन्द्रे वीर्यं नसि प्राणं इन्द्रियं दधुः) इन्द्रमें वीर्य, नासिकामें प्राणरूप इंद्रिय स्थिर रखा । हम धन मिले इसलिये धनसे प्राप्त हविष्यान्न ये देव ग्रहण करें । हे (होतः ! यज) होता ! तू यजन कर ॥

[६६१]

६६१ देवी उषासावश्विना सुत्रामेन्द्रे सरस्वती ।
बलं न वाचमास्य उषाभ्यां दधुरिन्द्रियं वसुवने
वसुधेयस्य व्यन्तु यज ॥५०॥

६६१ देवीऽइति देवी । उषासौ । उषसावित्युषसौ । अश्विना ।
सुत्रामेति सुऽत्रामा । इन्द्रे । सरस्वती ॥
बलम् । न । वाचम् । आस्ये । उषाभ्याम् । दधुः ।
इन्द्रियम् । वसुवनऽइति वसुऽवने । वसुधेयस्येति
वसुऽधेयस्य । व्यन्तु । यज ॥५०॥

६६१ अन्वयः— उषासा देवी सुत्रामा अश्विना सरस्वती इन्द्रे बलं आस्ये वाचं न इन्द्रियं दधुः वसुवने वसुधेयस्य व्यन्तु (होतः !) यज ॥ ५० ॥

६६१ अर्थ— (उषासा देवी) उषा और नक्त ये देवता हैं । (सुत्रामा अश्विना सरस्वती) उत्तम संरक्षण करनेवाले अश्विदेव और सरस्वती ये मिलकर (इन्द्रे बलं, आस्ये वाचं न इंद्रियं दधुः) इन्द्रमें बल, मुखमें वाणी-का इंद्रिय धारण करती हैं । हमें धन प्राप्त हो-इसलिये धनसे प्राप्त हविष्या-न्नका स्वीकार ये देव करें । हे (होतः ! यज) होता ! तू यजन कर ॥

[६६२]

६६२ देवी जोष्ट्री सरस्वत्यश्विनेन्द्रमवर्धयन् ।
श्रोत्रं न कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियं
वसुवने वसुधेयस्य व्यन्तु यज ॥५१॥

६६२ देवीऽइति देवी । जोष्ट्रीऽइति जोष्ट्री । सरस्वती ।
अश्विना । इन्द्रम् । अवर्धयन् ॥
श्रोत्रम् । न । कर्णयोः । यशः । जोष्ट्रीभ्याम् ।
दधुः । इन्द्रियम् । वसुवन इति वसुऽवने । वसुधेयस्येति
वसुऽधेयस्य । व्यन्तु । यज ॥५१॥

६६२ अन्वयः— जोष्ट्री देवी जोष्ट्रीभ्यां अश्विना सरस्वती इन्द्रं अवर्धयन्; श्रोत्रं न कर्णयोः यशः इन्द्रियं दधुः वसुवने वसुधेयस्य व्यन्तु (होतः!) यज ॥ ५१ ॥

६६२ अर्थ— (जोष्ट्री देवी) सुख देनेवाली दो देवताएँ भू और द्यौ ये हैं। (जोष्ट्रीभ्यां अश्विना सरस्वती) इनके साथ अश्विदेव और सरस्वती ये इन्द्रमें बल और कानोंमें श्रवण इंद्रिय धारण करती हैं। हमें धन प्राप्त हो इसलिये धनसे प्राप्त हविष्यान्न ये देव स्वीकारें। हे (होतः! यज) होता! तू यजन कर ॥

[६६३]

६६३ देवी ऊर्जाहुती दुघे सुदुघेन्द्रे सरस्वत्यश्विना भिषजाऽवतः।
शुक्रं न ज्योति स्तनयोराहुती धत्त इन्द्रियं वसुवने
वसुधेयस्य व्यन्तु यज ॥५२॥

६६३ देवी इति देवी । ऊर्जाहुतीऽइत्यूर्जाऽआहुती ।
दुघेऽइति दुघे । सुदुघेति सुऽदुघा । इन्द्रे । सरस्वती ।
अश्विना । भिषजा । अवतः ॥ शुक्रम् । न । ज्योतिः ।
स्तनयोः । आहुती इत्याऽहुती । धत्तः । इन्द्रियम् ।
वसुवन इति वसुऽवने । वसुधेयस्येति वसुऽधेयस्य ।
व्यन्तु । यज ॥५२॥

६६३ अन्वयः— सुदुघे दुघे च ऊर्जाहुती देवी भिषजा अश्विना सरस्वती इन्द्रे अवतः ज्योतिः धत्तः स्तनयोः आहुती शुक्रं न इन्द्रियं, वसुवने वसुधेयस्य व्यन्तु (होतः !) यज ॥५२॥

६६३ अर्थ— (सुदुघे दुघे च ऊर्जाहुती देवी) उत्तम दोहन जिनका होता ऐसी बलवर्धक दूध देनेवाली दो देवियां हैं । उनके साथ अश्विदेव और स्वती इन्द्रका (अवतः) संरक्षण करती हैं, इन्होंने उसमें (ज्योतिः तः) तेज धारण किया और (स्तनयोः शुक्रं न इंद्रियं) स्तनोंमें बलवर्धक र्यशक्तिवर्धक दूध धारण किया है । हमें धन मिले इसलिये धनसे प्राप्त वेष्यान्न ये देव स्वीकारें । हे (होतः ! यज) होता ! तू यजन कर ॥

[६६४]

६४ देवा देवानां भिषजा होताराविन्द्रमश्विना ।
वषट्कारैः सरस्वती त्विषिं न हृदये मतिꣳ होतृभ्यां
दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥५३॥

६४ देवा । देवानाम् । भिषजा । होतारौ । इन्द्रम् । अश्विना ॥
वषट्कारैरिति वषट्ऽकारैः । सरस्वती । त्विषिम् ।
न । हृदये । मतिम् । होतृभ्यामिति होतृऽभ्याम् ।
दधुः । इन्द्रियम् । वसुवन इति वसुऽवने ।
वसुधेयस्येति वसुऽधेयस्य । व्यन्तु । यज ॥५३॥

६६४ अन्वयः– देवानां होतारौ देवा वषट्कारैः भिषजा अश्विना सरस्वती [त्विषिं दधुः हृदये मतिं इन्द्रियं होतृभ्यां वसुवने वसुधेयस्य व्यन्तु [ोतः !) यज ॥ ५३ ॥

६६४ अर्थ— (देवानां होतारौ देवा) देवोंके लिये हवन करनेवाले [हैं । उनके साथ तथा (वषट्कारैः भिषजा अश्विना सरस्वती) वषट् [ोंके साथ अश्विदेव और सरस्वती मिलकर (इन्द्रं त्विषिं दधुः) इन्द्रमें [मे तेजका धारण करते रहें । उसके (हृदये मतिं इंद्रियं) हृदयमें उन्होंने [ारूप इन्द्रिय धारण किया । हमें धन मिले इसलिये द्रव्यसे प्राप्त होनेवाले [ान्यान्नका स्वीकार ये देव करें । हे (होतः ! यज) होता ! तू यजन कर ॥

[६६५]

६६५ देवीस्तिस्रस्तिस्रो देवीरश्विनेडा सरस्वती ।
शूषं न मध्ये नाभ्यामिन्द्राय दधुरिन्द्रियं वसुवने
वसुधेयस्य व्यन्तु यज ॥५४॥

६६५ देवीः । तिस्रः । तिस्रः । देवीः । अश्विना । इडा ।
सरस्वती ॥ शूषम् । न । मध्ये । नाभ्याम् । इन्द्राय ।
दधुः । इन्द्रियम् । वसुवन इति वसुऽवने ।
वसुधेयस्येति वसुऽधेयस्य । व्यन्तु । यज ॥५४॥

६६५ अन्वयः— तिस्रस्तिस्रः देवीः, अश्विना, इडा सरस्वती देवीः इन्द्राय नाभ्यां मध्ये शूषं न इन्द्रियं दधुः वसुवने वसुधेयस्य व्यन्तु (होतः !) यज ॥ ५४ ॥

६६५ अर्थ— (तिस्रः-तिस्रः देवीः) तीन देवियां हैं (अश्विनौ, इडा सरस्वती) अश्विदेव, मातृभूमि और सरस्वती (विद्या) ये देवियाँ (इन्द्राय नाभ्यां मध्ये शूषं न इंद्रियं) इन्द्रके लिये नाभिमें बलरूपी इंद्रिय (दधुः) धारण करती हैं । हमें धन मिले इसलिये द्रव्यसे प्राप्त होनेवाला हविष्यान्न ये देव लें । हे (होतः ! यज) होता ! तू यजन कर ॥

[६६६]

६६६ देव इन्द्रो नराशꣳसस्त्रिवरूथः सरस्वत्याश्विभ्यामीयते रथः ।
रेतो न रूपममृतं जनित्रमिन्द्राय त्वष्टा दधदिन्द्रियाणि
वसुवने वसुधेयस्य व्यन्तु यज ॥५५॥

६६६ देवः । इन्द्रः । नराशꣳसः । त्रिवरूथऽइति त्रिऽवरूथः ।
सरस्वत्या । अश्विभ्यामित्यश्विऽभ्याम् । ईयते । रथः ॥
रेतः । न । रूपम् । अमृतम् । जनित्रम् ।
इन्द्राय । त्वष्टा । दधत् । इन्द्रियाणि ।
वसुवन इति वसुऽवने । वसुधेयस्येति वसुऽधेयस्य ।
व्यन्तु । यज ॥५५॥

६६६ अन्वयः— रथः सरस्वती अश्विभ्यां ईयते, इन्द्रः त्रिवरूथः त्वष्टा नराशंसः देवः, रेतः रूपं अमृतं न जनित्रं इन्द्रियाणि इन्द्राय दधत्, वसुवने वसुधेयस्य व्यन्तु (होतः !) यज ॥ ५५ ॥

६६६ अर्थ— (रथः सरस्वती अश्विभ्यां ईयते) जिसका रथ सरस्वती और दोनों अश्विदेव खींचने लगते हैं। वह (इन्द्रः त्रिवरूथः त्वष्टा नराशंसः देवः) प्रभु, तीनों स्थानोंमें जिसका घर है ऐसा त्वष्टा और नरों द्वारा प्रशंसित देव ये सब (रेतः रूपं अमृतं न जनित्रं) रेत अमृतरूप जननेन्द्रिय तथा (इंद्रियाणि इन्द्राय दधत) सब इंद्रियां इन्द्रके लिये धारण करते हैं। हमें धन मिले इसलिए धनसे प्राप्त होनेवाला हविष्यान्न ये देव लें। हे (होतः ! यज) होता ! तू यजन कर॥

[६६७]

६६७ दे॒वो दे॒वैर्वन॒स्पति॒र्हिर॑ण्यपर्णो अ॒श्विभ्या॒ꣳ सर॑स्वत्या
सु॒पि॒प्प॒ल इन्द्रा॑य पच्यते॒ मधु॑ ।
ओजो॒ न जू॒तिर्ऋ॑ष॒भो न भाम॒ं वन॒स्पति॑र्नो॒ दध॑दिन्द्रि॒याणि॑
वसु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥५६॥

६६७ दे॒वः । दे॒वैः । वन॒स्पति॑ः । हिर॑ण्यपर्ण॒ऽइति॒ हिर॑ण्यऽपर्णः ।
अ॒श्विभ्या॒मित्य॒श्विऽभ्या॑म् । सर॑स्वत्या । सु॒पि॒प्प॒लऽइति॑
सु॒ऽपि॒प्प॒लः । इन्द्रा॑य । प॒च्य॒ते । मधु॑ ॥ ओज॑ः । न ।
जू॒तिः । ऋ॒ष॒भः । न । भाम॑म् । व॒न॒स्पति॑ः । न॒ः ।
दध॑त् । इ॒न्द्रि॒याणि॑ । व॒सु॒व॒न॒ऽइति॑ वसु॒ऽवने॑ ।
व॒सु॒धेय॒स्येति॑ वसु॒ऽधेय॑स्य । व्य॒न्तु॒ । यज॑ ॥५६॥

६६७ अन्वयः— वनस्पतिः इन्द्राय मधु पच्यते देवैः हिरण्यपर्णः अश्विभ्यां सरस्वत्या सुपिप्पलः ऋषभः ओजः न जूतिः भामं न इन्द्रियाणि दधत्, वसुवने वसुधेयस्य व्यन्तु (होतः !) यज ॥ ५६ ॥

६६७ अर्थ— (वनस्पतिः इन्द्राय मधु पच्यते) वनस्पति इन्द्रके लिये मधुर रसको परिपक्व करता है । (देवैः हिरण्यपर्णः अश्विभ्यां सरस्वत्या) देवोंकी योजनासे सुवर्णके पत्रोंसे युक्त, अश्विदेव और सरस्वतीके द्वारा (सुपिप्पलः ऋषभः) उत्तम फलफूलसे भरा ऋषभक वनस्पति, (ओजः न जूतिः भामं न इन्द्रियाणि दधत्) तेज, बल, वेग और प्रभावपूर्ण इंद्रियाँ धारण करते हैं । धन हमें प्राप्त हो इसलिये धनसे प्राप्त हविर्द्रव्य ये देव लें । हे (होतः ! यज) होता ! तू यजन कर ॥

[६६८]

६६८ दे॒वं ब॒र्हिर्वारि॑तीनामध्व॒रे स्ती॒र्णम॒श्विभ्या॒मूर्णम्र॑दाः
सर॑स्वत्या स्यो॒नमि॑न्द्र ते॒ सद॑ः ॥
ई॒शायै॑ म॒न्युᳪ राजा॑नं ब॒र्हिषा॑ दधुरिन्द्रि॒यं व॑सु॒वने॑
वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥५७॥

६६८ दे॒वम् । ब॒र्हिः । वारि॑तीनाम् । अ॒ध्व॒रे । स्ती॒र्णम् ।
अ॒श्विभ्या॒मित्य॒श्विऽभ्याम् । ऊर्णम्र॑दा॒ऽइत्यूर्णऽम्रदाः ॥
सर॑स्वत्या । स्यो॒नम् । इ॒न्द्र॒ । ते॒ । सद॑ः ॥
ई॒शायै॑ । म॒न्युम् । राजा॑नम् । ब॒र्हिषा॑ । द॒धुः । इ॒न्द्रि॒यम् ।
व॒सु॒वन॒ इति॑ वसु॒ऽवने॑ । व॒सु॒धेय॒स्येति॑ वसु॒ऽधेय॑स्य ।
व्यन्तु । यज॑ ॥५७॥

६६८ अन्वयः— इन्द्र ! देवं ऊर्णम्रदाः स्योनं वारितीना बर्हिः अध्वरे ते सदः अश्विभ्यां सरस्वत्या स्तीर्णं ईशायै राजानं मन्युं इन्द्रियं दधुः, वसुवने वसुधेयस्य व्यन्तु (होतः !) यज ॥ ५७ ॥

६६८ अर्थ— हे (इन्द्र) इन्द्र ! (देवं ऊर्णम्रदाः स्योनं) प्रकाशमान, ऊनके समान मृदु, सुख देनेवाला (वारितीनां बर्हिः) जलमें उत्पन्न दर्भोंका यह बर्हि यही इस (अध्वरे ते सदः) यज्ञमें तेरा स्थान है । यह आसन (अश्विभ्यां सरस्वत्या स्तीर्णं) अश्विदेव और सरस्वतीने फैलाया है । (ईशायै राजानं मन्युं दधुः) तुझ स्वामीके लिये तेजस्वी उत्साहरूप इंद्रिय धारण किया है ! हमें धन मिले इसलिये इस धनसे प्राप्त हविर्द्रव्य अर्पण किया है वह देव लें । हे (होतः ! यज) होता ! तू यजन कर ॥

[६६९]

६६९ दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृद् दे॒वान् य॑क्षद् यथाय॒थꣳ होता॑रा॒विन्द्र॑म॒श्विना॑ वा॒चा वाच॒ꣳ सर॑स्वतीम॒ग्निꣳ सोम॑ꣳ स्वि॑ष्ट॒कृत् स्वि॑ष्ट॒ इन्द्रः॑ सु॒त्रामा॑ स॒वि॒ता वरु॑णो भि॒षगि॒ष्टो दे॒वो व॒न॒स्पति॒ः स्वि॑ष्टा दे॒वा आ॑ज्य॒पाः स्वि॑ष्टो अ॒ग्निर॒ग्निना॑ होता॑ हो॒त्रे स्वि॑ष्ट॒कृद् य॒शो न द॑धदिन्द्रि॒यमू॒र्ज॑मप॑चिति॒ꣳ स्व॒धां व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥५८॥

६६९ दे॒वः । अ॒ग्निः । स्वि॑ष्ट॒कृदिति॑ स्वि॑ष्ट॒ऽकृत् । दे॒वान् । य॒क्षत् । य॒था॒य॒थमिति॑ यथाऽय॒थम् । होता॑रौ । इन्द्र॑म् । अ॒श्विना॑ । वा॒चा । वाच॑म् । सर॑स्वतीम् । अ॒ग्निम् । सोम॑म् । स्वि॑ष्ट॒कृदिति॑ स्वि॑ष्ट॒ऽकृत् । स्वि॑ष्ट॒ऽइति॒ सु॒ऽइ॑ष्टः । इन्द्रः॑ । सु॒त्रामेति॑ सु॒ऽत्रामा॑ । स॒वि॒ता । वरु॑णः । भि॒षक् । इ॒ष्टः । दे॒वः । व॒न॒स्पति॑ः स्वि॑ष्टा॒ऽइति॒ सु॒ऽइ॑ष्टाः । दे॒वाः । आ॒ज्य॒पा॒ऽइत्या॑ज्य॒ऽपाः । स्वि॑ष्ट॒ऽइति॒ सु॒ऽइ॑ष्टः । अ॒ग्निः । अ॒ग्निना॑ । होता॑ । हो॒त्रे । स्वि॑ष्ट॒कृदिति॑ स्वि॑ष्ट॒ऽकृत् । य॒शः । न । द॑धत् । इ॒न्द्रि॒यम् । ऊर्ज॑म् । अप॑चिति॒मित्यप॑ऽचितिम् । स्व॒धाम् । व॒सु॒वन॒ इति॑ वसु॒ऽवने॑ । व॒सु॒धेय॒स्येति॑ वसु॒ऽधेय॑स्य । व्य॒न्तु । यज॑ ॥५८॥

६६९ अन्वयः— स्विष्टकृत् अग्निः देवः यथायथं देवान् यक्षत् होतारा इन्द्रं अश्विना वाचा वाचं सरस्वतीं अग्निं च सोमं, स्विष्टकृत् सुत्रामा इन्द्रः स्विष्टः सविता भिषक् वरुणः इष्टः देवः वनस्पतिः इष्टः आज्यपाः देवाः स्विष्टाः अग्निना अग्निः इष्टः, स्विष्टकृत् होता होत्रे यशः इन्द्रियं ऊर्जं अपचितिं न स्वधा दधत्, वसुवने वसुधेयस्य व्यन्तु (होतः !) यज ॥ ५८ ॥

६६९ अर्थ— (स्विष्टकृत् अग्निः देवः) स्विष्टकृत् अग्निदेव है, (यथायथं देवान् यक्षत्) यथायोग्य रीतिसे उसने सब देवोंका यजन किया है। (होतारा इन्द्रं अश्विना वाचा वाचं सरस्वतीं अग्निं च सोमं) होता, इन्द्र, अश्विदेव, वाणी सरस्वती, अग्नि और सोमका यजन किया है। (स्विष्टकृत् सुत्रामा इन्द्रः) स्विष्टकृत् संरक्षक इन्द्र, (स्विष्टः सविता) यजन किया गया सविता, (भिषक् वरुणः इष्टः देवः वनस्पतिः इष्टः) वैद्य वरुण इष्ट देव वनस्पति, (आज्यपाः देवाः स्विष्टाः) घी पीनेवाले देवोंका यजन हुआ है। (अग्निना अग्निः इष्टः) अग्निद्वारा अग्निको यजन हुआ है। (स्विष्टकृत् होत्रे यशः इन्द्रियं ऊर्जं अपचितिं न स्वधा दधत्) हवन करनेवालेके लिये यश, इंद्रिय, बल, रस, अन्न आदिका धारण किया है। हमें धन मिले इसलिये धनसे प्राप्त हविष्यान्न ये देव प्राप्त करें। हे (होतः ! यज) होता ! तू यजन कर ॥

(२) अश्विसूर्यादयः ।

[६७०] (वा० य० ३८।१२)

६७० अश्विना घर्मं पातꣳ हार्द्वानमहर्दिवाभिरूतिभिः ।
तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥१२॥

६७० अश्विना । घर्मम् । पातम् । हार्द्वानम् ।
अहः । दिवाभिः । ऊतिभिरित्यूतिऽभिः ॥
तन्त्रायिणे । नमः । द्यावापृथिवीभ्याम् ॥१२॥

६७० अन्वयः— अश्विना ! अहर्दिवाभिः ऊतिभिः हार्द्वानं घर्मं पातं तन्त्रायिणे द्यावापृथिवीभ्यां नमः ॥ १२ ॥

६७० अर्थ— हे (अश्विना) अश्विदेवों ! (अहर्दिवाभिः ऊतिभिः) सवेरे और शामको अपने संरक्षणद्वारा (हार्द्वानं घर्मं पातं) हृदयको आल्हाद देनेवाले इस तपे दूधके पात्रकी सुरक्षा करो। (तन्त्रायिणे द्यावापृथिवीभ्यां नमः) कालयन्त्ररूप आदित्य, द्यु और भूमिके लिये प्रणाम है ॥

(३) अश्विनौ, बृहस्पतिः ।

[६७१] (अथर्व० ५।२६।१२)

(६७१) ब्रह्मा । परातिशक्वरी चतुष्पदा गायत्री ।

६७१ अश्विना ब्रह्मणा यातमर्वाञ्चौ वषट्कारेण यज्ञं वर्धयन्तौ ।
बृहस्पते ब्रह्मणा याह्यर्वाङ् यज्ञो अयं स्वरिदं
यजमानाय स्वाहा ॥१२॥

६७१ अश्विना । ब्रह्मणा । आ । यातम् ।
अर्वाञ्चौ । वषट्ऽकारेण । यज्ञम् । वर्धयन्तौ ॥
बृहस्पते । ब्रह्मणा । आ । याहि । अर्वाङ् । यज्ञः ।
अयम् । स्वः । इदम् । यजमानाय । स्वाहा ॥१२॥

६७१ अन्वयः— अश्विना ! ब्रह्मणा वषट्कारेण यज्ञं वर्धयन्तौ अर्वाञ्चौ आ यातम् । बृहस्पते ब्रह्मणा अर्वाङ् आ याहि, अयं यज्ञः यजमानाय स्वः इदं स्वाहा ॥ १२ ॥

६७१ अर्थ— हे (अश्विना) अश्विदेवो ! (ब्रह्मणा वषट्कारेण यज्ञं वर्धयन्तौ) ज्ञान और दानद्वारा यज्ञको बढाते हुए (अर्वाञ्चौ आ यातं) हमारे पास आओ । हे (बृहस्पते ! ब्रह्मणा अर्वाङ् आ याहि) ज्ञानके साथ पास आओ! (अयं यज्ञः यजमानाय स्वः) यह यज्ञ यजमानका तेज बढानेवाला होवे । (स्वाहा) यज्ञमें आत्मसमर्पण हो ॥

(४) श्येनः, अश्विनौ ।

[६७२] (अथर्व० ३।३।४)

(६७२-६७८) अथर्वा । त्रिष्टुप् ।

६७२ श्येनो हव्यं नयत्वा परस्मादन्यक्षेत्रे अपरुद्धं चरन्तम् ।
अश्विना पन्थां कृणुतां सुगं त इमं सजाता
अभिसंविशध्वम् ॥४॥

६७२ श्येनः । हव्यम् । नयतु । आ । परस्मात् ।
अन्यऽक्षेत्रे । अपऽरुद्धम् । चरन्तम् ॥
अश्विना । पन्थाम् । कृणुताम् । सुऽगम् । ते ।
इमम् । सऽजाताः । अभिऽसंविशध्वम् ॥४॥

६७२ अन्वयः— अन्यक्षेत्रे अपरुद्धं चरन्तं हव्यं श्येनः परस्मात् आ नयतु। अश्विनौ ते पन्थां सुगं कृणुतां। सजाताः इमं अभिसंविशध्वम् ॥ ४ ॥

६७२ अर्थ—(अन्यक्षेत्रे अपरुद्धं चरन्तं हव्यं) अन्य प्रदेशमें छिपकर भ्रमण करनेवाले सन्मानयोग्य राजाको (श्येनः परस्मात् आ नयतु) श्येनके समान वेगसे दूसरे देशसे ले आवे। (अश्विनौ ते पन्थां सुगं कृणुतां) अश्वि-देव तेरे मार्गको सुखसे चलनेयोग्य बनावे । (सजाताः इमं अभिसंविशध्वं) सजातीय लोग इस राजाको पुनः राज्यपर प्रविष्ट करावें ॥

(५) अश्विनौ, द्यौष्पिता ।

[६७३] (अथर्व० ६।४।३) त्रिपदा विराड् गायत्री ।

६७३ धिये समश्विना प्रावतं न उरुष्या ण उरुज्मन्नप्रयुच्छन् ।
द्यौ३ष्पितर्यावय दुच्छुना या ॥३॥

६७३ धिये । सम् । अश्विना । प्र । अवतम् ।
नः । उरुष्य । नः । उरुऽज्मन् । अप्रऽयुच्छन् ॥
द्यौः३ । पितः । यवय । दुच्छुना । या ॥३॥

६७३ अन्वयः— अश्विना ! धिये नः सं प्रावतं, उरु-ज्मन् ! अप्रयुच्छन् नः उरुष्य द्यौः, पिता या दुच्छुना, यावय ॥ ३ ॥

६७३ अर्थ—हे (अश्विना) अश्विदेवो ! (धिये नः सं प्रावतं) बुद्धि बढा-नेके लिये हमारी उत्तम सुरक्षा करो। हे (उरु-ज्मन्) विशेष गतिवाले ! (अप्रयुच्छन् नः उरुष्य) भूल न करते हुए तू हमारी सुरक्षा कर। हे (द्यौः पिता) द्युलोकके पिता ! (या दुच्छुना, यावय) जो दुर्गति हो उसे दूर कर ॥

(६) बृहस्पतिः, अश्विनौ ।

[६७४] (अथर्व० ६।६९।१-३) अनुष्टुप् ।

६७४ गिरावरगराटेषु हिरण्ये गोषु यद्यशः ।
सुरायां सिच्यमानायां कीलाले मधु तन्मयि ॥१॥

६७४ गिरौ । अरगराटेषु ।
हिरण्ये । गोषु । यत् । यशः ॥
सुरायाम् । सिच्यमानायाम् ।
कीलाले । मधु । तत् । मयि ॥१॥

६७४ अन्वयः— गिरौ अरगराटेषु हिरण्ये गोषु यत् यशः सिच्यमानायां सुरायां कीलाले मधु तत् मयि ॥ १ ॥

६७४ अर्थ—(गिरौ अरगराटेषु हिरण्ये गोषु) पर्वत, चक्रयन्त्र, सुवर्ण और गौवोंमें (यत् यशः) जो यश है, तथा (सिच्यमानायां सुरायां) बहनेवाली पर्जन्यधारामें तथा (कीलाले मधु) जो अन्नमें मधुरता है वह सब (तत् मयि) मुझे प्राप्त हो ॥

[६७५]

६७५ अश्विना सारघेण मा मधुनाङ्क्तं शुभस्पती ।
यथा भर्गस्वतीं वाचमावदानि जनाँ अनु ॥२॥

६७५ अश्विना । सारघेण । मा ।
मधुना । अङ्क्तम् । शुभः । पती इति ॥
यथा । भर्गस्वतीम् । वाचम् ।
आऽवदानि । जनान् । अनु ॥२॥

६७५ अन्वयः— शुभस्पती अश्विनौ ! सारघेण मधुना मा अङ्क्तं, यथा भर्गस्वतीं वाचं जनान् अनु आवदानि ॥ २ ॥

६७५ अर्थ— (शुभस्पती अश्विनौ) शुभके स्वामी अश्विदेवो ! (सारघेण मधुना मा अक्तम्) सरस मधुसे मुझे युक्त करो । (यथा भर्गस्वतीं वाचं) जिससे भाग्यवाली वाणीको (जनान् अनु आवदानि) लोगोंके प्रति मैं बोलूं, वैसा करो ॥

[६७६]

६७६ म॒यि॑ वर्चो॒ अथो॒ यशोऽथो॑ य॒ज्ञस्य॒ यत् पय॑ः ।
तन्मयि॑ प्र॒जाप॑तिर्दि॒वि द्यामि॑व दृंहतु ॥३॥

६७६ मयि॑ । वर्च॑ः । अथो॒ इति॑ । यश॑ः ।
अथो॒ इति॑ । य॒ज्ञस्य॑ । यत् । पय॑ः ॥
तत् मयि॑ । प्र॒जाऽप॑तिः ।
दि॒वि । द्याम्ऽइ॑व । दृं॒ह॒तु॒ ॥३॥

६७६ अन्वयः— मयि वर्चः, अथो यशः अथो यज्ञस्य यत् पयः प्रजापतिः तत् मयि दृंहतु दिवि द्यां इव ॥ ३ ॥

६७६ अर्थ— (मयि वर्चः) मुझे तेज मिले, (अथो यशः) और यश मिले, (अथो यज्ञस्य यत् पयः) यज्ञका जो सार है,जो दूध है, (प्रजापतिः तत् मयि दृंहतु) प्रजापति वह मुझमें रखे, मुझे देवे (दिवि द्यां इव) जैसा द्युलोकमें प्रकाश होता है वैसा मैं तेजस्वी हो जाऊं ॥

(७) सांमनस्यं, अश्विनौ ।

[६७७] (अथर्व० ७।५२।१-२)
१ ककुम्मत्यनुष्टुप्, २ जगती ।

६७७ सं॒ज्ञानं॑ न॒ः स्वेभि॑ः सं॒ज्ञान॒मर॑णेभिः ।
सं॒ज्ञान॑मश्विना यु॒वमि॒हास्मासु॒ नि य॑च्छतम् ॥१॥

६७७ स॒म्ऽज्ञान॑म् । न॒ः । स्वेभि॑ः ।
स॒म्ऽज्ञान॑म् । अर॑णेभिः ॥
स॒म्ऽज्ञान॑म् । अ॒श्विना॑ । यु॒वम् ।
इ॒ह । अ॒स्मासु॑ । नि । य॒च्छ॒त॒म् ॥१॥

६७७ अन्वयः— अश्विनौ ! नः स्वेभिः संज्ञानं अरणेभिः संज्ञानं युवं इह अस्मासु संज्ञानं नि यच्छतम् ॥ १ ॥

६७७ अर्थ— हे (अश्विनौ) अश्विदेवो ! (नः स्वेभिः संज्ञानं) हमें स्वजनोंके साथ मिलकर रहनेका ज्ञान हो । (अरणेभिः संज्ञानं) हमें निकृष्ट लोगोंके साथ मिलकर रहनेका ज्ञान हो । (युवं इह अस्मासु) तुम यहां हममें (संज्ञानं नि यच्छतं) मिलकर रहनेका ज्ञान स्थिर रखो ॥

[६७८]

६७८ सं जानामहै मनसा सं चिकित्वा मा युष्महि मनसा
दैव्येन । मा घोषा उत्स्थुर्बहुले विनिर्हते मेषुः
पप्तदिन्द्रस्याहन्यागते ॥२॥

६७८ सम् । जानामहै । मनसा । सम् । चिकित्वा ।
मा । युष्महि । मनसा । दैव्येन ॥
मा । घोषाः । उत् । स्थुः । बहुले । विऽनिर्हते ।
मा । इषुः । पप्तत् । इन्द्रस्य । अहनि । आऽगते ॥२॥

६७८ अन्वयः— मनसा संजानामहै चिकित्वा सं दैव्येन मनसा मा युष्महि बहुले विनिर्हते घोषाः मा उत्स्थुः, आगते अहनि इन्द्रस्य इषुः मा पप्तत् ॥ २ ॥

६७८ अर्थ— (मनसा संजानामहै) मनसे मिलकर रहनेका ज्ञान प्राप्त करें, (चिकित्वा सं) ज्ञानसे भी मिलकर रहना सीखें । (दैव्येन मनसा) मनको दिव्य करके उससे (मा युष्महि) कभी विरोध न करें, आपसमें फूट न होने दें ! (बहुले विनिर्हते) बहुतोंका नाश होनेपर (घोषाः मा उत्स्थुः) दुःखके शब्द न उठे, आपसमें विरोध न हो और उससे होनेवाला वध, हत्या आदि भी न हो । (आगते अहनि) भविष्यमें (इन्द्रस्य इषुः मा पप्तत्) इन्द्रका बाण हमपर न गिरे । इन्द्रके मनसे हम अपराधी न हों ॥

(८) घर्मः, अश्विनौ ।

[६७९] (अथर्व० ७।७३।१—५,८)

१,४ जगती, २ पथ्याबृहती, ३,५,८ त्रिष्टुप् ।

६७९ समिद्धो अग्निर्वृषणा रथी दिवस्तप्तो घर्मो दुह्यते वामिषे
मधु । वयं हि वां पुरुदमासो अश्विना हवामहे
सधमादेषु कारवः ॥१॥

६७९ सम्ऽइद्धः । अग्निः । वृषणा । रथी । दिवः ।
तप्तः । घर्मः । दुह्यते । वाम् । इषे । मधु ॥
वयम् । हि । वाम् । पुरुऽदमासः ।
अश्विना । हवामहे । सधऽमादेषु । कारवः ॥१॥

६७९ अन्वयः— वृषणौ अश्विनौ ! रथी अग्निः समिद्धः घर्मः तप्तः वां इषे मधु दुह्यते, वयं पुरुदमासः कारवः सध-मादेषु वां हवामहे ॥ १ ॥

६७९ अर्थ— हे (वृषणौ अश्विनौ) बलवान् अश्विदेवों ! (दिवः रथी अग्निः समिद्धः) प्रकाशका रथ जैसा अग्नि प्रदीप्त हुआ है । (घर्मः तप्तः) यह पात्र उष्ण हुआ है । (वां इषे मधु दुह्यते) आपके यज्ञके लिये मधुर रस निकाला जा रहा है (वयं पुरुदमासः कारवः) हम सब बडे घरवाले कुशलतासे कर्म करनेवाले लोग (सध-मादेषु वां हवामहे) साथ साथ रसपान करनेके समय आप दोनोंको बुलाते हैं ॥

[६८०]

६८० समिद्धो अग्निरश्विना तप्तो वां घर्म आ गतम् ।
दुह्यन्ते नूनं वृषणेह धेनवो दस्रा मदन्ति वेधसः ॥२॥

६८० सम्ऽइद्धः । अग्निः । अश्विना ।
तप्तः । वाम् । घर्मः । आ । गतम् ॥
दुह्यन्ते । नूनम् । वृषणा । इह ।
धेनवः । दस्रा । मदन्ति । वेधसः ॥२॥

६८० अन्वयः— [illegible]णौ अश्विनौ । अग्निः समिद्धः वां घर्मः तप्तः आ गतं; नूनं इह धेनवः दुह्यन्ते, दस्रौ । वेधसः मदन्ति ॥ २ ॥

६८० अर्थ- हे (वृषणौ अश्विनौ) बलवान् अश्विदेवों ! (अग्निः समिद्धः) अग्नि प्रदीप्त हुआ है, (वां घर्मः तप्तः) आपके लिये यह दूधका पात्र तप गया है। इसलिये (आ गतं) आओ । (नूनं इह धेनवः दुह्यन्ते) निश्चयसे यहां गौवें दुही जाती हैं । हे (दस्रौ) दर्शनीय देवो । (वेधसः मदन्ति) ज्ञान-पूर्वक कर्म करनेवालेही आनंद प्राप्त करते हैं ॥

[६८१]

६८१ स्वाहाकृतः शुचिर्देवेषु यज्ञो यो अश्विनोश्चमसो देवपानः ।
तमु विश्वे अमृतासो जुषाणा गन्धर्वस्य प्रत्यास्ना
रिहन्ति ॥३॥

६८१ स्वाहाऽकृतः । शुचिः । देवेषु । यज्ञः ।
यः । अश्विनोः । चमसः । देवऽपानः ॥
तम् । ऊं इति । विश्वे । अमृतासः । जुषाणाः ।
गन्धर्वस्य । प्रति । आस्ना । रिहन्ति ॥३॥

६८१ अन्वयः— यः अश्विनोः देवपानः चमसः देवेषु स्वाहाकृतः शुचिः विश्वे अमृतासः तं उ जुषाणा (तं उ) गन्धर्वस्य आस्ना प्रति रिहन्ति ॥ ३ ॥

६८१ अर्थ— (यः अश्विनोः देवपानः चमसः) जो अश्विदेवोंका देवोंको रसपान करानेवाला चमस है, वह (देवेषु स्वाहाकृतः शुचिः) देवोंके लिये अर्पण होनेके कारण पवित्र है । (विश्वे अमृतासः तं उ जुषाणः) सब देव उसीका सेवन करते हैं । और (तं उ गंधर्वस्य आस्ना प्रति रिहन्ति) उसकी गंधर्वके मुखसे प्रशंसा करते हैं ॥

[६८२]

६८२ यदुस्रियास्वाहुतं घृतं पयोऽयं स वामश्विना भाग आ
गतम् । माध्वी धर्तारा विदथस्य सत्पती तप्तं घर्मं पिबतं
रोचने दिवः ॥४॥

६८२ यत् । उस्रियासु । आऽहुतम् । घृतम् । पयः ।
अयम् । सः । वाम् । अश्विना । भागः । आ । गतम् ॥
माध्वी इति । धर्तारा । विदथस्य ।
सत्पती इति सत्ऽपती । तप्तम् । घर्मम् । पिबतम् ।
रोचने । दिवः ॥४॥

६८२ अन्वयः— अश्विनौ ! यत् उस्रियासु आहुतं घृतं पयः अयं स वां भागः आ गतं; माध्वी विदथस्य धर्तारौ सत्पती ! दिवः रोचने तप्तं घर्मं पिबतम् ॥ ४ ॥

६८२ अर्थ— हे (अश्विनौ) अश्विदेवों ! (यत् उस्रियासु आहुतं घृतं पयः) जो गौओंमें रखा हुआ घी और दूध हैं, (अयं स वां भागः) यह तो आपकाही भाग है, इसके लिये तुम दोनों (आ गतं) आओ। हे (माध्वी विदथस्य धर्तारौ सत्पती) मधुर रसपर प्रेम करनेवाले, युद्धमें आधार देनेवाले उत्तम स्वामी ! (दिवः रोचने तप्तं घर्मं पिबतं) प्रकाशके होनेपर तपे दूधको पीओ ॥

[६८३]

६८३ तप्तो वां घर्मो नक्षतु स्वहोता प्र वामध्वर्युश्चरतु पयस्वान् ।
मधोर्दुग्धस्याश्विना तनाया वीतं पातं पयस उस्रियायाः

६८३ तप्तः । वाम् । घर्मः । नक्षतु । स्वऽहोता ।
प्र । वाम् । अध्वर्युः । चरतु । पयस्वान् ॥
मधोः । दुग्धस्य । अश्विना । तनायाः ।
वीतम् । पातम् । पयसः । उस्रियायाः ॥५॥

६८३ अन्वयः-अश्विनौ ! तप्तः घर्मः वां नक्षतु, स्वहोता पयस्वान् अध्वर्युः वां प्र चरतु; तनायाः उस्रियायाः मधोः दुग्धस्य पयसः वीतं पातम् ॥ ५ ॥

६८३ अर्थ-हे (अश्विनौ) अश्विदेवों ! (तप्तः घर्मः वां नक्षतु) तपे दूधको तुम दोनों प्राप्त करो ! (स्व होता पयस्वान् अध्वर्युः वां प्र चरतु) स्वयं हवन करनेवाला दूध लेकर आया अध्वर्यु आप दोनोंकी सेवा करे ! (तनायाः उस्रियायाः मधोः दुग्धस्य पयसः) हृष्टपुष्ट गौके मधुर दूधको (वीतं पातं) प्राप्त करके पी डालो ॥

*

[६८४]

६८४ हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसा न्यागन्।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय

६८४ हिङ्ऽकृण्वती । वसुऽपत्नी । वसूनाम् ।
वत्सम् । इच्छन्ती । मनसा । निऽआगन् ॥
दुहाम् । अश्विऽभ्याम् ।पयः । अघ्न्या ।
इयम् । सा । वर्धताम् । महते । सौभगाय ॥८॥

६८४ अन्वयः— हिङ्कृण्वती वसूनां वसुपत्नी मनसा वत्सं इच्छन्ती नि-आगन्; इयं अघ्न्या अश्विभ्यां पयः दुहां सा महते सौभगाय वर्धताम् ॥ ८ ॥

६८४ अर्थ- (हिंकृण्वती वसूनां वसुपत्नी) हिंकार करनेवाली वसुओंको दूध पिलानेवाली, (मनसा वत्सं इच्छन्ती नि-आगन्) मनसे अपने बछडेको मिलनेकी इच्छा करती हुई पास आगयी हैं । (इयं अघ्न्या अश्विभ्यां पयः दुहां) यह अवध्य गौ अश्विदेवोंके लिये दूध देवे । और (सा महते सौभगाय वर्धतां) वह बडे ऐश्वर्यका संवर्धन करनेके लिये बढे ॥

(९) मधु, अश्विनौ ।

[६८५] (अथर्व. ९।१।११,१६-१७,१९)
अनुष्टुप्, १७ उपरिष्टाद्विराड् बृहती ।

६८५ यथा सोमः प्रातःसवने अश्विनोर्भवति प्रियः ।
एवा मे अश्विना वर्च आत्मनि ध्रियताम् ॥११॥

६८५ यथा । सोमः । प्रातःऽसवने ।
अश्विनोः । भवति । प्रियः ॥
एव । मे । अश्विना । वर्चः ।
आत्मनि । ध्रियताम् ॥११॥

६८५ अन्वयः— यथा सोमः प्रातःसवने अश्विनोः प्रियः भवति, अश्विना ! एवा मे आत्मनि वर्चः ध्रियताम् ॥ ११ ॥

६८५ अर्थ- (यथा सोमः प्रातःसवने) जैसा सोमरस प्रातःसवन यज्ञमें (अश्विनोः प्रियः भवति) अश्विदेवोंको प्रिय होता है, हे (अश्विना) अश्विदेवो! (एवा मे आत्मनि) वैसा मेरी आत्मामें (वर्चः ध्रियतां) तेजका धारण करो ॥

[६८६]

६८६ यथा मधु मधुकृतः संभरन्ति मधावधि ।
एवा मे अश्विना वर्चं आत्मनि ध्रियताम् ॥१६॥

६८६ यथा । मधु । मधुऽकृतः ।
सम्ऽभरन्ति । मधौ । अधि ॥
एव । मे । अश्विना । वर्चः ।
आत्मनि । ध्रियताम् ॥१६॥

६८६ अन्वयः— यथा मधुकृतः मधौ अधि मधु संभरन्ति, अश्विना ! एवा मे वर्चः तेजः बलं ओजः ध्रियताम् ॥ १६ ॥

६८६ अर्थ– (यथा मधुकृतः) जैसी मधुमक्खियाँ (मधौ अधि मधु संभरन्ति) मधुकोशमें मधुको संचित करती हैं, हे (अश्विना) अश्विदेवों ! (एवा मे) ऐसा मेरेलिये (वर्चः तेजः बलं ओजः ध्रियतां) प्रभाव, तेज, बल और सामर्थ्य धारण करें ॥

[६८७]

६८७ यथा मक्षा इदं मधु न्यञ्जन्ति मधावधि ।
एवा मे अश्विना वर्चस्तेजो बलमोजश्च ध्रियताम् ॥१७॥

६८७ यथा । मक्षाः । इदम् । मधु ।
निऽअञ्जन्ति । मधौ । अधि ॥
एव । मे । अश्विना । वर्चः ।
तेजः । बलम् । ओजः । च । ध्रियताम् ॥१७॥

६८७ अन्वयः— यथा मक्षाः इदं मधु मधौ अधि न्यञ्जन्ति एवा अश्विनौ ! मे वर्चः तेजः बलं ओजः ध्रियताम् ॥ १७ ॥

६८७ अर्थ— (यथा मक्षाः) जैसी मक्खियाँ (इदं मधु) यह मधु (मधौ अधि न्यञ्जन्ति) मधुके कोशमें भर देते हैं, (एवा) इस तरह हे (अश्विनौ) अश्विदेवों ! (मे वर्चः तेजः बलं ओजः ध्रियतां) मेरेमें प्रभाव, तेज और सामर्थ्य धारण करो ॥

[६८८]

६८८ अश्विना सारघेण मा मधुनाऽङ्क्तं शुभस्पती ।
यथा वर्चस्वतीं वाचमावदानि जनाँ अनु ॥१९॥

६८८ अश्विना । सारघेण । मा ।
मधुना । अङ्क्तम् । शुभः । पती इति ॥
यथा । वर्चस्वतीम् । वाचम् ।
आऽवदानि । जनान् । अनु ॥१९॥

६८८ अन्वयः- शुभस्पती अश्विनौ ! सारघेण मधुना मा सं अङ्क्तं; यथा वर्चस्वतीं वाचं जनान् अनु आवदानि ॥ १९ ॥

६८८ अर्थ— हे (शुभस्पती अश्विनौ) शुभके पालक अश्विदेवो ! (सारघेण मधुना मा सं अङ्क्तं) साररूप मधुसे मुझे युक्त करो । (यथा वर्चस्वतीं वाचं) जैसा तेजस्वी भाषण (जनान् अनु आवदानि) लोगोंके प्रति मैं बोल सकूं वैसा मेरा मीठा भाषण करो ॥

(१०) सिनीवालीसरस्वत्यश्विनः ।

[६८९] (ऋ. १०।१८४।२)

(६८९) त्वष्टा गर्भकर्ता, विष्णुर्वा प्राजापत्यः । अनुष्टुप् ।

६८९ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावा धत्तां पुष्करस्रजा ॥२॥

६८९ गर्भम् । धेहि । सिनीवालि ।
गर्भम् । धेहि । सरस्वति ॥
गर्भम् । ते । अश्विनौ । देवौ ।
आ । धत्ताम् । पुष्करऽस्रजा ॥२॥

६८९ अन्वयः- सिनीवालि ! गर्भं धेहि, सरस्वति ! गर्भं धेहि, पुष्करस्रजा अश्विनौ देवौ ते गर्भं आ धत्ताम् ॥ २ ॥

६८९ अर्थ- हे (सिनीवालि) सिनीवाली ! (गर्भं धेहि) गर्भका धारण करो । हे (सरस्वति) सरस्वति (गर्भं धेहि) गर्भका धारण करो । हे (पुष्करस्रजा अश्विनौ देवौ) कमलोंकी माला धारण करनेवाले अश्विदेवो ! (ते गर्भं आ धत्तां) तेरे गर्भका धारण करो ॥

ऋषि-सूची ।